जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥
{श्रीमद्भागवतमहापुराणम्-१.१.१}

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त ! भाग्यं जनानाम्॥
{श्रीमन्नारायणीम्-१.१.}



PUBLISHER : THE DIRECTOR, CENTRAL SANSKRIT UNIVERSITY,
GURUVAYOOR CAMPUS
PURANATTUKARA, THRISSUR, KERALA-680551

निबन्धमाला* एकादशं पुष्पम् *अङ्कः ११* वर्षम् २०२०-२०२१*

# निबन्धमाला

ISSN - 2277-2359

वार्षिकशोधपत्रिका

विद्यया विन्दतेऽमृतम्॥ ॐ



ॐ विद्यया विन्दतेऽमृतम्॥ ॐ

मुख्यसम्पादकः
आचार्यः ई. एम्. राजन्, निर्देशकः



केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा प्रथमश्रेण्यां सम्मानितः)
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः
गुरुवायूर्-परिसरः
पुरनाट्टुकरा, त्रिश्शूर्, केरलम् – ६८०५५१



वर्षम् २०२१ एकादशं पुष्पम्

ISSN - 2277-2359

# THE NIBANDHAMĀLĀ

## ANNUAL RESEARCH JOURNAL

## CHIEF EDITOR

**PROF: E. M. RAJAN, DIRECTOR**

# CENTRAL SANSKRIT UNIVERSITY

**Established by an Act of Parliament**

**Under Ministry of Education Govt. of India**

# GURUVAYOOR CAMPUS

**PURANATTUKARA, THRISSUR, KERALA**

**2021**

**ELEVENTH EDITION**

**प्रकाशकः Publisher** निर्देशकः Director

Central Sanskrit University

Guruvayoor-Campus,

Puranattukara, Thrissur,

Kerala – 680551. Phone: 0487-2307208

**E-Mail:** nibandhamaalaacsugc@gmail.com

**Web: csu-guruvayoor.edu.in**

**ISSN No.2277-2359**

**सम्पादकमण्डलम्**

| | |
|---|---|
| **मुख्यसम्पादकः-** | **आचार्यः ई. एम्. राजन्, निदेशकः** |
| **Chief Editor** | Prof. E. M. Rajan, **Director** |

**सम्पादकाः Editors**

| | |
|---|---|
| १.डा. ई. आर्. नारायणन् | Dr. E. R. Narayanan |
| २. डा. रामचन्द्र जोयिस हेच् | Dr. Ramachandra Joisa H. |
| ३. डा. ओ. आर्. विजयराघवन् | Dr. O. R. Vijayaraghavan |
| ४. श्रीमती के. ए. जेस्सी | Smt. K. A. Jessy |
| ५.डा. पी. आर् राधिका | Dr. P. R. Radhika |
| ६. डा. विद्याधरः प्रभला | Dr. Vidyadhar Prabhala |
| ७. डा. पी. के. श्रीनिवासन् | Dr. P. K. Sreenivasan |
| ८. श्री. के. सुब्रह्मण्यः भट्टः | Dr. K. Subrahmanya Bhat |

| | |
|---|---|
| **शोधप्रकाशविभागसमितेः अध्यक्षः** | **आचार्यः के. के. हर्षकुमारः** |
| **HOD, Research & Publications:** | **Prof. K. K. Harshakumar** |

गुरुवायूर्-परिसरः Guruvayoor-Campus

एकादशी सञ्चिका 2020-21 Eleventh Issue: 2020-21

प्रतिलिपयः 150 Copies: 150

**मूल्यम्– Rs.400/- Price: Rs.400/-**

Printed at: Kairali Press, Thrissur.

प्रो. के. बि. सुब्बरायुडु
कुलपति (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
शिक्षा मन्त्रालय, भारत सरकार के अधीन
56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058

Prof. K. B. Subbarayudu
Vice-Chancellor (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110058

## शुभाशंसनम्

गुरुपवनपुराधीश्वरस्य परमात्मनः श्रीकृष्णस्य पदतले सुप्रतिष्ठितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरस्य वार्षिकी शोधपत्रिका **"निबन्धमाला"** प्रतिवर्षमिवास्मिन्नपि वर्षे प्रकाश्यमाना वर्तत इत्यमुमुदन्तं श्रुत्वा हृदयममन्दानन्दतरङ्गितमस्ति। भारते प्रतिष्ठितासु संस्कृतशोधपत्रिकास्वन्यतमात्वेन इयं निबन्धमाला विश्वविद्यालयानुदानायोगेन स्वीकृता वर्तत इति अस्याः पत्रिकायाः वैशिष्ट्यम्। सेयं नैकशास्त्रकुसुमनिबन्धानां माला मधुलिहां शास्त्रजिज्ञासूनां मनःप्रसादयित्री भूयादित्याशासे।

सत्यामपि व्यस्ततायां सम्पादकमण्डल्या यथासमयं कार्यमेतत् सफलीकृतमिति नितरां मोमुदीति मे चेतः। महतोऽस्य कार्यस्य सफलताप्राप्तौ नितरां परिश्रान्तवद्भ्यः सर्वेभ्यः मदीयाः हृत्पूर्विकाः शुभकामनाः ज्ञापयामि।

इत्थं विद्वद्विधेयः

के.बी. सुब्बरायुडु

प्रो. के.बी. सुब्बरायुडुः

कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

Ph. No.: (O) 011-28523949, EPABX : 28524993, 28521994, 28524995,
EMAIL : kbsubbarayudu@gmail.com / vc@csu.co.in, WEBSITE : www.sanskrit.nic.in

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
शिक्षा मन्त्रालय, भारत सरकार के अधीन
56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058

Prof. S. Subrahmanya Sarma
REGISTRAR
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110058

## शुभसन्देशः

कविप्रतिभाविभासितं साहित्यं लोकव्यवहारं सन्दिशत् यथा शिवेतरं निवारयति तथैव त्रितापसंतप्तस्य जनस्य मानसवल्लीमपि प्रमोदाम्बुना निषिञ्चति। यद्यपि सर्वहृदयद्रावकं वचो नैव सुलभं तथापि पुण्यपरिपाकेन प्रसन्नगम्भीरपदा सरस्वती शात्रवं स्वान्तमपि प्रसादयति। यथा भारविः आह –

**विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।**
**प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा हि सरस्वती।।**

प्रसन्नगम्भीरपदां सरस्वतीं प्रति समाकृष्टुं पत्रिकाप्रकाशनस्य काचित् परम्परा प्रचकास्ति। एषा परम्परा विदुषां यथा प्रातिभवैभवं विभावयति तथैव स्वाध्यायमार्गं सुदृढयति।

महतः प्रमोदस्य विषयो यत् केन्द्रीयसंस्कृतविश्वविद्यालस्य गुरुवायूर्-परिसरेण प्रतिहायनमिव ऐषमोऽपि प्राध्यापकानां शोधनिबन्धैः पूर्णा **"निबन्धमाला"** इत्याख्या वार्षिकी शोधपत्रिका प्राकाश्यं नीयत इति। विद्यायाः प्रसारणे बद्धश्रद्धस्य गुरुवायूर्-परिसरस्य निर्देशकवर्यस्य मार्गदर्शने निबन्धमालेयं शास्त्रोद्यानेषु विहरतामध्यापकानां करकमलाभ्यां गुम्फिता समलङ्करोतु विद्वत्तल्लजहृदयम् इत्याशासे तथा शुभकामनाभिः सर्वान् वर्धापयामि।

**विद्वद्विधेयः**

प्रो. एस् .सुब्रह्मण्यशर्मा

Ph. No.: (O) 011-28520979, EPABX : 28524993, 28521994, 28524995,
EMAIL : sanskrit.registrar@gmail.com / ps2reg.csu@gmail.com WEBSITE : www.sanskrit.nic.in

 ISSN - 2277-2359

# सम्पादकीयम्

आनन्दितोऽस्मीदं निवेदयितुं यत्प्रतिहायनमिवैषमो निबन्धमालेति कृतनाम्नी परिसरीयशोधपत्रिका प्रकाश्यत इति। तत्र नानाशास्त्रवारान्निधिपारावारीणानां निबन्धा वरीवर्तिषत इत्यानन्दमयं मे मनस्समजनि। नैकशास्त्रज्ञानेन विद्वत्ता भवेदपि त्वनेकशास्त्रज्ञता तदर्थमर्हति। विशेषतो विद्वज्जनवदनारविन्दाच्छ्रूयते 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति। तत्र कणादेन मुनिना कृतं काणादं यद्यपि वैशेषिकं तथापि तस्य समानतन्त्रं न्यायशास्त्रमिति काणादेन न्यायशास्त्रस्य परिग्रहो विहितः॥

व्याकरणमेवाध्येतव्येषु मुख्यं यतो हि साधुपदावगतिः व्याकरणादेव सिध्यति। असाधुपदप्रयोगादधर्मस्तेन पापं ततो दुःखमिति क्रमः। मुनेः पतञ्जलेर्महाभाष्यस्य पस्पशाह्निक एवं प्रतिपादितं यथा 'प्रधानं च षट्स्वङ्गेषु व्याकरणम्' इति। अपि च विश्वनाथकविराजेन दर्पणे श्रुतिरुद्धृता, यथा 'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति' इति। न्यायशास्त्रं प्राचीननवीनाभ्यां द्विधा विभक्तन्तत्र नवीनमेव सर्वशास्त्रोपकारकत्वेन विद्वांसो मन्यन्ते। तत्रेदं कारणं यद् विषयान् परिष्कारं परिष्कारं सिद्धान्तस्थापनं तत्र विशेषः। वस्तुतस्तु शास्त्राणि परस्परपूरकाणीति स्वीयशास्त्रे पर्याप्तमितरेषु सामान्यं ज्ञानमावश्यकं शास्त्रविद्वत्तालाभाय। इयं निबन्धमालैतत्सर्वं मनसिकृत्य परिसरीयविद्वदाचार्यैर्विनिर्मितेति विशेषतो वक्तव्यमतस्तेभ्यः प्रथमं साधुवादान् वितनोमि॥

अस्माकं प्रार्थनामुररीकृत्य यथासमयमाशंसया सुगन्धितेयं निबन्धमालेति केन्द्रीयसंस्कृतविश्वविद्यालयकुलपतिभ्यः आचार्येभ्यः के.

बी. सुब्बरायुडुवर्येभ्यः केन्द्रीयसंस्कृतविश्वविद्यालयकुलसचिवेभ्यः आचार्येभ्यः एस्. सुब्रह्मण्यशर्मवर्येभ्यश्च प्रप्रथमं हार्दं कार्तज्ञ्यं निवेदयामि। तदन्वेतस्यै पत्रिकायै विद्वन्माननयोग्यानि लेखनानि प्रदत्तवद्भ्यस्सर्वेभ्यः कृतज्ञता विधीयते। अथास्याः सम्पादकमण्डलाचार्येभ्यः शोधप्रकाशन-समितेरध्यक्षायाचार्याय के. के. हर्षकुमाराय, मालोचितमुखचित्रनिर्मात्रे डा. ई. आर्. नारायणाय, पुटसज्जीकर्त्र्यै शोधच्छात्रायै श्रीमत्यै अश्विनी-गङ्गाधरदेशपाण्डेनाम्न्यै चासीमाशिषो वितीर्य निर्दिष्टसमय एव मुद्रणं विधाय प्रदत्तवते कैरळीमुद्रणालयाधिकारिणे कार्तज्ञ्यं विनिवेद्य विरमामि विस्तरात्॥

पुरनाट्टुकरा इत्थं

२०-११-२०२१ विद्वत्तल्लजविधेयः

आचार्यः ई. एम्. राजन्

# ॥अनुक्रमणिका॥


**1.** जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका – आचार्यः ई.एम्. राजन् **1**

**2.** दृष्टिग्राहकं ज्ञानेन्द्रियं तस्य निर्माणक्रमः–आचार्यरामचन्द्रुलबालाजी **6**

**3.** Role of Librarian for Education, Research and Training in globalised futuristics cenario of Learning resource centre-Prof. K. K. Harshakumar, Dr. Rautmale Anand S, Librarian. **16**

**4.** प्रतीयमानार्थचिन्तनम् - डॉ. रामचन्द्रः जोयिस हेच्, **25**

**5.** नारायणीयकाव्ये लक्ष्ये वस्त्वलङ्काररसानुमितिलक्षणानि – डॉ. नारायणन् ई. आर्. **33**

**6.** പാത്തുമ്മയുടെആട്, കഥയും ജീവിതവും. - ശ്രീമതി. കെ.എ). ജെസ്സി **43**

**7.** पाणिनीयव्याकरणप्रत्ययार्थपरिचयः – डॉ. विजयलक्ष्मी राधाकृष्णन् **49**

**8.** शिक्षणोपक्रमे कालिदासीयदिग्दर्शकप्रस्तुतयः – डॉ. डि वेणुगोपालरावः **60**

**9.** राष्ट्रियशिक्षानीतिषु समावेशी शिक्षा – डॉ. विद्याधरः प्रभल **72**

**10.** मन्त्रविधिः – डॉ. श्यामराज सी. **80**

**11.** सप्तद्वीपा वसुन्धरा – डॉ. विजयानन्दः अडिगः बि. **86**

**12.** कलांशाः – डॉ. श्रीनिवासन् पि.के. **94**

**13.** समानाधिकरण-व्यधिकरणतत्पुरुषः बहुव्रीहिश्च – डॉ. किरण खींची **99**

**14.** Role of mood making hormones towards stress management – Rajendra Kumar Sharma **108**

**15.** Human-Computer Interaction – Manichitra P.S. **111**

**16.** रीतिकालीन कवि बिहारी का काव्य सौंदर्य – डॉ. रम्या पि. आर्. **117**

**17.** Knowledge presentation using FOL in Artificial Intelligence – Nisha Vinod **122**

**18.** परिभाषेन्दुशेखरपरिभास्करयोः स्थिता “व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति” परिभाषा – श्री सुब्रह्मण्यभट्टः **129**

**19.** शास्त्रदिशा कर्मयोगसमीक्षा – धनेशः पि. वि. **133**

**20.** पुरुषार्थचतुष्टये धर्मस्वरूपविचारः – डॉ. ओ. वि. शिबु **137**

**21.** संस्कृतस्य मातृभाषिपरम्परा शिक्षणं च – ललित मोहन पन्तोला **141**

**22.** वैयाकरणमते शक्तिविचारः – डॉ. श्रीहरि वर्मा के. एम्. **148**

| | | |
|---|---|---|
| **23.** | आदिकाव्ये काव्यप्रयोजनसङ्गतिः – डॉ. उमा सि. एन्. | **156** |
| **24.** | तैत्तिरीय-छान्दोग्यसृष्टिवाक्यानां तुलनात्मकमध्ययनम् – वीणा चन्द्रन् | **167** |
| **25.** | कृष्णलीलाशुकस्य स्तोत्रकाव्येषु दुर्गास्तुतिः – अश्विनी गंगाधर देशपांडे | **171** |
| **26.** | भवनाटके काव्ये गुरोः शिशवे उपदेशः – प्रियंका | **179** |

 ISSN - 2277-2359

# ॥ जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका॥

**आचार्यः ई. एम्. राजन्**
**केन्द्रियसंस्कृतविश्वविद्यालयः**
**गुरुवायूर्-परिसरः, तृश्शूर, केरलम्।**

नव्यन्यायपथं गन्तृषु गणनीयौ जगदीशाचार्यः गदाधराचार्यश्च। तत्राचार्येणाद्येन शब्दशक्तिप्रकाशिकातर्कामृताख्यौ द्वितीयेन व्युत्पत्ति-वादशक्तिवादाख्यौ ग्रन्थौच व्यलेखिषत। ग्रन्थरत्नचतुष्टयी शब्दप्रमाणमवलम्ब्य रचिता। जगदीशगदाधराभ्यां दीधितेरुपरि व्याख्यानानि कृतानि, तत्राद्यस्य जागदीशीति द्वितीयस्य गादाधरीति च नाम। तत्र जागदीशी औत्तराहप्रिया गादाधरी दाक्षिणात्यप्रियेति प्रथा जागर्ति। अत्र शब्दशक्तिप्रकाशिकाया वैशिष्टयं प्रस्तूयते येन शीर्षकमन्वर्थं भवेदिति मे मतिः। अपि च दण्डराजशास्त्री स्वीये प्रकाशिकाया उपोद्घाते लिखति यथा **"जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका इति"**॥[1]

## ❖ जगदीशाचार्यः

मैथिलवंशीयो जगदीशाचार्यः। अपि च चैतन्यमहाप्रभोः श्वश्रुराणां सनातनमिश्राणाम् आत्मजस्य प्रपौत्रः। एतस्य पितुर्नाम यादवचन्द्र-विद्यावागीश इति। आचार्यस्य पित्रा दत्तं नाम किमिति न जानीमस्तथापि जगदीश इति नाम्नि ऐतिह्यं श्रूयते। तद्यथा बाल्यावस्थायां नवद्वीपस्थापितनिकषसूचकापभ्रष्ट 'जगा जगा' इति नामधारिणा-ऽऽचार्येणाचिरादेव विद्याव्यसनितयोत्कर्षसूचकं प्रेम्णा सादरभाषितं 'जगु जगु' इति नाम प्रपेदे। कदाचिद्गुरुणा शास्त्रचर्चां कुर्वतां शिष्याणां मध्यादेकस्योच्चैस्तरं स्वरमाकर्ण्य पत्नी पृष्टा – 'कस्यायमतिगभीरश्शब्द इति '। पत्नी-प्रत्यवादीत् 'पूर्वं नवद्वीपे जगा इति – अधुना तु जगु इत्याहूयते तस्यायं स्वर' इति। झटिति गुरुमुखाद्वाग्सुधा प्रावहत् यथा –

**"अहो जगा जगुःपश्चात् जगाजगुरतः परम्।**
**अधुना ज्ञानसम्पत्या जगदीशायते जगा"**॥ इति

जगदीशाचार्यस्य गुर्वन्तरमस्ति – यस्य नाम श्रीसार्वभौमः। तथा च श्रूयते –

---

[1]**उपोद्घातः – पृ.सं. ६।**

**“श्रीसार्वभौमस्य गुरोः पदाब्जं विद्यार्थिनां कल्पतरोः प्रणम्य।**
**विनिर्मितः श्रीजगदीशसंज्ञैर्विद्योततामाद्यमणेर्मयूखः”॥**

जगदीशाचार्यः १६३५ तमकृस्त्वब्दे आसीदिति विदुषां मतम्।

(आधमर्ण्यं ढुण्ढिराजशास्त्रिणि प्रकाशिकोपोद्धात कर्तरि )

### ❖ शब्दशक्तिप्रकाशिका

**“तर्कं तन्त्रञ्चविदुषा”**इत्यादिवस्तुनिर्देशात्मकेन मङ्गलेन ग्रन्थ आरब्धः। यत्र तन्त्रशब्दः कातन्त्रव्याकरणपर * इति ग्रन्थे कातन्त्रव्याकरणस्य प्रभावो बहुत्रावलोक्यते यथा –

तदुक्तं वृत्तौ – **“ग्रन्थारम्भे विघ्नविघातायेत्यादि”।**[1]

द्वितीयेन पद्येन सरस्वतीवस्तुनिर्देशात्मकं मङ्गलं दृश्यते यथा –

**“अनुभवहेतुस्सकले सद्यस्समुपासिता मनुजे। साकांक्षाऽऽसन्ना च**
**स्वार्थे योग्या सरस्वती देवी”॥**[2]

इतः परं जगदीशाचार्यः विषयं प्रविशति। प्रायेण विषयाः कारिकाभिः प्रतिपाद्यन्त इतीतरग्रन्थापेक्षया महद्वैशिष्ट्यमस्यग्रन्थस्य। तर्कालङ्कार-भट्टाचार्यः किलायम्। शब्दस्य शक्तिं प्रकाशयतीति शब्दशक्तिप्रकाशिका। शक्तिश्च लक्षणाया अप्युपलक्षणम् – तदुक्तं मुक्तावल्यां **“वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्ध इति”।**[3]

आदौ महता प्रबन्धेन शब्दस्यातिरिक्तं प्रामाण्यं व्यवस्थापितं – वैशेषिकखण्डनपुरस्सरम्। वैशेषिका आहुः –

**“शब्दोपमानयोर्नैव पृथग्प्रामाण्यमिष्यते अनुमानगतार्थत्वादिति**
**वैशेषिकं मतम्”॥**[4]

निरर्थकशब्दं न प्रयुञ्जीतेति न्यायात् – सार्थकमेव प्रयुञ्जते विद्वांस इति सार्थकं शब्दं त्रिधा विभजते यथा –

---

[1]**श.श.प्र.पृ.सं. – २।**
[2]**श.श.प्र.पृ.सं. – 2।**
[3]**न्या.सि.मु. – शब्दखण्ड, पृ.सं. – २९३।**
[4]**सर्वदर्शनसङ्ग्रहः**

**"शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।**

**प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा"॥**[1]

ततः परं प्रकृत्यादीनां यथोद्दिष्टं लक्षणपरीक्षे विहिते। अथावसरेण वाक्यलक्षणं प्रतिपाद्य प्रसङ्गात् बहुविषयांश्चप्रतिपाद्य वाक्यभेदानाह –

**"सुबन्तञ्च तिङ्न्तञ्च सुबन्तैकसमन्वितम्।**

**सुप्तिङन्तद्वयगर्भं वाक्यमेवञ्चतुर्विधम्"॥**[2]

मध्ये प्रसङ्गात् प्रातिपदिकापरनाम्नः

नाम्नः चातुर्विध्यमाह यथा –

**"रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्।**

**तच्चतुर्धा परै रूढयौगिकं मन्यतेऽधिकम्"॥**[3]इति

अथ महता प्रबन्धेन रूढादीनां बहुपूर्वपक्षनिराकरणेन विचारो विहितः। तत्रालङ्कारिकाणां व्यञ्जनावृत्तिः आलङ्कारिकैर्निर्दिष्टान्युदाहरणानि उद्धृत्य दूषिता। तत्र योगरूढप्रतिपादिकारिका यथा –

**"स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृन्मिथः योगरूढम्"** [4]इति।

अत्र स्वशब्दः योगरूढनामशब्दः पङ्कजेत्यत्र स्वान्तर्निविष्टाः शब्दाः पङ्क-जनि-डाःतेषामर्थाः पङ्कजनिकर्तृत्वरूपाः, स्वार्थं पद्ममिति – **"पङ्कजनिकर्तृपद्ममिति बोधः"।**

समासः पञ्चधा विभक्तः तत्र कारिका यथा –

**"पूर्व-मध्याऽन्त्य-सर्वाऽन्यपदप्राधान्यतः प्राच्यैः पञ्चविधः प्रोक्तः"॥**[5]

क्वचित् मणिकाराभिमतं मतमपि दूषयति – तत्पुरुषलक्षणाविचारे – समासवाक्यविग्रहवाक्यार्थयोः समानार्थकतां संरक्षितुं षष्ठीतत्पुरुषादौ राजसंबन्धादौ लक्षणां स्वीकृत्य निपातातिरिक्तेति नियमे – तत्पुरुषोऽपि योजनीय इत्याह।

---

[1]**श.श.प्र.पृ.सं.-६।**

[2]**श.श.प्र.पृ.सं.- ६४।**

[3]**श.श.प्र.पृ.सं.- ७।**

[4]**श.श.प्र.पृ.सं.- २६।**

[5]**श.श.प्र.पृ.सं.- ३३।**

ग्रन्थगौरवादन्यत्र क्षेपः मया न क्रियते। बहुव्रीहेः तद्गुणसंविज्ञानातद्गुणसंविज्ञानाभ्यां द्वैविध्यं सोदाहरणं निरूपितम्॥

अथ प्रकृत्यन्तर्भूतं धातुं लक्षयति यथा –

**“यो यस्वार्थस्योत्तरस्थस्तृजर्थे बोधनक्षमः।**

**स तादृशार्थकश्शब्दो धातुस्त्रिविध ईरितः”॥**[1]

अथ विस्तरेण कारकप्रकरणमारभ्यते। तत्रेदं कारकलक्षणं यथा – **“धात्वर्थांशेप्रकारोयः सुबर्थः सोऽत्र कारकम्”॥**[2]

तत्र षण्णां अपादानादिकारकाणां सलक्षणं सोदाहरणं निरूपणमस्ति। अथ लडादिलकारतद्धितप्रकरणे च वर्त्तेते। एवन्नानाविधविषयकुसुमैर्गुम्फितेयं शब्दशक्तिप्रकाशिका।

प्रकाशिकाया उपरि व्याख्याद्वयं वर्तते – कृष्णकान्ती, यस्याः कर्ता श्रीकृष्णकान्तवागीशः। एषाऽऽख्यातप्रकरणपर्यन्तस्य भागस्य वर्त्तते। अन्ते एषः लिखति – **“तद्धितस्य न्यायसंवलितार्थकत्वेन विचारविधुरतया अतिसूक्ष्मतया च तट्टीकाकरणे मदीय-प्रवृत्तिर्नोत्पन्नेति”।**[3]द्वितीया रामभद्रस्य शब्दशक्ति-प्रकाशिकाप्रबोधिनी, या बहुव्रीहिसमासपर्यन्ता संक्षिप्तरूपा वर्तते॥

## ❖ उपसंहारः

नव्यन्यायग्रन्थेषु अनोपमोऽयं रचनावैशिष्ट्यात्प्रथमगणनीय इति वक्तव्यम्। तत्र तत्र पुराणादिवाक्यानि योजितानि यथा –

**“स्वाराज्यकामोऽग्निष्टोमेन यजेत”**[4]इति

श्रुतिमुद्धृत्य स्वःपदशक्तिः कुत्रेति प्रतिपादिता। यथा –

**“यन्न दुःखेन संमिन्नं न च ग्रस्तमनन्तरम्।**

**अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्”॥**[1]

---

[1]**श.श.प्र.पृ.सं.- ५६।**

[2]**श.श.प्र.पृ.सं.- ५७।**

[3]**श.श.प्र.पृ.सं.-४५।**

[4]**श.श.प्र.पृ.सं.- ११०।**

यथा – जहत्स्वार्थलक्षणाप्रसङ्गे,

**“जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।**

**पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिरः”॥**[2]इति

तदाद्युत्तरपदः कर्मधारयोऽपि क्वचिदस्ति यथा –**“पक्वयद्भोजनं रम्यमामतद्भोजनं वृथा”**[3]

क्वचिच्छास्त्रान्तरोक्तं दूषयति यथा –**“यस्मिन् राशिगते सूर्ये”**[4]अत्र यस्मिन् राशौ गते सूर्ये इतिपाठस्साधीयान्।

तदादिशब्दानां परामर्शकत्वे आह –

नहि प्रजावतीयं मे त्वं तस्मै देहि कम्बलम्।**“नीलो मणिर्गुणस्सोऽत्र”**[5]

भट्टिकाव्याद्यथा –

तृणाय मत्वा रघुनन्दनोऽयं बाणेन रक्षः। **“प्रधनान्निरास्थत्”**[6] –

ममायमाभिप्रायः यच्छास्त्रितृतीयवर्षीयाणां व्याकरणछात्राणां कृतेऽयं ग्रन्थः पाठ्यविषयश्चेत् तेषां व्युत्पत्तिवादे उपकाराय कल्पेतेति॥

---

[1]श.श.प्र.पृ.सं.- ११०।
[2]श.श.प्र.पृ.सं.- १८१।
[3]श.श.प्र.पृ.सं.-२०८।
[4]श.श.प्र.पृ.सं.-२१६।
[5]श.श.प्र.पृ.सं.-२३४।
[6]श.श.प्र.पृ.सं.-३७५।

 ISSN - 2277-2359

# ॥ दृष्टिग्राहकं ज्ञानेन्द्रियं तस्य निर्माणक्रमः॥

**आचार्यरामचन्द्रुल बालाजी,**
केन्द्रीयसंस्कृतविश्वविद्यालयः,
गुरुवायूर् परिसरः, त्रिश्शूर्, केरलम्।

## ज्ञानेन्द्रियाणां स्वरूपम् :-

मानव्यवहारपरिशीलनशास्त्रं मनोविज्ञानशास्त्रम्। अतः मानवव्यवहारपरिशीलनाय व्यवहारकारणीभूतविविधशारीरिकनिर्माण-विषयकज्ञानं मुख्यतया ज्ञातव्यं भवति। व्यक्तौ एतानि शारीरिकनिर्माणानि तस्य व्यवहारनियन्त्रणद्वारा प्रभावोत्पादकानि भवन्ति। अतः एतेषां परिशीलनं व्यक्तेः व्यवहारं समग्रेन ज्ञातुमुपयोगकरं भवति। नाम सर्वे मनोवैज्ञानिकाः अवश्यं शरीरनिर्माणवेत्तारो वा (Anatomists) शरीरधर्मशास्त्रवेत्तारो वा (Physiologists) भवितव्याः इति नास्ति नियमः। परन्तु विविधशरीरनिर्माणानि कथं वर्तन्ते, व्यक्तेः प्रवर्तनायाः उपरि कथं प्रभावोत्पादकानि भवन्तीति विषयकपरिज्ञानं मनोवैज्ञानिकानाम-त्यन्तावश्यकमेव॥

तत्र उदाहरणाय 'कार्' (car) इत्यादि वाहनचालनाय तद्वाहनस्थ सर्वेषां चालनप्रयोजकविविधयन्त्रभागानां ज्ञानं पर्याप्तंभवति। किन्तु याने यः कोऽपि भागः भग्नो भवति चेत् तदा यान यन्त्राङ्गनिपुणानां (Mechanic) साहाय्यमावश्यकं भवति। एवमेव व्यक्तेः शरीराङ्गेषु यत्रापि लोपः भवति चेत् तेन लोपेन व्यक्तिः कथं प्रभावितः भवतीति ज्ञातुमेव शरीरनिर्माणविषयकज्ञानमुपयुज्यते मनोवैज्ञानिकानां, परं न उपचर्यादिकं(Treatment) कर्तुम्॥

अस्मिन् मनोविज्ञाने अध्ययनम्(Learning) प्रेरणम् (Stimulus) संवेगः (Emotion) प्रत्यक्षम् (Perception) इत्यादि-मुख्यांशानाम्, एवं ज्ञानेन्द्रियप्रक्रियाणामाधारीभूतविविधशारीरिक-निर्माणानां परिशीलनमावश्यकम्। तादृश शारीरिकनिर्माणानि त्रिविधानि भवन्ति।तानि क्रमशः-

१. ज्ञानेन्द्रियाणि (Sense organs)
२. प्रभावोत्पादकावयवाः (Effecter organs)

३. नाडीव्यवस्था(Nervous system)

अत्र ज्ञानेन्द्रियाणि प्रत्यक्षविषये मूलकानि भवन्ति। विना एतेषां ज्ञानेन्द्रियाणां ज्ञानं प्रत्यक्षप्रक्रिया नावगम्यते। अतः तेषां ज्ञानेन्द्रियाणामध्ययनं, विवरणं चात्र संक्षेपेण क्रियते॥

व्यक्तिः स्वपरिसरविद्यमानान् विविधप्रेरकान् **(Stimulus)**संगृह्य तदनुगुणप्रतिस्पन्दनाय (**Response)** ज्ञानेन्द्रियाण्युपयुक्तानि भवन्ति। ज्ञानेन्द्रियाणि बाह्योद्दीपनानि ग्राह्यन्ति। अतः एतानीन्द्रियाणि ग्राहकाणि **(Receptors)** इत्यपि कथयन्ति। तेषां ग्राहकशक्त्यनुसारम् इन्द्रियाणि अष्टग्राहकानि इति वक्तुं शक्यते॥

१. दृष्टिग्राहकम् (Visual Receptor)
२. श्रवणग्राहकम् (Auditory Receptor)
३. आघ्राणग्राहकम्(Olfactory Receptor)
४. रसनग्राहकम् (Taste Receptor)
५. चर्मसम्बन्धग्राहकाणि (Cutomeous Sense Receptor)
६. स्तब्धज्ञानग्राहकम् (Static Sense Receptor)
७. गतिसंवेदनीयग्राहकम् (Kinesthetic Sense Receptor)
८. आङ्गीकज्ञानग्राहकम्(Organic Sense Receptor)

ज्ञानेन्द्रियविभागविषयेकश्चन मतभेदो दृश्यते। अस्मिन् प्रबन्धे ज्ञानेन्द्रियेषु प्रधानभूतं दृष्टिग्राहकं नयनेन्द्रियमुद्दिश्य विवरणं क्रियते॥

## दृष्टिग्राहकं ज्ञानेन्द्रियं तस्यनिर्माणक्रमः:-

नेत्रेणैव किल अस्माकं दृग्ज्ञानं भवति। अतः व्यक्तेः व्यवहारस्योपरि नेत्रस्य प्रभावः अधिकतया भवति। नेत्रस्य निर्माणपरिशीलने सति नेत्रस्य केमेरा साकं(Camera) सादृश्यमस्तीति ज्ञायते। दृष्टिपटलस्थानां (Retina) ज्ञाननाडीनामन्तिमभागः केमेरामध्ये प्रतिबिम्बप्रक्षेपणफटलवत् (Film) कार्यं कुर्वन्ति। नेत्रं गोलाकारेण वर्तते। नेत्रस्य पुरोभागे श्वेतपटलम् (Sclerotic coat), स्फटिककटकं (Crystalline lens) इति कटकद्वयं विद्यते। एते कटके नेत्रस्योपरि प्रसारितकान्तिकिरणान् वक्रीभवनं कृत्वा दृष्टिपटलस्योपरि केन्द्ररूपेण स्थापयतः।

 ISSN - 2277-2359

केमेरामध्ये तु एतत् केन्द्रीकरणं वस्तुनः दूरानुगुणम् अथवा समीपानुगुणं वा परिवर्तनीयं भवति। परं नेत्रे एतादृशपरिणामः स्वायत्तरूपेण (Automatic) सीलियरी (seliary muscle) पेशीनां साहाय्येन भवति। पेशयः अवसरानुगुणं दूरस्थं वा, समीपस्थं वा वस्तुप्रत्यक्षीकरणानुगुण्यतां कल्पयन्ति। नेत्रस्य बहिर्भागः एकश्वेत दृढकवचेनाच्छादितः भवति। अस्यैव शुक्लपटलम् (Sclerotic coat) इति नाम। शुक्लपटलं दृढतरं सत् नेत्रमुपघातेभ्यो रक्षति। इदमेव प्रथमं बाह्यमावरणम्। अस्य विदारणे नेत्रसंरक्षणमति श्रमसाध्यम्। इदमेव पटलं अक्ष्णः पुरोभागे पारदर्शकः (Transparent) सन् स्वच्छमण्डलमिति नाम प्राप्नोति। अनन्तरं शुक्लपटलस्याधोभागे शुक्ल-दृष्टिपटलयोर्मध्ये मध्यपटलम् अथवा रञ्जितपटलम् इत्यन्यत् वर्तते। अस्मिन् अतिसूक्ष्मरक्तनाड्यः भवन्ति। अस्यान्तस्तरः कृष्णवर्णो बभ्रुवर्णो वा स्यात्। अत एवास्य रञ्जितपटलमिति नाम। नेत्रे केवलं पारदर्शकं शुक्लपटलं (Transparent cornea) स्थितप्रदेशं त्यक्त्वा सर्वमपि नेत्रं शुक्लपटलम्, एवं रञ्जितपटलैः व्यापकं भवति। शुक्लपटलस्याधोभागे परितारा वर्तते। इयं परितारा पूर्वनिर्दिष्टेन रञ्जितपटलेन सम्बद्धा वर्तते। पेशीकृत कृशयवनिका सदृशी इयं मध्ये सच्छिद्रा च विद्यते। अस्य द्वारस्य नाम कनीनिका अथवा तारा इति। इयं परितारा तनुपटसदृशी भूत्वा तारायाः आकृतिं नियमयति। अन्तः प्रविशितः प्रकाशस्य नियन्त्रणमनया क्रियते। परितारागभागे विद्यमानशुक्लपटलं पृष्ठभागे विद्यमानस्फटिककटकं च मिलित्वा कान्तिकिरणान् दृष्टिपटले केन्द्रीकरणद्वारा वस्तुनः प्रतिबिम्बं दृष्टिपटलस्योपरि पातयन्ति। वस्तुनः अभावेऽपि कटकद्वयं मानवः कान्तिम्, अन्धकारञ्च जानाति। परं वस्तुनः आकारान् प्रत्यक्षीकरणाय कटकयोः आवश्यकं भवति॥

कटकयोः पुरतः पृष्ठतः च नेत्रं सर्वं एकेन पारदर्शकपाक्षिकद्रव (Semifluid) सदृशपदार्थेन पूरितं भवति। कटकयोः पुरतः विद्यमानभागं नेत्ररसः इति, पृष्ठतः विद्यमानभागं काचरसः इति च कथयन्ति। अयं काचरसः अक्षिगोलकस्य पञ्चसु भागेषु भागचतुष्टयं पूरयति। इदं द्रवद्रव्यं काचखण्डं स्वाकारं

सम्यक् अविकृतं रक्षितुमुपकरोति। षट्पेशी रज्जवः अपि परितो वर्तन्ते। एताः नेत्रगोलकस्य चलने उपकुर्वन्ति। रज्वोः नाम ऋजुपेशी इति।।

नेत्रमध्ये प्रविष्टान् कान्तिकिरणान् नियन्त्रयितुं नेत्रबिम्बं परितः अत्यल्पाः पेशयः(Muscles) भवन्ति। एताः केमेरामध्यस्थविभाजक-पटल (Aperture diaphragm) सदृशाः भवन्ति। अन्धकारे परितारायाः व्याकोचः एवम् अत्यधिककान्तौ तस्याः सङ्कोचादिरूपचर्यायाः कारणं एताः पेशयः भवन्ति। श्वेतरञ्जितपटलयोः अनन्तरं तृतीयमावरणं दृष्टिपटलं (Retina) अतिमृदु, संवेदनशीलञ्च। अस्य स्थौल्यं एकस्य इञ्च् (Inch) इत्यस्याशीतिधा विभक्तेषु भागेषु एकस्य यावत् स्यात् तावत् 1/80 भवति।।

यद्यपि संवेदनशीलत्वं कृत्स्नस्यापि दृष्टिपटलस्य स्यात्, अथापि अत्र पीतबिन्दुरिति (Yellow Spot) कश्चन भागो विशिष्यसंवेदनशीलो वर्तते, अयं भागः ईषत् निम्नः पीतवर्णश्च। अत एव पीतबिन्दुरिति प्रथा। दृष्टिपटलात् कृत्स्नादपि अनेकसंख्याकाः तन्त्रिकाः (Nerves) समुदिताः अक्षिगोलस्य पश्चाद्भागे वर्तन्ते। आसां सामान्यं नाम दृष्टितन्त्रिकाः (Optic Nerve) इति। इयं मस्तिष्कस्य पश्चाद्भागे अनुषक्ता वर्तते।दृष्टिपटले कान्त्या सह प्रतिचर्यां कर्तुं सूक्ष्मग्राहककणाः भवन्ति। एतान् आकारानुगुणं द्वैविध्येन वक्तुं शक्यते।।

१. शङ्कुकणाः (Cone cells)

२. शलाककणाः (Rod cells)

शङ्कुकणाः वस्तूनामाकारम् एवं वस्तुवर्णं च प्रत्यक्षीकरणाय उपयोगिनः भवन्ति। दृष्टिपटलस्य केन्द्रभागे शङ्कुकणाः अधिकतया भवन्ति। ततः दृष्टिपटलान्तिमभागं प्रति गमने सति शलाककणानां संख्या अधिका भवति। दृष्टिपटलस्योपरितले (Peripheryofretina) एवं पीतबिन्दौ (yellow spot) अपि शङ्कुकणाः मात्रमेव भवन्ति। दृष्टिपटलस्योपरि साक्षात् नेत्रबिम्बस्य (Eyeball) पृष्ठभागे विद्यमानःभाग एव पीतबिन्दुः इति कथ्यते। अस्य व्यासः एक मिलिमीटर् भवति। अस्मिन् भागे स्पष्टदृष्टिः सूक्ष्मग्राह्यता च भवति। कान्तिग्राहकाणि (Light receptors) नेत्रपटले सर्वत्र विस्तारितान्यपि पीतबिन्दुप्रदेशे अधिकतया (गाढतया) भवन्ति। अत एव वयं

नेत्रस्य सम्यक् पुरतः विद्यमानस्य वस्तुनः वर्णम् आकारं च स्पष्टतया पश्यामः। दृष्टिपटलान्तिमभागेषु (Edges) शलाककणाः अधिकतया भवन्ति। शलाकाः वर्णदृष्टेः (Colour vision) कृते न योग्याः। परं कान्तिं छायां च ज्ञातुमेव शलाकाः उपयुक्ताः भवन्ति। शलाकाः सम्यक् कार्यकरणाय वैटमिन् ए (Vitamin A) साहाय्यं करोति। शङ्कुकणापेक्षया शलाककणाः अल्पकान्त्या सह (Dim light) आनुगुण्यतां सम्यक् प्राप्नुवन्ति। अत एव सान्ध्यदृष्टौ (Twilight vision) वर्णानां प्रत्यक्षं समीचीनतया न भवति॥

**अन्धबिन्दुः (Blind Spot) -**अयं बिन्दुः नासिकासमीपस्थदृष्टिपटलभागे **12-15$^0$** मध्ये भवति। अस्य प्रदेशस्य कान्तिविषयक सूक्ष्मग्राह्यता न भवति। अतः अस्य अन्धबिन्दुः इति नाम। अयमस्तीति अस्माभिः ज्ञातुं न शक्यते। कुतः इत्युक्तौ एकस्य वस्तुनः प्रतिबिम्बम् एकस्मिन् नेत्रे अन्धबिन्दौ पतितोऽपि अपरनेत्रे विद्यमान अन्धबिन्दोरुपरि न पतति। अतः अस्माभिः वस्तुप्रत्यक्षं कर्तुं शक्यते इत्यतः॥

**वर्णदृष्टिः (Color Vision) -**शङ्कुकणाः विविधपरिमाणकान्ति-किरणानां कृते विभिन्नरूपेण प्रतिस्पन्दन्ति। अतः वर्णदृष्टिः केवलं शङ्कुकणानाम् उपरि एवाधारीभूता भवति। सामान्यतया मानवस्य आपाततः 390ml तः 760 ml वताः कान्तिकिरणाः वर्णपरिज्ञानं कल्पयन्ति। वर्णपट्टिकायां विद्यमानानां सर्वेषां वर्णानां कान्तिकिरणसदृशपरिमाणमेव भवति। 760 ml तः अधिकदैर्घ्यरूपेण विद्यमानकान्तिकिरणानां निम्नरक्त इति (Infra-red) 390 ml तः अल्पकान्तिकिरणानाम् अतिनीलमिति (Ultra violet) च कथयन्ति॥

**वर्णवैषम्यम् -**एकं कपिलवर्णपत्रं यदि पीतवर्णस्य समीपे स्थाप्यते तदा कपिलवर्णं नीलवर्णमिव प्रत्यक्षं भवति। एवं तथैव तदेव पत्रं नीलवर्णस्य समीपे स्थाप्यते चेत् तत् पीतवर्णमिव प्रत्यक्षं भवति। एवं निजवर्णस्थाने तस्य परिपूरकवर्णानां (Complementary colors) प्रत्यक्षीकरणं वर्णवैषम्यमिति कथ्यते। वर्णवैषम्यं द्विविधं भवति। यथा-

१. एककालिकवर्णवैषम्यम् (Simultaneous Color Contrast)
२. परम्परितवर्णवैषम्यम् (Successive Color Contrast)

**एककालिकवर्णवैषम्यम् अथवा समकालीनवर्णविरोधः-**
युगपदनुभवस्य कृते आगतानां वर्णानां मध्ये एककालिकवर्णवैषम्यं भवति। अस्यां प्रक्रियायां परिपूरकाणि (Complements) एकस्य कृते अन्यत्प्रेरकम् (Enhance) भवति। अतः उपर्युक्तकारणात् नीलनेपथ्यक्षेत्रे (Background) यदि पीतवर्णं पश्यामः पीतवर्णमधिकतया, एवं नीले नीलवर्णमधिकतया च गोचरी भवति। इमामेव प्रक्रियाम् एककालिकवर्णवैषम्यमिति कथयन्ति॥

**परम्परितवर्णवैषम्यम् (उत्तरोत्तरवर्णविधिः)** -कञ्चित्कालम् एकस्य वर्णस्य दर्शनानन्तरं यदि एकं तटस्थं नेपथ्यक्षेत्रं (Neutral background) पश्यामः चेत् तदा प्रथमदर्शितवर्णपरिपूरकमेव गोचरं भवति। उदाहरणाय- पीतवर्णस्य पत्रस्योपरि एकाग्रतया दृष्टिकेन्द्रीकरणेन कञ्चित् कालानन्तरं तस्य पत्रस्य चरमभागः नीलवर्णत्वेन भान्ति। अनन्तरं श्वेतपत्रस्योपरि यदि दृष्टिः स्थाप्यते नीलवर्णप्रत्यक्षं भवति। एतादृशवर्णवैषम्यप्रत्यक्षमेव व्यतिरेकानन्तरप्रतिबिम्बं (Negative after image) इत्यपि च कथयन्ति॥

**अनन्तरप्रतिबिम्बनानि (After Images)** -एकाग्रतया एकस्य वर्णस्य दर्शनानन्तरं नेत्रोन्मीलनेन तस्यैव वर्णस्य वा तस्य परिपूरकस्य वा दर्शनं भवति। एतदेवानन्तरप्रतिबिम्बनमिति कथ्यते। अनन्तरप्रतिबिम्बनानि द्विविधानि भवन्ति॥

१. व्यतिरेकानन्तरप्रतिबिम्बनम् एतत् परम्परितवर्णवैषम्यस्थले उक्तमस्ति (Negative after image)
२. अनुकूलानन्तरप्रतिबिम्बनम् (Positive after image)

तदा तदा एकाग्रतया एकस्य वर्णस्य दर्शनान्तरं नेत्रोन्मीलने सति वर्णपरिपूरकं विना तस्यैव वर्णप्रतिबिम्बनस्यैव प्रत्यक्षं भवति। एतदेवानुकूलानन्तरप्रतिबिम्बनम्। उदाहरणाय- एकाग्रतया विद्युद्दीप-दर्शनानन्तरं श्वेतपत्रेण तस्य दीपस्य पिधानकरणे सत्यपि कञ्चित्कालं दीपं ज्वलतीत्येव भवति॥

**वर्णान्धता(Colour Blindness)** - शङ्कुकणाः एव वर्णप्रत्यक्षे प्रमुखस्थानं वहन्ति। अतः तादृशशङ्कुकणानां विकासे यदि लोपः भवति तस्य लोपस्य तीव्रतानुसारं व्यक्तिषु वर्णान्धतायाः सम्प्राप्तिः भवति। वर्णान्धता द्विविधा भवति-

१. पाक्षिकवर्णान्धता (Partial Colour Blindness)

२. सम्पूर्णवर्णान्धता (All Colour Blindness)

1. पाक्षिकवर्णान्धता- एनामेव द्विवर्णदृष्टिः (Di-chromatic Vision) इत्यपि वदन्ति। अस्य लोपस्य कारणात् व्यक्तिः वर्णद्वयमेव प्रत्यक्षीकरोति। तत्प्रत्यक्षं वर्णपरिपूरकसम्बन्धि भवति। द्वयोः वर्णयोः मिश्रणेन कपिलवर्णप्राप्यमानाः वर्णाः वर्णपरिपूरकाः इति कथयन्ति। उदाहरणाय नीलवर्णस्य पीतवर्णं रक्तवर्णस्य हरितवर्णं च परिपूरकाः भवन्ति। साधारणतया द्विवर्णदृष्टिव्यक्तयः त्रिविधाः भवन्ति -

a. डायपर् नोफ् (Deuteranopes)

b. प्रोटनोफ् (Protanopes)

c. ट्रैटनोफ् (Tritanopes)

उपर्युक्तेषु प्रथमद्वितीयवर्गव्यक्तयः नीलपीतवर्णान् एव प्रत्यक्षीकर्तुं शक्नुवन्ति। परं रक्तहरितवर्णान् प्रत्यक्षीकर्तुम् अशक्ताः एते। अयं लोपः प्रधानतया आनुवंशिकतया (Hereditary) संक्रमतीति शास्त्रज्ञानाम् अभिप्रायः॥

ट्रैटनोप् वर्गीयास्तु रक्तहरितवर्णान् एव ज्ञातुं शक्नुवन्ति। परं नीलपीतवर्णान् न ग्राह्यन्ति। नाम एते नीलपीतवर्णान्धाः (Blue-Yellow Blind)। अयं लोपः नेत्रसम्बन्धव्याधिकारणेन संक्रमतीति ज्ञायते॥

2. सम्पूर्णवर्णान्धता (All Colour Blindness) - एते नील-श्वेत-कपिलभिन्नवर्णान् मात्रमेव प्रत्यक्षीकुर्वन्ति। अयमपि लोपः आनुवंशिकता (Hereditary) द्वारा संक्रमतीति ज्ञायते। स्थितिरियं अधिकतया व्यक्तिषु न गोचरीभवति। उपर्युक्तवर्णातिरिक्ततया केषाञ्चन मानवानां नेत्रस्यैकस्यैव वर्णान्धत्वं, द्वितीयनेत्रस्य साधारणवर्णदृष्टिः च भवति। एतादृशेभ्यः मानवेभ्यः एव वर्णान्धत्वं निरूपितम्। एकैव वर्णः नेत्रद्वयेनापि सदृशेर्न प्रत्यक्षीकरणाभावात्, तस्य कारणान्वेषणे वर्णान्धता सिद्धा। साधारणतया वर्णान्धता आनुवंशिकतया संक्रमति। एतत् लिङ्गसम्बद्धं (Sex linked) लक्षणम्। वर्णान्धता एकान्तर्गतजन्युद्वारा सम्भवतीति, एवं स्त्रीणामपेक्षया पुरुषाणामेवाधिकतया सम्भवतीति च ज्ञायते।

वर्णान्धाः केवलवर्णच्छाया (Hue) मात्रस्यैवान्धाः। परम् उज्वलवर्णादिषु (Brightness) लक्षणेषु तेषामन्धत्वं न भवति। अत एव साधारणतया वर्णान्धाः अयं लोपः तेषामस्तीति ज्ञातुमस्माभिः अनवगमनरीत्या भवन्ति॥

**निशानुकूलनम् (Dark Adaptation)** -मानवनेत्रस्य परिसरकान्त्यनुगुणम् आनुगुण्यतासम्पादनशक्तिः भवति। अन्धकारप्रकोष्टं प्रति प्रवेशानन्तरं व्यक्तेः कृते किञ्चित् समयपर्यन्तं प्रत्यक्षीकरण-सामर्थ्याभावेऽपि अनन्तरम् अन्धकारानुकूलतां प्राप्य परिसरान् प्रत्यक्षीकरोति। एवम् अल्पकान्त्यामपि प्रत्यक्षीकरणनेत्रा-नुकूलप्रक्रियां निशानुकूलनम् इति वदन्ति। अन्धकारे परितारायाः (Iris) व्याकोचेन बाह्यपरिवेशात् अधिककान्तिः दृष्टिपटलं प्रति गच्छतीत्यतः व्यक्तिः अनुकूलतां प्राप्नोति। एवमन्धकारे नेत्रं सत्वरेणानुकूलताप्राप्तये वैटमिन् 'ए' (Vitamin A) प्रेरकं करोति। अतः शरीरे वैटमिन् ए क्षीणाति चेत् तदा निशानुकूलनं सत्वरं न भवति॥

एवं नेत्रम् अन्धकारानुगुण्यतां प्राप्ते सति प्रथमतः तस्य रक्तपीतवर्णानां सूक्ष्मग्राह्यता नष्टा भवति। अनन्तरं नीलहरितवर्णानां सूक्ष्मग्राह्यताम् अधिकतया प्राप्य इतरवर्णानां सूक्ष्मग्राह्यतां त्यजति। एतदेव 'पर्किंजिप्रभावः'(Purkinjie Effect) इति, अमुं विषयमधिकृत्य परिशोधित-आस्ट्रेलिया शोधकनाम्ना व्यवह्रियते॥

**कान्त्यनुकूलनम् (Light Adaptation)** -अन्धकारे बहुकालपर्यन्तं स्थित्वा कान्तिमतः प्रदेशस्यागमने सति तां कान्तिं नेत्रं न सम्यक् प्रत्यक्षं करोति। कुतः इत्युक्तौ तावत्पर्यन्तम् अन्धकारस्थितकारणात्तस्य अन्धकारस्य कृते अनुकूलताप्राप्तये शलाककणाः अत्युद्दीपिताः भवन्ति। अतः एतेषां शलाकानाम् अन्धकारानुकूलसूक्ष्मग्राह्यतां न्यूनतां प्राप्य शङ्कुकणानां सूक्ष्मग्राह्यताभिवृद्धिपर्यन्तं नेत्रं तावच्छीघ्रकान्त्यानुगुण्यतां प्राप्तुं न शक्नोति। नेत्रम् अन्धकारानुगुण्यापेक्षया कान्त्यानुगुण्यतां शीघ्रं प्राप्नोति॥

**दूरदृष्टिः (Long Sight)** -वार्धक्येन अन्येन वा केनापि कारणेन किरणसङ्कलनशक्तिः काचखण्डस्य **(Lens)** नष्टा भवति। सङ्कलिताः अपि

 ISSN - 2277-2359

किरणाः दृष्टिपटलस्य पश्चात्भागे पतेयुः। इयमवस्था अक्षिगोलस्योचितदैर्घ्याभावेऽपि जायते। दूरवर्तीपदार्थानामेव दर्शनं भवत्यत्र। अत एव पत्रादिकं दूरतो निधाय पठन्ति वृद्धाः। अस्याः दशायाः नाम दूरदृष्टिः इति। अत्र उत्तलकाचखण्डनं धार्यम्। धृतेन उत्तलखण्डेन किरणाः ईषत्संकलिताः चक्षुषिस्थितं काचखण्डं प्राप्नुवन्ति। तेनापि पुनः संकलिताः उचिते स्थाने पतन्ति। दर्शनं च जायते॥

**निकटदृष्टिः (Short Sight)** -केषाञ्चित् नराणां काचखण्डस्य किरणसंकलनशक्तिः अधिका भवति। गोलस्य केषाञ्चित् दीर्घाकारतां भजते। तस्मात्संकलिताः किरणाः पीतबिन्दुस्थाने न पतेयुः। ततः पूर्वमेव क्वचित् समवेताः भवेयुः। अस्यां दशायां निकटवर्तीनामेव दर्शनं स्यात्। अत एव अस्याः अवस्थायाः नाम निकटदृष्टिः इति। एतद्दोषपरिहाराय पुटाकारकाचखण्डधारणं (Concave Lens) कार्यम्। अनेन किरणाः अपसारिणो भूत्वा पश्चात् यथा स्थानं संकलिताः भवन्ति॥

**दृष्टितीक्ष्णता (Visual Acuity)** -स्पष्टा सुनुशितादृष्टिः दृष्टितीक्ष्णता नाम्ना कथ्यते। परितारायाः कार्यकरणप्रतिभाम् (Efficiency) अनुसृत्य एवं नाडीव्यवस्थायाः समैक्यतामुद्धिश्य च दृष्टितीक्ष्णता निर्णीयते। एनां पुनः द्वैविध्येन निर्वचितुं शक्यते।

१. एकस्मात् निर्णीतदूरात् दर्शनयोग्यमत्यल्पवस्तु।

२. द्वे रेखे रेखाद्वयमिति प्रत्यक्षीकर्णायावश्यकदूरम्।

एकं निर्णीतपरिमाणपदार्थं निर्णीतदूरात् स्पष्टतया प्रत्यक्षीकरणमेव दृष्टितीक्ष्णता इत्युच्यते। दृष्टितीक्ष्णतां मापनपद्धतिः प्रथमतः स्नेल्लेन्चार्ट् (Snellen Chart) मध्यस्थ अक्षरपठनद्वारा सम्प्राप्ता। प्रयोज्यस्य मीटर् (Metre) दूरे एतत् पटं स्थाप्य प्रयोज्यं पटे स्थिताक्षराणि पठितुमादिशन्ति। प्रयोज्यः यदि स्पष्टेन पठति तदानीं तस्य दृष्टितीक्ष्णता 6/6 इति निर्णीयते। परिवेशे विद्यमानपदार्थदर्शनाय, एवं उद्दीपनानां ग्रहणाय च दृष्टितीक्ष्णता उपकरोति। मानवः उद्दीपनानि सम्यक् प्रत्यक्षीय तदनुगुणं यदि प्रतिस्पन्दति तदैव तस्य प्रवर्तना साधारणतया सहजतया च भवति॥

एतावत्पर्यन्तमस्माभिः व्यक्तेः नित्यजीवने वर्णदृष्टिः कान्त्यन्धकारयोः अनुकूलताप्राप्तिः, गभीर (Depth) प्रत्यक्षीकरणसामर्थ्यं चावश्यकमिति ज्ञातम्। एवं व्यक्तेः नेत्रनिर्माणं विविधबाह्यपरिवेशान् द्रष्टुं कथं समुचितरूपेणास्तीति ज्ञातम्। प्रायेण एतादृशानां प्रक्रियाणाम् आधारेणैव व्यक्तेः व्यवहारः भवति। अतः व्यक्तेः व्यवहारावगाहनाय दृष्टिग्राहकनाडी कथं व्यक्तेः व्यवहारं प्रभावितं करोतीति परिज्ञानमत्यावश्यकं वर्तते॥

## उपयुक्तग्रन्थसूची:-


1) मनोविज्ञानशास्त्रमुमधुसूदनरेड्डिTeluguAcademy,Hyderabad.
2) अभिनवमनोविज्ञानम्अग्निहोत्री वाराणासि: १९६५।
3) आधुनिकसामान्यमनोविज्ञानमुप्रीतिवर्मा,श्रीवत्सा,विनोदपुस्तकमन्दिर्, आग्रा-1984.
4) प्राचीन भारतीय मनोविद्या, दिनेश चन्द्रशास्त्री, कलकत्ता-1958.
5) मनोविज्ञानमीमांसा, आचार्य विश्वेश्वरः, आत्माराव् सन्स्, दिल्ली- 1959.
6) सामान्यमनोविज्ञान्, एस्.एस्.माधुरी, विनोदपुस्तकमन्दिर्, अगरा-1985.
7) Colour Blindness Marry Collinis, Keganpaul Trench, Trubner Eeo LTD, Newyork – 1925.
8) Know your Body, A Reader digest R.D Print & Publishers PVT LTD, Bombay.
9) Theories of Perceptions and Concept of Structure Folyd H.Allport Champmans Hall Limited, London.

 ISSN - 2277-2359

# ROLE OF LIBRARIAN FOR EDUCATION, RESEARCH AND TRAINNING IN GLOBALISED FUTURISTIC SCENARIO OF LEARNING RESOURCE CENTRE

**Prof. K. K. Harshakumar**
**pappuharshan@gmail.com**

**Dr. Rautmale Anand S, Librarian,**
librarian.sansthan@gmail.com

## I. INTRODUCTION

The greatest challenge of society in the future is keeping pace with the knowledge and technological expertise which is necessary for finding, applying and evaluating information. The information explosion has changed the nature of our society because it has made information and knowledge production and management the predominant industry of the latter two decades. The digital revolution in libraries has begun.

In the digital age librarians can no longer be simply information providers or keeper of knowledge. The changes in technology using electronically stored and retrieval information has changed the way patrons and students are able to access, retrieve and use information. Digital information is changing the role of librarians from a person, who users ask for assistance in finding information is called a Library or learning resource Centre to someone who needs to provide services and instructions regardless of place, time or format.

A librarian is information professional who must be able to actively participate in the educational process rather than gathering information and disseminating I to the public through workshops, orientation, training etc. They must ensure that there is an effective and efficient flow of information from the generators to users of information in the digital environment. An

information professional must be able to address the changing and challenging environment for libraries on information systems and service in the digital age with, an emphasis on examining contemporary problems, advances and solutions.

**II. Purpose of a Digital Librarian**

A move to electronic barriers will alter the fundamental role of librarians. Less attention will be paid to acquisition, cataloguing and circulation and much more to systems, online assistance, navigation assistance and conversion issues. Unless graduate programs, for digital librarians are established to create trained personnel, the real risk exists for the users, particularly young adults who grew up in a digital generation and one which will outstrip the ability of librarians to assist them. Moreover, library users are expecting to retrieve authentic and valuable information. Digital librarians should have the capacity to select in as reliability, version control, archiving, authenticity, review and citations. The purpose to the digital librarian is to provide coherent organization and convenient access to typically a large amount of digital information.

**III. Professional Skills required for a Digital Librarian**

Librarians require hybrid skills as they are expected to perform the following:

(a) Evaluating information needs of users.

(b) Negotiating contracts with information providers, for which, they should be knowledgeable about licensing and other legal arrangement for being able to access digital resources as well as their implementation.

(c) Acquiring information resources.

(d) Organizing content of information resources.

(e) Developing new information products and services to serve the users.

(f) Developing, distributing and maintaining variety of useful information on the intranet.

 ISSN - 2277-2359

(g) Training users in the use of information resources, products and services including internet and intranet.

All such jobs require that the library professional should possess a wider set of skill competencies.

**IV. Technical Skills**

According to Tenet (1999), the key skills required in the environments are:

(1) Imaging technologies, the means of capturing images form physical objects.
(2) OCR, the means of converting image text in to machine readable text.
(3) Mark up languages the means of adding metadata or structuring digital contents.
(4) Cataloguing and meta beta identifying the resources for future access.
(5) Indexing and database technology, building search systems or support in finding aids.
(6) User interface design "the creative function of enhancing user instruction with data".
(7) Programming the basic understanding of programming techniques and some languages.
(8) Web technology being well versed in aspect of the primary delivery medium of digital libraries. This will enable the information professional to create web accessible document and/ or contents.

In addition to the above information professionals should have trouble shooting capabilities to take care of day-to-day hassles concerning, hardware, and software.

**V. Special Skills for Librarians to Face Challenges in Building a Digital Library**

Although technology presents the librarian with ethnical challenges, the librarian is ready for the role of information professional in the connected world. Information professional

 ISSN - 2277-2359

have, out of necessity, acquired skills that can contribute to the access Duberman describes their new roles through four skills which according to him information professional already possesses.

They know about changes, problems and opportunities which the new technologies and new content provide. They are learning new things [they have] registration skills (they possess) deep knowledge information systems that databases (that) really enables them, to turn questions inside, out and look beyond the obvious.

Libraries have frequently been adaptors of new technology and liberalisms continue to be at the forefront in learning and teaching new technologies. Librarians have to see the internet and electronic information as tools that are used to provide information.

Crow Ford writes that the librarian must "recognize that technology offers tools, and that those tools interact in complex ways and finally tools are not ends in them". As librarians claim to be professionals, they must also claim responsibilities that accompany professionalism, particularly with respect to trust. Librarians are accountable for the information they provide.

A librarian's ethical duty is to apply, the highest level of service to library patrons, no matter what the format of information. A "Good library is defined by the principles of librarianship, and the mission of the specific library and the persons and services that make the mission reality". Technology will continue to change and libraries and librarians will use the changing technology to provide best access and service to their patrons.

The remarkable growth of internet has made significant revolution in all the areas of science and technology. Rather than using it a as tool for searching and retrieving information, internet has become the king of all media by which we can

access digital information and can create a digital library to provide timely, quality service to users.

**VI. Role of Libraries and Librarian in the Digital World**

The mandate of today's libraries is in sharp contrast to that of publishers. They must facilitate the open distribution of knowledge. Librarians strive to enable the free flow of information. Their traditions are liberal, found on the belief that libraries should serve democracy. To help fulfill their mission and resource centers for citizens, public libraries maintain collection of records, policy statement, government documents soon. A recent promotional video from the American Librarians Association exalts that "the library is democracy's place of worship".

Librarians, the traditional gate keepers of knowledge, are in danger of being bypassed, their skills ignored, and their advice unsought. Search engines send users straight to the information they require or users think without any need for an intermediary to classify, catalogue, and cross reference advice on source.

The ready availability of information on the internet and its widespread opportunity is not a threat. Savvy users realize, they need help, for which librarians can provide information that is to their satisfaction. A good example is info mine, a cooperative project of the university of California and California State University. Info mine contains descriptions and links to a wealth of scholarly and educational internet resources, each of which has been, selected and described by a professional academic librarian who is a specialist in the subject and in resource description generally. Similarly, information professionals play a vital role in order to access and retrieve information. Librarian should be a specialist in the subject as well as resources.

Librarians have to see this as an important expenditure of effort for their uses natural evolution of their traditional task of collecting and organizing information in print. They have to

 ISSN - 2277-2359

clearly analyze what kind of technical infrastructure is needed to support and promote this kind of work. Open-source software is a powerful ally for a librarian who wishes to extend his competency range. Liberal traditional information to view, modify and adopt the very volume of the licensing arguments that present the software for being appropriate key proprietary vendors. But the open-source movement is more than just a vehicle for librarians to use its link with library traditions and one which goes much deeper.

It is so clear that the librarian must recognize and respect the individual patron's motivation in searching for a particular kind of knowledge to change the present attitude that librarians must change their philosophical orientation by expanding the purely pragmatic preoccupation with the process of acquiring and disseminating information. To do this they need a much better understanding of individual patrons, motivation in using available information and they also need to develop a world view point that integrates a variety of different individual interpretations of reality.

Librarians have idealistic aims but then so do most professions. Our aim is to facilitate access to education and knowledge by collecting and making their collection available to those who need them whoever and wherever they may be.

We preserve collection as a part of a nation's heritage. We spread the knowledge of our collection and share our resources both nationally and internationally. We have learned skills in searching and retrieving information from internal and external sources and can greatly assist in the learning process. We turn information into knowledge which can be used for personal education, research and commercial purpose. Our role is therefore to help users to identify, obtain and use the information they need. We are part of the flow of information. In the information society, however, if this system is not to break down resulting in a loss to society, this vital role needs to be

recognized and used by governments when formulating copyright laws. Technology is available to improve library service but more often than not depending on a nation's own set of laws.

**VII. Future of the Digital Library and Librarian**

The drawing of the digital age is having an effect on our local library and on libraries around the world, as well. There are millions of computers in America, many of them in libraries, yet these institutions and others still employ more than 2,00,000 people calling themselves "librarians" according to the bureau of labor statistics. That's about twice the number as in 1957 when desk set was released. It seems unlikely that any mechanical or electronic brain will mean the end of the librarians any time soon. But the libraries charmingly in desk set is bringing radical change to the whole notion of the library with vast implications for their prior availability and durability of knowledge. The dawn of the digital age in fact offers opportunities as well as challenges for libraries and their users, unlike any seen since the random-access knowledge modules known as "books" supplanted scrolls.

What libraries may be like in the future is important not just for librarians and authors but for anyone who cares about access to knowledge and information. To the extent that the informed citizens sustain a free society, democracy of tomorrow itself might be said to rest at least partly in the edifice of the library. But it is not clear what the library of tomorrow will involve. Digital technology raises questions about the very nature of the library, about what it is, for whom it functions what should be in it and whether it is a place or an idea.

Andrew Carnegie understood how well libraries could function as a launching part of social mobility. Librarians of this digital era are in a position to change their role as arbitrary information scientist/gate keepers of knowledge and to meet challenges of the Internet, worldwide web, on-line access and the

 ISSN - 2277-2359

concept of digital libraries. So,they must enrich their knowledge with special skills browse, access and retrieve a particular access of the global networks and build digital library through which they can provide quality digital information service to users.

**VIII. The Immensity of Librarians in Science and Technological Development**

During the present century there has been an exponential increase in the volume of recorded knowledge and a revolution in the control and transfer of information by means of modern electronic technologies like computers, telecommunication etc.

Nowadays librarians have equipped themselves with the skills of handling new technologies like usage of computers for storage and retrieval of information and in the use of telecommunication network like INFLIBNET, NICNET, DELNET, and ERNET etc. which offer existing possibilities to improve information services.

Computers and telecommunications improved news means of communications and storage such as electronic mail, electronic journal, Video Tex, Teleflex, Facsimile service (Fax) etc. and the mass storage mediums like CD ROM, Microfilm, Micro Card, Microfiche etc.

**IX. Conclusion**

To conclude, the role, skill and information resources of digital librarian can be summed up appropriately with the following quotation: "The vision of a librarian is that of a leader, fighter, expert, partner, model and professional. In order to achieve the vision, we must reposition librarianship as the information profession in society by enhancing society perception of librarians, with each librarian also taking responsibility for his or her own self-image and professional definition, acting as a professional with a mission instead of an employer with a job. Library employment must recognize the responsibility for investing in their personnel at all times."

**References**

**1.** 10. Raj Kumar Buyya., et.al. **(2009).** Cloud computing and emerging IT platforms: Vision, hype, and reality for delivering computing as the 5th utility. 25(6), 599- 616.

**2.** 11. Rupesh Sanchati., & Gaurav kulkarni. (2011). Cloud Computing in Digital and University Libraries, Global Journal of Computer Science and Technology, 11(12).

**3.** 12. Xuemei Yin. **(2009).** From Cloud Computing to Personal Digital Archives.

**4.** Alvin, Waif A. **(2001).** Jammu & Kashmir. In. Library and Information Services in Indian States and Union Territories edited by P.B. Mangla, et.al. New Delhi: Shipra.

**5.** Aswal R S. Library automation for 21st Century.

**6.** Kaliammal A, Thamara selvi G. Role of ICTS in Library and information science.

**7.** Kapoor S K D. Handbook of staff development in Libraries.

**8.** Patil U. Changing role of modern librarians.

**9.** Sing S P and Prof. Krishnan Kumar. Special libraries in the electronic environment.

**10.** Sinha K. Access to information Technology in modern libraries.

**11.** Sinha K. Changing role of digital librarian.

Central Sanskrit University, Ministry of Education, GOI.
Guruvayoor Campus Library, Thrissur (Kerala)

# ॥प्रतीयमानार्थचिन्तनम्॥

**डॉ. रामचन्द्रः जोयिस हेच्,**
साहित्यविभागः,गुरुवायूर् परिसरः।

श्रीमदानन्दवर्धनाचार्यः ध्वन्यालोके ध्वनितत्त्वं प्रतिपादयति।किं नाम ध्वनिकाव्यमित्यपि तेन तत्रैव प्रतिपादितम्। शब्दार्थयुगलभूतात् काव्यात् सर्वप्राधान्येन विद्यमानं व्यङ्गयमर्थं प्रत्यायति तदेव ध्वनिः। तादृशे काव्ये ध्वनिरिति व्यपदेशस्तु व्यञ्जकत्वहेतुना एव।यः व्यङ्गयमर्थं समुद्भावयति सा एव शक्तिः व्यञ्जनाव्यापारः इत्युच्यते। व्यङ्ग्यार्थप्रत्यायनं च व्यञ्जनाव्यापारसापेक्षम्। अस्य वाच्यलक्ष्यादि वैलक्षण्यं वरीवर्तीति हेतोः व्यञ्जनाव्यापारस्यापि अभिधाव्यापार-वैलक्षण्यं साधितं ध्वन्यालोककारेण। प्रकृतेस्मिन् प्रतीयमानस्य अर्थस्य कथं वा अगाधता वैशाल्यं च काव्यशास्त्रेषु निहितमिति प्रतिपादनाय यत्नो विधीयते॥

वाक्यप्रयोक्तुः प्रतिभायां सत्यामेव भावोपि आस्वादपदवीमधिरोहति।श्रूयते च ऋङ्मन्त्रः-

**“सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**
**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि”॥**[1]

इति ।एवं सखिभावमापन्नाः जनाः सख्यानि जानते , तेषां वाक्षु लक्ष्मीः निहिता।यथा - परिपवनकर्मणा यवादिषु चूर्णान् दूरीकुर्मः , योग्यानि धान्यानि चिनुमः, तद्वत् शब्दानां सुचयनं विना विशिष्टस्यार्थस्य सम्भवो नास्ति। सुनिचितानि पदानि प्रयुक्तानि विशिष्टमर्थम् आविर्भावयन्ति। सख्यभावसहिताः महाकवयः मनोनिवेशपूर्वकं वर्णितेषु विषयेषु पदेन वाक्येन वा हृद्गतं भावम् आविर्भावयन्ति। उक्तं च ध्वन्यालोके -

**“सोर्थः तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**

---

[1]ऋग्वेदः।

**यत्नत: प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवे:"॥** [1]

इत्यादिना।कविहृदयसंवादभावयुक्ताय सखिभावसहितायजनाय एवप्रतीयमानस्यार्थस्य बोधो भवति। अत्र एतदर्थसमान : ऋङ्मन्त्र:अत्र यथा -

**"उतत्व: पश्यन् न ददर्श वाचमुत त्व: शृण्वन् न शृणोत्येनाम्।**
**उतो तस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा:"॥** [2]

इति।सहृदयेभ्य: एव प्रतिभानवत: कवे: काव्येषु भासमान: व्यङ्ग्यार्थ: गोचरो भवति इत्यादि स्वसिद्धान्तं प्रतिपादयन् आनन्दवर्धन: सिद्धान्तयति -

**"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु" ॥**[3]

इति॥

**"शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।**
**वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्"॥**

इति ग्रन्थभाग: "सखाय:सख्यानि जानते" इति ऋङ्मन्त्रस्यैव अनुवाद: इति डॉ. मुकुन्दमाधवशर्मणां मतम् [4]॥

**"योर्थ:सहृदयश्लाघ्य: काव्यात्मेति व्यवस्थित:।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥**[5]

इति।अनेन सहृदयश्लाघ्यत्वे सतिवाच्यप्रतीयमानान्यतरार्थविषयक-बोधजनकत्वे सति शब्दत्वम् इति काव्यसामान्यलक्षणम् इति वक्तव्यम् इति उक्तं भवति।वृत्तौ तु – "काव्यस्य हि ललितोचितसन्निवेश -चारुण: शरीरस्येव साररूपतया स्थित: सहृदयश्लाघ्य: योर्थ: तस्य वाच्य - प्रतीयमानश्चेति द्वौ भेदौ"[6]इत्युक्तम्। तत्र

[1]प्रथमोद्योत कारिका 9।

[2]ऋग्वेद:।

[3]प्रथमोद्योते ध्वन्यालोके।

[4]व्यञ्जनाव्यापारसमीक्षा चौखम्बा मुद्रिता।

[5]प्रथमोद्योते, कारिका 20।

[6]प्रथमोद्योते, तृतीयकारिकात: परम्।

वाच्यरूप: काव्यार्थ: द्विविध: – वस्तु, अलङ्कार इति च। एतयो: उदाहरणं क्रमशो यथा -

**“असम्भवं मण्डनमङ्गयष्टे: अनासवाख्यं करणं मदस्य।**
**कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साथ वय: प्रपेदे”॥[1]**

अत्र पार्वत्या:कौमारभावरूपं वस्तु वर्णितम्।

**“सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।**
**सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्ष्येव”॥[2]**

ब्रह्मणा पार्वत्या: निर्माणे एकत्र सौन्दर्यदिदृक्षा इति हेतु: युक्तो न भवति। अत: अहेतुरयम्।तस्या: निर्माणे एकत्र सौन्दर्यदिदृक्षा एव कारणमिति वर्णनात् हेतूत्प्रेक्षा इत्याख्य: अलङ्काररूप: काव्यार्थ:। उपर्युक्तयो: भेदयो: वाच्यस्य चमत्कारिता। अत: कारणेन सहृदय-श्लाघ्यत्वम्।प्रतीयमान: काव्यार्थ: पुन: त्रिविधतां प्रतिपद्यते -वस्तु-अलङ्कार-रस इति। तत्र वस्तुरूपस्य उदाहरणं यथा -

**“राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम्।**
**बाले वारय पान्थस्य वासदानविधानत:”॥[3]**

इति। पद्येस्मिन् राजा मत्प्रतिकूल:। तस्मात् मम प्राणोपघातकं भयम्। निवासस्थानस्य विधानत: तं भयं निवारय इति आपातत: वाच्योर्थ: प्रतीयते। परमत्र नृपति - चन्द्र इति उभयार्थशक्तेन राजशब्देन - मम प्रतिकूल: राजा , (चन्द्र:) अत: वियोगिन: ममैव उद्वेजकता, अत: क्लेशप्रदात् चन्द्रात् उपस्थितं पान्थस्य मम प्राणपीडारूपं भयं निवासस्थानस्य विधानेन दूरीकुरु इति वर्णितम्।अथवा - चिरकालं कान्ताविरहकातरतया परमोत्कण्ठितं माम् अयमुदीयमान: चन्द्र: नितराम् उद्वेजयति। अत: उपभोगं देहि इति व्यङ्ग्योर्थ:। इदं शब्दशक्तिमूल-ध्वनेरुदाहरणम्।अत्र अलङ्कारध्वनि: नास्तीति रसगङ्गाधरकार:। यत: उपमा रूपकं वा वक्तु: तात्पर्यविषयो नास्ति। यत्र उपमा अथवा रूपकं भवति तत्र द्वयो:

[1]कुमारसम्भवमहाकाव्ये।
[2]कुमारसम्भवे।
[3]रसगङ्गाधरे संलक्ष्यध्वनिनिरूपणावसरे।

उपमानोपमेयभाव:एकस्मिन्नेव क्षणे भवति। राज्ञो मत्प्रतिकूलादिति अस्मिन् पद्ये नृपरूपस्यार्थस्य प्रतीति: पश्चात् भवतीति हेतो: अलङ्कारध्वनिसम्भावना न शङ्क्या।अलङ्कारध्वनेरुदाहरणं तु -

**"करतलनिर्गलदविरलदानजलोल्लासितावनीवलय:।**

**धनदाग्रमहितमूर्ति: जयतितरां सार्वभोमोयम्"॥**[1]

पद्येस्मिन् कवि: कमपि राजानं स्तौति। दीनान् उद्दिश्य यदा दानार्थम् उद्युक्तो भवति तदा दत्तस्य वस्तुन: उपरि पतितं दानजलं सर्वत्र व्याप्तं सत् लोक: तुष्टो अभवत्।राज्ञ: सर्वोत्कृष्टता अस्तीति प्रतिपादनं वाच्योर्थ:।प्रतीयमानार्थस्तुसार्वभौमइत्याख्य:अयं गज:अविरलंमदजलप्रवाह-सहित इति हेतो: कुबेरस्य पुरस्तात् प्रशंसितोस्ति सर्वोत्कृष्ट इति। कवे: उपमालङ्कारव्यञ्जनेन विवक्षा अस्तीति अलङ्कारध्वनिरत्र। सार्वभौमपदम् अनेकार्थकम्।पदश्रवणमात्रेण अनेके अर्था: उपस्थिता भवन्ति।वक्तु: कस्मिन्नर्थे तात्पर्यं इति सन्देहे जाते प्रकरणमत्र प्रकृतस्यार्थस्य बोधं जनयति। ततः कर-दान-धनद इति शब्दसमवधानेन स्मृतिविषयस्य दिग्गजरूपस्य द्वितीयार्थस्य शाब्दबोधो भवति। तत: परं सम्राडयं दिग्गजसदृश इति उपमालङ्कार: व्यज्यते॥ काव्यरूपशब्दसन्दर्भ: एव शरीरम्।शरीरे यथा आत्मा तथा काव्यस्य सारभूत: अर्थ: एव प्रतीयमान: इति मन्तव्यम्। स च वाच्यालङ्कारवर्ग: उपमादिभि : प्रकारै: प्रसिद्ध:, बहुधा व्याकृत: काव्यलक्षणकारै: भट्टोद्भटादिभि: इत्यत: तद्व्याख्यानं नेह प्रतन्यते इत्यवोचत् आनन्दवर्धन:।[2] प्रतीयमानोप्यर्थ: प्राचीनै: आलङ्कारिकै: परामृष्ट: एव।कथं वा तेषां व्याख्यानेषु तदुपलभ्यते, आचार्यानन्दवर्धनेन कथं वा अयम् अंश: विस्तार्य प्रतिपादित इति शोधलेखनस्यास्य विषय:।

भामहस्य काव्यालङ्कारे [3] एवं समुत्पश्याम: -

1. **"समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।**

---

[1]रसगङ्गाधरे संलक्ष्यध्वनिनिरूपणावसरे।

[2]ध्वन्यालोके।

[3]काव्यालङ्कारे।

**यथेवानभिधानेपि गुणसाम्यप्रतीतित:"॥**

अत्र अन्यस्यार्थस्य वाच्यव्यतिरिक्तत्वम् इति अनेन नोक्तमित्येव दोष:। तथैव -

2. समासोक्तिलक्षणसन्दर्भेपि -

**"यत्रोक्ते गम्यतेन्योर्थो तत्समानविशेषण:।**

**सा समासोक्तिरुद्दिष्टा सङ्क्षिप्तार्थतया यथा"॥**

इति कथने गम्यमान:अन्योर्थ: इत्यनेन प्रतीयमानमेव वस्तुरिति प्रोक्तवान् इति मन्तव्यम्॥

3. अत्र, तल्लक्षणं यथा - पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।इति।अत्र अन्येन प्रकारेण अभिधानं नाम वस्तुत: अभिधाशक्त्या अर्थस्य प्रतिपादनम् एव। शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव: इति न्यायानुरोधात् यत्र अभिधाशक्ति: न प्रवर्तते तत्र अन्यस्यार्थस्य बोधनं भवतीत्यत: तस्य प्रतीयमानता वक्तव्या॥

4 . अपह्नुतिरिति अलङ्कारे उपमया: सादृश्यान्तर्गतत्वम् इति विशेषणमेकं दत्तम्।अत्र सादृश्यस्य वाच्यादन्यत्वम् नाम प्रतीयमानं वस्तु एव।

5. अतिशयोक्तिरेव वक्रोक्तिरिति भामहमतम्यथा -

**"सैषा सर्वत्र वक्रोक्तिरनयार्थौ विभाव्यते।**[1]

**यत्नोस्यां कविना कार्य: कोलङ्कारोनया विना"॥**

इत्येवमादिषु व्यङ्ग्यालङ्कारान्तरस्पर्शो नाम प्रतीयमानता तस्य तस्यार्थस्य इत्यर्थ:।दण्डी तु उदारतागुणनिरूपणावसरे[2] - यस्मिन्नुक्ते उत्कर्षवान् गुण: कश्चित् प्रतीयते इति लक्षणं सोदाहरणं कथयन् अर्थस्य प्रतीयमानताम् अङ्गीकरोति।उपमाप्रकरणेपि - यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते इत्यत्र प्रतीति: वाच्यातिरिक्तवस्तुरूपेण उपलब्धिरिति मन्तव्यम् इति आलङ्कारिकसिद्धान्त:। विश्वनाथकविराजस्तु " साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयो:"[3] इति सादृश्यं निरूपयन् सादृश्यस्य वाच्यत्वं स्पष्टयति। मम्मटस्तु भेदे

---

[1]भामहकाव्यालङ्कारे।

[2]काव्यादर्शे।

[3]साहित्यदर्पणे।

सति साधर्म्यम् [1] इति उपमालक्षणं न्यबध्नात्। इत्थं सादृश्य-साधर्म्ययो: भिन्नपदार्थत्वमिति विदुषामभिप्राय: इति भाति।साधर्म्यं नाम साधारणधर्मवत्वम् अथवा साधारणधर्मसम्बन्ध एव। सादृश्यं तु साधारणधर्मसम्बन्धप्रयोज्य: धर्मविशेष एव॥

पण्डितराजस्तु [2] -"प्रकृतानामेव अप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वय: तुल्ययोगिता।औपम्यं चात्र गम्यंतत्प्रयोजकस्य समानधर्मस्योपादानात्। वाचकत्वाभावात् च"।इति वदन् सादृश्यं पदार्थान्तरम् इति प्रतिपादयति।इवादियोगे साधारणधर्मसम्बन्ध-रूपोपमा वाच्या, सादृश्यप्रतीतिस्तु आर्थी, सदृशादिपदयोगे सादृश्य-प्रतीति: शाब्दी उपमा तु आर्थी इति वदन्ति।दण्डी तु–प्रतिवस्तूपमा-प्रकरणे साम्यस्य प्रतीयमानत्वमङ्गीकरोति। क्वचित् अर्थविशेषस्य प्रतीयमानत्वम् अङ्गीकरोति। इत्थं प्रतीयमानस्य सर्वत्रावस्थिति : दरीदृश्यते॥

काव्यालङ्कारसारसङ्ग्रहकर्ता [3] पर्यायोक्तप्रकरणे प्रकारा-न्तराख्यानम् इत्यस्य अभिधातिरिक्त: व्यापार: इति उदघोषयति।तत्रैव लघुवृत्तौ - "वाचकस्याभिधायकस्य स्वशब्दस्य वृत्ति: व्यापार: वाच्यार्थ-प्रत्यायनम्।वाच्यस्य अभिधेयस्य व्यापारो वाच्यान्तरेण सह आकाङ्क्षा-सन्निधि- योग्यता माहात्म्यात् संसर्गगमनम्।एवं विध: यो वाच्यवाचकयो: व्यापार: तमन्तरेणापि प्रकारान्तरेण अर्थसामर्थ्यात्मना अवगमस्वभावेन यदवगम्यते तत्पर्यायेणस्वकण्ठानभिहितमपिसान्तरेणशब्दव्यापारेण अवगम्यमानत्वात् पर्यायोक्तं वस्तु "इत्युक्तमपि।अमुम् अवगमनव्यापारम् वाच्यवाचकयो: व्यापारेण विनापि प्रकारान्तरेण अर्थसामर्थ्यात् अवगमनस्वभावसहितमिति कथयन्ति।सान्तर:शब्दव्यापार:इति भट्टेन्दुराजस्य कथनस्यापि अयमेवार्थ:। आनन्दवर्धनेन अवगमनमित्यस्य अभिव्यञ्जनम् इत्यर्थ: स्वीकृत:। उक्तं च[4]- न हि

[1]काव्यप्रकाशे।

[2]रसगङ्गाधरे।

[3]भट्टोद्भटस्य।

[4]ध्वन्यालोके।

यैवाभिधानशक्तिः सैवावगमनशक्तिः।अवाचकस्यापि गीतशब्दादेः रसादिलक्षणावगम-दर्शनात् इति॥

इत्थं च काव्येषु कस्मैचिदेव अर्थाय सहृदयाःश्लाघन्ते। स एव भागः विवेकिभिः प्रतीयमानभाग इति स्वीकृत :। असावर्थः एव सारभूतः।अस्य अभिधेयत्वाभावः।अस्य वाच्याद् अन्यदेव वस्त्वात्मकता इति द्योतयितुं प्रतीयमानम् इति नपुंसकनिर्देशश्च। यत्र वाच्यं - प्रतीयमानमिति उभयोः प्रतीतिः, तत्र अधिकचमत्कृतियुक्तस्य मुख्यवाक्यार्थत्वेन व्यवहारः। व्यङ्ग्यार्थस्य सारभूतत्वे ध्वनिः,अस्यापेक्षया वाच्यस्य सारभूतत्वे गुणीभूतव्यङ्ग्य इति व्यवहारः। काव्यश्रवणेन दर्शनेन वा वासनारूपेण स्थितः स्थायी आस्वाद्यमान सन् रस इति व्यवह्रियते।उदाहरणं तु -

**“मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**

**यत् क्रौञ्चमिथुनादेकम् अवधीः काममोहितम्”**॥इति

अत्र शोकात्मकं वस्तु प्रतीयमानम्।व्याधशरेण विद्धः क्रौञ्चः आलम्बनम्, क्रौञ्च्याः आक्रन्दनम् उद्दीपनम्।तेन सहृदयानां हृदये भावनारूपेण विद्यमानः शोकाख्यः स्थायी उद्बुद्धः सन् सहृदयैरास्वाद्यते। एवं प्रतीयमानार्थः सहृदयहृदयम् अधितिष्ठति॥

----- इति शम् -----

**सहायकग्रन्थसूची**–

1.ध्वन्यालोकः,आनन्दवर्धनविरचितः, अभिनवगुप्तविरचितलोचनेन सहितः, रामषारकविरचितबालप्रियासहितः, काशीसंस्कृतग्रन्थमाला-१३५, चौखम्बा, वाराणसी-1940.

2.रसगङ्गाधरः, चन्द्रिकाव्याख्यानसहितः, चौखम्बा विद्याभवन वाराणसी, पुनर्मुद्रितसंस्करणम् 2008.

3.भामहस्य काव्यालङ्कारः, व्याख्याकारः – डॉ.रूपनारायणत्रिपाठी, हंसा प्रकाशन, जयपुरम्, संस्करण 2018.

4.दण्डिन:काव्यादर्श:, व्याख्याकारः – धर्मेन्द्रकुमारगुप्तः, मेहरचन्द लछमनदास दिल्ली, प्रथमसंस्करणम् – 1973.

5.व्यञ्जनाप्रपञ्चसमीक्षा,रचयिता - डॉ. मुकुन्दमाधवशर्मा, चौखम्बा ओरियन्टालिया, प्रथमसंस्करण, वाराणसी – 1979.

6.भट्टोद्भटस्य काव्यालङ्कारसारसङ्ग्रहः, भाण्डारकर ओरियंटल रिसर्च इन्स्टिट्यूट, पुणे॥

 ISSN - 2277-2359

# ॥नारायणीयकाव्ये[1] लक्ष्ये वस्त्वलङ्काररसानुमितिलक्षणानि॥

-डॉ. नारायणन्. ई. आर्.
सहाचार्यः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
गुरुवायूरपरिसरः॥

श्रीमन्नारायणीयं नाम मेल्पुत्तूरनारायणभट्टपादविरचितं सहस्राधिक-पद्यगुम्फितं सहृदयानां भक्तानं च हृदयावर्जकमेव।काव्यस्य तस्य हि श्रीमद्भागवतमहापुराणवृत्तान्तसंक्षेपरूपस्य वस्त्वलङ्काररसादिप्रधानस्य शब्दार्था-लङ्काराडम्बनकल्पस्य काव्यमुल्यतत्त्वानि वाच्यानुमेयरूपार्थतत्त्वेना-वलोकनीयानि। बाह्यान्तरचमत्काराभ्यां हि काव्यानामास्वाद्यताग्रहणे रसादीनुप-कुर्वतां शब्दार्थालङ्कारादीनां वृत्तीनां च वृत्तयोऽपि प्रसिद्धा एव। ताश्च क्वचिदापदतः समग्रेषु हि दशकेषु क्वचिच्चैकदेशतया च क्वचित्क्वचित् पद्यभागेषु वा नारायणीये काव्येऽनुमीयन्ते। शब्दानामौचित्यम्, अर्थानां स्पष्टता, परिवृत्त्य-सहिष्णुत्वम्, श्रवणमाधुर्यादि, रसभावादीनामङ्गाङ्गिसाङ्गत्यमित्यादयो बहवो विषयाश्चात्र दर्शनीयाः। विस्तरभयान्नात्र काचित्तादृशी प्रवृत्तिः॥

## वस्त्वलङ्काररसादीनाम् अनुमेयत्वम्

वाच्यानुमेयभेदेनार्थास्य द्वैविध्ये, मुख्यरूपस्य हि शब्दव्यापारविषयतया प्रसिद्ध्या, यत्नोपपादितस्याप्यपरस्यार्थस्य प्रसिद्ध्या तदनुमितानामनुमेयत्वमिति लिङ्गभूतादर्थान्तरस्यानुमानेना-नुमेयार्थसिद्धिः। तत एव तदनुमिताद्वा लिङ्गभूताद्यदर्थान्तरमनुमीयते सोऽनुमेयः। स च त्रिविधः - वस्तुमात्रम्, अलङ्काराः, रसादयश्चेति। तत्राद्यौ वाच्यावपि सम्भवतः। अन्यस्त्वनुमेय एवेति। तत्र पदस्यार्थो वाच्य एव, नानुमेयः, तस्य निरंशत्वात्, साध्यसाधनभावाभावतः"।इति॥

---

[1]. नारायणीयम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, विद्वच्चतुष्टयविरचितया वनमालाव्याख्यया सहितम्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९७८.

व्यक्तिविवेकव्याख्याने मदीये विवेकसुदर्पणेऽप्युक्तम्[1] - "तत्राभिधापरनामख्यव्यापारो वाच्योऽर्थरूपः। वचेर्योगार्थे यत्प्रत्ययः। व्यक्तवचनादर्थस्य साक्षात्सङ्केतितस्याभिधेयत्वात्। अनुमेय-श्चार्थोऽनुमानलभ्यः। अनुमानं नामानुमितिकरणम्। अनुमितिरनुभवविशेषः। व्याप्तिविशिष्टपक्ष-धर्मताज्ञानजन्यज्ञानम्। यथा - धूमदर्शनाद्वह्निमान् पर्वत इत्याकारज्ञानम्। अस्या व्यापारकारणं परामर्शः। अस्याः कारणं व्याप्तिज्ञानमिति विस्तरस्तु भाषापरिच्छेदे द्रष्टव्यम्। अनुमेयरूपोऽर्थः साध्यसाधनरूपो लिङ्गलिङ्गिज्ञानरूपो महाविषयः। वाचक-रूपाच्छब्दादभिधया व्यापृत्या वाच्यस्य ह्यर्थस्य बोधो जायते। मुखे तावदादौ भवो मुख्यः सोऽर्थः प्रथमः सम्भवः। व्यक्तवचनस्य श्रवणमात्रेण मुख्यार्थबोधः। यत्नेन तत्पश्चादर्थान्तरं यदवगम्यते तद्गौणमभिधीयते। गौणश्च सोऽर्थोऽमुख्यो यत्नेनोपपादनीयः। अनुमेयश्चार्थश्चार्थादर्थान्तरं यत्रानुमितं तत्। तत्र वाच्योऽर्थोऽनुमेयार्थस्य लिङ्गभूतोऽनुमेयार्थस्यैव साध्यत्वात्। वस्त्वलङ्कार-रसादिभूताश्चानुमेयार्थाः सम्भवन्ति। तत्र वस्त्वलङ्कारयोर्वाच्यरूपयोरपि सम्भवः प्रसिद्धः। रसादयस्तु - रसरसाभासभावभावाभास-भावोदयभावसन्धिभावशान्ति-भावशबलताः - न वाच्यसम्भवाः केवलमनुमानसाध्या एव। पदस्य वाच्यरूपोऽर्थः साक्षात् सङ्केतितत्वादीश्वरेच्छारूपत्वात् तत्रानुमानस्य प्रवृत्तिरेव नास्ति। अंशत्वं साध्यसाधनभावत्वं नानुमेयत्वे प्रयोजकम्। अंशत्वं नाम विभाजनं भागः। साध्यसाधनभावेऽर्थान्तरस्य साध्यत्वात्तस्यैव प्राधान्यात् शब्दार्थयो-र्वाचकवाच्ययोरेकस्य वा साधनत्वं साध्यसाधनभावत्वमेवार्थान्तरकल्पने नियामकम्"।इति।एतदेव तत्त्वमवलम्ब्य श्रीमन्नारायणीये नारायणभट्ट-पादविरचिते वस्त्वलङ्काररसादीनामनुमानत्वं स्थापयामः॥

## नारायणीये वस्तुनोऽनुमेयत्वम्

साध्यसाधनभावेऽर्थान्तरस्य साध्यत्वात्तस्यैव प्राधान्यात् शब्दार्थयोर्वाचकवाच्ययो-रेकस्य वा साधनत्वं साध्यसाधनभावत्वमेवार्थान्तरकल्पने नियामकमिति

1. व्यक्तिविवेकः, महिमभट्टकृतः, श्रीमन्नारायणविरचितविवेकसुदर्पणव्याख्यया समलङ्कृतः, पृ.३०.

न्यायेनात्र वस्तुनः अनुमानत्वं नारायणीये चतुर्थे दशके यथा[1] -

**"ध्यायतां सकलमूर्तिमीदृशीमुन्मिषन्मधुरताहृतात्मनाम्।**
**सान्द्रमोदरसरूपमान्तरं ब्रह्मरूपमयि तेऽवभासते"॥** इति।

अस्मिन् पद्ये ब्रह्मस्वरूपस्य हि वस्तुनः प्रतिपादनाद्भगवतः सकललोकधृग्रूपमनुमीयते। नारायणीये एकोनचत्वारिंशत्तमे दशके यथा[2] -

**"अहो खलु यशोदया नवकलायचेतोहरं**
**भवन्तमलमन्तिके प्रथममापिबन्त्या दृशा।**
**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**
**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः"॥** इति।

अत्र यशोदाभाग्यरूपं वस्तु मनोहरतनुस्पृशेत्याद्यर्थजातमनुमित-मेव।नारायणीयस्याष्टमे दशके यथा[3] -

**"एवं तावत्प्राकृतप्रक्षयान्ते ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा।**
**ब्रह्मा भूयस्त्वत्त एवाप्य वेदान् सृष्टिं चक्रे पूर्वकल्पोपमानाम्"॥**

इति।सृष्टिर्वेदप्राप्त्यनन्तरजाता ब्रह्मकर्तृकेति पूर्वब्रह्मकल्पवृत्तान्तरूपं वस्त्वत्रानुमेयम्। अपि च नारायणीये द्वितीये दशके यथा[4] -

**"सूर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासिफालान्तरं**
**कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम्।**
**गण्डोद्यन्मकराभकुण्डलयुगं कण्ठोज्वलत्कौस्तुभं**
**त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीप्रं भजे"॥** इति।

अत्र केशादिपादान्तक्रमेण वक्षोऽन्तभगवद्रूपवर्णनात् परब्रह्मणोऽमबर्त्तत्वेऽपि मूर्त्तत्वरूपं वस्त्वनुमेयम्। अपि च नारायणीये प्रथमे दशके यथा[5] -

1. नारायणीयम्-४.६॥
2. नारायणीयम्-३९.९॥
3. नारायणीयम्-८.१॥
4. नारायणीयम्-२.१॥
5. नारायणीयम्-१.१॥

**“सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां**
**निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।**
**अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं**
**तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम्”॥**

इत्यत्र पद्ये ब्रह्मतत्त्वं भातिति पूर्ववन्मूर्त्तत्वरूपं वस्त्वनुमेयम्। अपि च नारायणीयस्य द्विनवतितमे दशके यथा[1] -

**“भक्तास्तावत्कलौ स्युर्द्रमिलभुवि ततो भूरिशस्तत्र चोच्चैः**
**कावेरीं ताम्रपर्णीमनु किल धृतमालाञ्च पुण्यां प्रतीचीम्।**
**हा मामप्येतदन्तर्भवमपि च विभो किञ्चिदञ्चिद्रसं**
**त्वय्याशापाशैर्निबध्य भ्रमय न भगवन् पूरय त्वन्निषेवाम्”॥** इति।

अत्र पद्ये कलौ भक्तजनबाहुल्यरूपं वस्तु तावदर्थान्तरप्रधान-पूर्वंमनुमेयमिति विशेषः। अपि च नारायणीयस्य दशमे दशके यथा[2] -

**“वैकुण्ठ! वर्धितबलोऽथ भवत्प्रसादा-**
**दम्भोजयोनिरसृजत्किल जीवदेहान्।**
**स्थास्नूनि भूरुहमयानि तथा तिरश्चां**
**जातिं मनुष्यनिवहानपि देवभेदान्”॥** इति च।

अत्र पद्ये ह्यम्भोजयोनेः सृष्टौ मनुष्यत्वदेवत्वादिजात्यख्यं वस्त्वनुमेयमिति। एवं साध्यसाधनगर्भतया वस्तुनामनुमेयत्वं सिद्धमेव। इदानीं नारायणीये अलङ्काराणामनुमेयत्वमिति निरीक्ष्यते॥

## नारायणीये अलङ्काराणामनुमेयत्वम्

नारायणीयस्य तृतीये दशके यथा[3] -

**“मुनिप्रौढा रूढा जगति खलु गूढात्मगतयो**
**भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः।**

1. नारायणीयम्-९२.७॥
2. नारायणीयम्-१०.१॥
3. नारायणीयम्-३.४॥

**चरन्तीश स्वैरं सततपरिनिर्भातपरचित्**

**सदानन्दाद्वैतप्रसरपरिमग्नाः किमपरम्"॥** इति।

अत्र पद्ये प्रतिवस्तूपमैव प्रस्तुताश्रितां वस्तुतामनुमीयमानविषया-माश्रित्यानुमितेति स्पष्टम्। नारायणीयस्य त्रिंशत्तमे दशके यथा[1] -

**"आनीतमाशु भृगुभिर्महसाभिभूतैस्त्वां रम्यरूपमसुरः पुलकावृताङ्गः।**

**भक्त्या समेत्य सुकृती परिषिच्य पादौतत्तोयमन्वधृत मूर्धति तीर्थतीर्थम्"॥**

इति।

पद्येऽस्मिन् सुकृतौ हेतुरिति हेत्वलङ्कारोऽनुमितः। नारायणीयस्य प्रथमे दशके यथा[2] -

**"कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजा-**

**मित्येवं पूर्वमालोचितमजित मया नैवमद्याभिजाने।**

**नो चेज्जीवाः कथं वा मधुरतरमिदं त्वद्वपुश्चिद्रसार्द्रं**

**नेत्रैः श्रोत्रैश्च पीत्वा परमरससुधांभोधिपूरे रमेरन्"॥** इति।

पद्येऽस्मिन् काव्यलिङ्गमलङ्कारः समर्थनीयार्थसमर्थनरूप-मनुमेयम्। अपि च नारायणीये एकोनचत्वारिंशत्तमे दशके यथा[3] -

**"अहो खलु यशोदया नवकलायचेतोहरं**

**भवन्तमलमन्तिके प्रथममपिबन्त्या दृशा।**

**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**

**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः"॥** इति।

अत्रापि काव्यलिङ्गमलङ्कारः समर्थनीयार्थसमर्थनरूप-मनुमेयम्। अपि च नारायणीयस्य द्वात्रिंशत्तमे दशके यथा[4] -

**"क्षिप्तं जले त्वां चकितं विलोक्य निन्येऽम्बुपात्रेण मुनिः स्वगेहम्।**

**स्वल्पैरहोभिः कलशीं च कूपं वापीं सरश्चानशिषे विभो त्वम्"॥** इति।

---

1. नारायणीयम्-३०.९॥
2. नारायणीयम्-१.७॥
3. नारायणीयम्-३९.९॥
4. नारायणीयम्-३२.३॥

पद्येऽस्मिन् उल्लेखो कलशकूपसरोरूपेण बहुधोल्लेखेन लिङ्गेनानुमितः। अपि च नारायणीयस्य एकादशे दशके यथा[1] -

**“प्रसाद्य गीर्भिः स्तुवतो मुनीन्द्राननन्यनाथावथ पार्षदौ तौ।**
**संरम्भयोगेन भवैस्त्रिभिर्मामुपेतमित्यात्तकृपां न्यगादीः”॥** इति।

पद्येऽस्मिन् प्रस्तुतैरेव लिङ्गैरप्रस्तुतपरिस्फूर्त्तौ समासोक्ति-रनुमेयार्थविषया। अपि च नारायणीयस्य नवमे दशके यथा[2] -

**“महार्णवविघूर्णितं कमलमेव तत्केवलं**
**विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन्।**
**क एष कमलोदरे महति निस्सहायो ह्यहं**
**कुतः स्विदिदमम्बुजं समजनीति चिन्तामगात्”॥** इति।

अत्र निगीर्याध्यवसायरूपेण लिङ्गेन साध्यातिशयोक्तिरनुमेयार्थ-विषया। इत्थमलङ्कारणामनुमेयार्थविषयत्वं नारायणीये लक्ष्ये निरीक्षितम्। इदानीं तत्रैव रसादीनां तद्विषयत्वं निरीक्ष्यते॥

## नारायणीये रसादीनामनुमेयत्वम्

वस्त्वलङ्कारयोर्वाच्यरूपयोरपि सम्भवः प्रसिद्धः। रसादयस्तु - रसरसाभासभावभावाभासभावोदयभावसन्धिभावशान्तिभावशबलताः न वाच्यसम्भवाः केवलमनुमानसाध्या एवेति सिद्धान्तमाश्रित्य रसादीनामनुमानत्वं नारायणीये एकोनचत्वारिंशत्तमे दशके यथा[3] -

**“अहो खलु यशोदया नवकलायचेतोहरं**
**भवन्तमलमन्तिके प्रथममपिबन्त्या दृशा।**
**पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा**
**मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः”॥** इति।

---

1. नारायणीयम्-११.६॥
2. नारायणीयम्-९.२॥
3. नारायणीयम्-३९.९॥

यशोदागतभगवद्रूपपुत्रविषयकरतिरूपवात्सल्यमेवात्र भावरूपतयानुमीयते। नारायणीयस्य चतुस्त्रिंशत्तमे दशके यथा[1] -

**"मारीचं द्रावयित्वा मखशिरसि शरैरन्यरक्षांसि निघ्नन्**

**कल्यां कुर्वन्नहल्यां पथि पदरजसा प्राप्य वैदेहगेहम्।**

**भिन्दानश्चान्द्रचूडं धनुरवनिसुतामिन्दिरामेव लब्ध्वा**

**राज्यं प्रातिष्ठथास्त्वं त्रिभिरपि च समं भ्रातृवीरैः सदारैः"॥** इति।

अत्र पद्ये श्रीरामनिष्ठो वीरः अनुमितार्थविषयो ध्येयः। नारायणीयस्य तृतीये दशके यथा[2] -

**"मरुद्गेहाधीश त्वयि खलु पराञ्चोऽपि सुखिनो**

**भवत्स्नेही सोऽहं सुबहु परितप्ये च किमिदम्।**

**अकीर्तिस्ते मा भूद्वरद गदभारं प्रशमयन्**

**भवत्भक्तोत्तंसं झटिति कुरु मां कंसदमन"॥** इति।

कविगता भगवद्भक्तिरेवात्रानुमीयमाना सहृदयहृदयं प्रविष्टा। नारायणीयस्य पञ्चत्रिंशत्तमे दशके यथा[3] -

**"सौमित्रिस्त्वत्र शक्तिप्रहृतिगळदसुर्वातजानीतशैल-**

**घ्राणात्प्रणानुपेतो व्यकृणुत कुसृतिश्लाघिनं मेघनादम्।**

**मायाक्षोभेषु वैभीषणवचनहृतस्तम्भनः कुम्भकर्णं**

**सम्प्राप्तं कम्पितोर्वीतलमखिलचमूभक्षिणं व्यक्षिणोस्त्वम्"॥** इति।

अत्रापि पद्ये श्रीरामनिष्ठो वीरः अनुमितार्थविषयो ध्येयः। नारायणीयस्य एकत्रिंशत्तमे दशके यथा[4] -

**"याचत्येवं यदि स भगवान्पूर्णकामोऽस्मि सोऽहं**

**दास्याम्येव स्थिरमिति वदन् काव्यशप्तोऽपि दैत्यः।**

**विन्ध्यावल्या निजदयितया दत्तपाद्याय तुभ्यं**

1. नारायणीयम्-३४.३॥
2. नारायणीयम्-३.९॥
3. नारायणीयम्-३५.६॥
4. नारायणीयम्-३१.५॥

**चित्रं चित्रं सकलमपि स प्रार्पयत्तोयपूर्वम्"॥** इति।

अत्र पद्ये अद्भुतो नाम रसः अनुमितिविषयीभूतः। नारायणीयस्य सप्तमे दशके यथा[1] -

**"दृष्ट्वा संभृतसंभ्रमः कमलभूस्त्वत्पादपाथोरुहे**
**हर्षावेशवशंवदो निपतितः प्रीत्या कृतार्थीभवन्।**
**जानास्येव मनीषितं मम विभो ज्ञानं तदापादय**
**द्वैताद्वैतभवत्स्वरूपपरमित्याचष्ट तं त्वां भजे"॥** इति।

भक्तिर्भगवद्विषयिणी पद्ये तावदस्मिन्ननुमिता स्पष्टैव। नारायणीयस्य अष्टनवतितमे दशके यथा[2] -

**"नो तिर्यञ्चन्न मर्त्यं न च सुरमसुरं न स्त्रियं नो पुमांसं**
**न द्रव्यं कर्म जातिं गुणमपि सदसद्वापि ते रूपमाहुः।**
**शिष्टं यत्स्यान्निषेधे सति निगमशतैर्लक्षणावृत्तितस्तत्**
**कृच्छ्रेणावेद्यमानं परमसुखमयं भाति तस्मै नमस्ते"॥** इति।

निर्वेदस्थायिभूतः शान्तरसः पद्ये निष्कृष्टः काव्यानुमिति-विषयीभूतः। नारायणीयस्य एकत्रिंशत्तमे दशके यथा[3] -

**"निस्सन्देहं दितिकुलपतौ त्वय्यशेषार्पणं त-**
**द्व्यातन्वाने मुमुचुरृषयः सामराः पुष्पवर्षम्।**
**दिव्यं रूपं तव च तदिदं पश्यतां विश्वभाजा-**
**मुच्चैरुच्चैरवृधदवधीकृत्य विश्वाण्डभाण्डम्"॥** इति।

समरविजयी भगवानिति वीरः एव रसः पद्ये तावदस्मिन्ननुमितः।नारायणीयस्य चतुस्त्रिंशत्तमे दशके यथा[4] -

**"नत्वाऽगस्त्यं समस्ताशरनिकरसपत्राकृतिं तापसेभ्यः**
**प्रत्यश्रौषीः प्रियैषी तदनु च मुनिना वैष्णवे दिव्यचापे।**

1. नारायणीयम्-७.९॥
2. नारायणीयम्-९८.३॥
3. नारायणीयम्-३१.६॥
4. नारायणीयम्-३४.७॥

**ब्रह्मास्त्रे चापि दत्ते पथि पितृसुहृदं वीक्ष्य भूयो जटायुं**

**मोदाद्गोदातटान्ते परिरमसि पुरा पञ्चवट्यां वधूट्या"॥** इति।

देवताविषयिणी रतिर्व्यभिचारीत्यनुमेया भावरूपैवात्र पद्ये ध्येया। इत्थं च संक्षेपतया काव्येष्वनुमेयार्थविषयत्वं वस्त्वलङ्कारसादीनां श्रीमन्नारायणीये लक्ष्ये लक्षितमिति नात्र विस्तरः॥

# पुस्तकसूचिका

1. नारायणीयम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, विद्वच्चतुष्टयविरचितया वनमालाव्याख्यया सहितम्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९७८.

2. The Aesthetic Experience According to Abhinavagupta, Raniero Gnoli, Chowkhabha Sanskrit Series Office, Varanasi, 1968.

3. प्रक्रियासर्वस्वम्, मेल्पुत्तूरनारायणभट्टपादविरचितम्, सम्पादकः-प्रो. के.पी.नारायणपिषोरोटी, एम्. एस् मेनोन्, गुरुवायूरदेवस्वप्रसिद्धीकरणम्, १९९८.

4. नाट्यशास्त्रम्, भरतमुनिविरचितम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००२.

5.व्यक्तिविवेकः, महिमभट्टकृतः, श्रीमन्नारायणविरचितविवेकसुदर्पणव्याख्यया समलङ्कृतः, सिन्धुप्रकाशनम्, हैदराबाद, २०१२.

6. An Elucidation of Poetic Blemishes in the Vyaktiviveka, Triolkinath Jha, Mithila Institute of Post Graduate Studies and Research, Darbhanga-1987.

7. ध्वन्यालोकः, आनन्दवर्धनविरचितः, अभिनवगुप्तविरचितलोचनेन सहितः, रामषारकविरचितबालप्रियासहितः, काशीसंस्कृतग्रन्थमाला-१३५, चौखम्बा, वाराणसी-१९४०.

8. कुवलयानन्दः, श्रीमदप्पय्यदीक्षितविरचितः, जयदेवविरचितचन्द्रालोकसहितः, निर्णयसागरमुद्रणालयप्रकाशितः, मुम्बयी-१९३१.

9. काव्यप्रकाशः, अलङ्कारसन्दर्भः, मम्मटभट्टविरचितः, झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वितः, बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन संशोधितः, परिमलसंस्कृतग्रन्थमाला-97, परिमल पब्लिकेशन्स, दिल्ली-110007, पुनर्मुद्रित संस्करण-2008, ISBN: 978-81-7110-322-5.

10. साहित्यदर्पणः, श्रीविश्वनाथकविराजकृतः, विद्यावाचस्पति-साहित्याचार्य-शालिग्रामशास्त्रि-विरचितया विमलाख्यया हिन्दीव्याख्यया विभूषितः, मोतीलाल बनारसीदास, दिल्ली-110007, नवम संस्करण-1977, पुनर्मुद्रण-2000.

11. The Prakrit Gathasaptasati: Compiled by Satavahana King Hala, edited with Introduction and Translation in English by Radhagovinda Basak, Bibliotheca Indica, The Asiatic Society, Calcutta, 1971.

12. महावाक्यविचारः, कोराडसुब्रह्मण्यः, श्रीलक्ष्मणार्यभव्यस्मृतिग्रन्थमाला, द्वितीयं पुष्पम्, भाग्यनगरम्-2012.

13. The Prataprudriya of Vidyanatha with the Ratnapana of Kumarasvamin, The Samskrit Educational Society, Chennai-1999.

14. The Rasagnagadhara of Jagannath Pandit, Motilal Banarsidass, Delhi-7, Reprint Edition-1988.

15. The Sarasvatikanthabharana of Bhojadeva, Nirnaya Sagar Reproduction, Chowkhambha Orientalia, Varanasi, Reprint Edition-1987.

# പാത്തുമ്മയുടെ ആട്, കഥയും ജീവിതവും.

**ശ്രീമതി**. കെ.എ). ജെസ്സി.
മലയാളം അദ്ധ്യാപിക
ആധുനിക വിഭാഗം

ആഖ്യാനത്തിന്റെ നേർമയാണ് ബഷീര് സാഹിത്യത്തിന്റെ കരുത്ത്. ജീവിക്കാനായി സാഹിത്യത്തെ തൊഴിലായി സ്വീകരിച്ചവനാണ് താനെന്ന് അദ്ദേഹം തന്നെ വെളിപ്പെടുത്തിയിട്ടുണ്ട്. സാഹിത്യത്തിന്റെ സാങ്കേതികകളിലുള്ള അജ്ഞതയും ബഷീർ സധൈര്യം വ്യക്തമാക്കിയിട്ടുണ്ട്. ഭാവന ചെയ്ത് കൃത്രിമമാക്കിയ ജീവിതത്തെ ആവിഷ്കരിക്കാൻ മെനക്കെടാതെ അനുഭവിച്ചതും അറിഞ്ഞുകൊണ്ടിരിക്കുന്നതുമായ ജീവിതത്തിന്റെ നേരവസ്ഥകളെ ഒരു റിയലിസ്റ്റിക്കിന്റെ മനോഭാവത്തോടെ ചിത്രീകരിക്കാനാണ് ബഷീര് ശ്രമിച്ചത്. എഴുത്തിൽ അന്യജീവിതങ്ങളെ കടം കൊള്ളാനും അദ്ദേഹം ശ്രമിച്ചിട്ടില്ല. അത്തരം അവസരങ്ങളിൽ അവയെ സ്വന്തം അനുഭവങ്ങളാക്കുകയായിരുന്നു ബഷീർ.

ബഷീര് രചനകളില് പലതിലും എഴുത്തുകാരനായ ബഷീറിനെ നാം കണ്ടുമുട്ടുന്നു. എഴുതുന്നത് കഥയല്ല ജീവിതമാണെന്ന് ഈ എഴുത്തുകാരൻ ഓർമ്മപ്പെടുത്തുകയും ചെയ്യുന്നു. ഭാവനചെയ്ത് രൂപപ്പെടുത്തുന്ന കഥകൾക്കാണ് നല്ല തുടക്കവും മധ്യവും ഒടുക്കവുമുണ്ടാകുക. ജീവിതത്തിന്റെ സന്ദർഭങ്ങള് അങ്ങനെയല്ല. അവ പൂർവ്വനിശ്ചിതമല്ലാതെ സംഭവിച്ചുപേകുന്നവയാണ്. ബഷീർ സാഹിത്യത്തിൽ ജീവിത സംഭവങ്ങളുടേയും സന്ദർഭങ്ങളുടേയും അച്ചടക്കമില്ലായ്മ കാണാനാവും. ഈ സ്വഭാവത്തെ തന്റെ എഴുത്തിന്റെ വ്യക്തിത്വമാക്കി നിലനിർത്താന് ബഷീറിന് കഴിഞ്ഞു എന്നതാണ് അദ്ദേഹത്തെ മറ്റ് എഴുത്തുകാരില് നിന്ന് വ്യത്യസ്ഥനാക്കുന്നത്.

ജീവിതത്തിന്റെ ഭാഷക്ക് സാഹിത്യഭാഷയും അതിന്റെ വ്യാകരണ സങ്കേതങ്ങളും അരോചകമാണ്. അതുകൊണ്ട് ബഷീർ രചനകളില് ഭാഷാപരമായ അച്ചടക്കമില്ലായ്മയും കാണാം. ദുഃഖിക്കാനുള്ളതെന്ന് വ്യാഖ്യാനിക്കപ്പെടുമ്പോൾത്തന്നെ, രസികത്വം നിറഞ്ഞതുമാണ് ജീവിതം. ചപലമെന്നും താത്കാലികമെന്നും വിലകുറച്ചുകണ്ട് ഈ രസികത്വങ്ങളെ തള്ളിക്കളയുകയും ദു:ഖാനുഭവങ്ങളിൽ ജീവിതഗൗരവം കണ്ടെത്താൻ ശ്രമിക്കുകയുമാണ് മനുഷ്യൻ. ബഷീർ സാഹിത്യത്തിലെ ഫലിതം, ജീവിതത്തെ ജീവിതം കൊണ്ടറിഞ്ഞവന്റെ സത്യം വെളിപ്പെടുത്തലാണ്. പലതും അറിഞ്ഞവന്റെ നിർമ്മമമായ ചിരി. പക്ഷേ ഈ ഫലിതത്തിന്റെ ഗൗരവം തിരിച്ചറിയാതെ ഒരു തമാശ കഥാകാരന്റെ അച്ചുകുത്തി ബഷീര് എന്ന മഹാപ്രതിഭയെ മലയാളസാഹിത്യത്തിന്റെ ഓരത്ത് നിർത്താനാണ് നമ്മുടെ പല നിരൂപകരും ശ്രമിച്ചതും ഇപ്പോഴും ശ്രമിച്ചു കൊണ്ടിരിക്കുന്നതും.' തമാശ ക്കഥയാണ് ഞാനിവിടെ പറയാന് പോകുന്നത്' (പാത്തുമ്മയുടെ ആട്) എന്ന ബഷീറിന്റെ പ്രഖ്യാപനത്തിൽതന്നെ കഥയെ സാഹിത്യത്തിന്റെസാങ്കേതികതകളോടെ എഴുതാനല്ല, ജീവിതത്തിന്റെ രസികത

നിലനിർത്തി പറയാനാണ് തനിക്കു താല്പര്യം എന്നു് അദ്ദേഹം വ്യക്തമാക്കിയിട്ടുണ്ട്. ബഷീർ സാഹിത്യത്തിന്റെ സമസ്ത സവിശേഷതകളും നിറഞ്ഞുനില്ക്കുന്ന രചനയാണ് 'പാത്തുമ്മയുടെ ആട്'.

'പാത്തുമ്മയുടെ ആടിലെ' നായകൻ എഴുത്തുകാരനായ ബഷീര് തന്നെയാണ്.നായിക ആടും. കഥയില്ലാത്തവരെന്നോ, കഥയിലിടമില്ലാത്തവരെന്നോ കണക്കാക്കപ്പെടുന്ന ജന്തുവർഗ്ഗത്തെ മനുഷ്യർക്കൊപ്പം ജീവിതമുള്ളവരായി ഈ നോവലില് കാണാം.ഒരു എഴുത്തുകാരന്റെ സംവേദനക്ഷമത മുറ്റിയ മനസ്സ് ചുറ്റുപാടുകളെ സസ്സൂക്ഷ്മം നിരീക്ഷിച്ചപ്പോൾ ലഭിച്ചതാണ് പാത്തുമ്മയുടെ ആടിന്റെ കഥയില്ലായ്മയിലെ കഥ. ചെറു ചെറു സംഭവങ്ങളും, സന്ദർഭങ്ങളും മാത്രമേ ഈ നോവലിലുള്ളു.എന്നാൽ ഈ സംഭവങ്ങളുടേയും സന്ദർഭങ്ങളുടേയും സ്വഭാവങ്ങള് വെളിപ്പെടുത്താനാണ് ബഷീര് ശ്രമിച്ചിട്ടുള്ളത്. സൂക്ഷ്മഗ്രാഹിയായ ഒരെഴുത്തുകാരന്റെ രചനാസത്ത പാത്തുമ്മയുടെ ആടിലെ ബഷീറിൽ കണ്ടെത്താനാവുന്നു.

അനേക കാലത്തെ അലഞ്ഞു തിരിഞ്ഞുള്ള ജീവിതത്തിനുശേഷം, സ്വസ്ഥതയും, ശാന്തതയും പരിപൂർണ്ണ വിശ്രമവും ആഗ്രഹിച്ച് വീട്ടിലെത്തുകയാണ് ബഷീർ. സമാധാനത്തോടെ ഇരുന്ന് വിശിഷ്ടമായ സാഹിത്യരചന നടത്തുകയാണ് ലക്ഷ്യം. എന്നാൽ അദ്ദേഹം വീട്ടിലെ ഒച്ചകളുടേയും, ബഹളങ്ങളുടേയും ഒത്ത നടുവിലാവുകയാണ്. കഥയെഴുത്തിന് ഒട്ടും അനുകൂലമല്ലാത്ത ഈ സാഹചര്യത്തെ തന്നെ കഥയാക്കിയിരിക്കുന്നു എന്നതാണ് ' പാത്തുമ്മയുടെ ആടി'ന്റെ സവിശേഷതയും, ബഷീറിന്റെ എഴുത്തു വ്യക്തിത്വത്തിന്റെ പ്രത്യേകതയും. കുടുംബവീട്ടിലെ കുട്ടികളും, ജന്തുജാലങ്ങളും മറ്റുള്ളവരും ഉണ്ടാക്കുന്ന ശബ്ദങ്ങളും ചലനങ്ങളും സൂക്ഷ്മമായി നോക്കികണ്ട് അവയുടെ സ്വഭാവത്തെ വെളിപ്പെടുത്താനാണ് ബഷീര് ഈ നോവലില് ശ്രമിച്ചിട്ടുള്ളത്. ഒരു എഴുത്തുകാരനുണ്ടായിരിക്കേണ്ട സംവേദനീയതയുടെ ആഴവും പരപ്പും ബഷീറിലൂടേ വ്യക്തമാവുന്നു. ജീവിതത്തിലെ സംഭവങ്ങൾക്ക് കെട്ടുറപ്പുള്ള കഥയുടെ മട്ടല്ല, അനുഭവങ്ങളുടെ ആസ്വാദ്യതയാണുള്ളതെന്ന് ഈ നോവലിൽ ബഷീര് ഓർമ്മിപ്പിക്കുന്നു, താൻ കൂടി പങ്കാളിയായികൊണ്ട് തന്റെജീവിതത്തെയും ചുറ്റുപാടുകളേയും നോക്കികണ്ട് രസിക്കുകയാണ് ബഷീർ. പാത്തുമ്മയുടെ ആടില് പരിസരമാണ് നിറഞ്ഞുനില്ക്കുന്നത്. എഴുത്തുകാരനായ ഒരു പ്രേക്ഷകനായി നില്ക്കുകയാണ് ബഷീർ.മനുഷ്യ ജീവിതത്തിലെ ചെറിയ സംഭവങ്ങൾപോലും കഥപോലെ മനോഹരവും രസികത്വം നിറഞ്ഞതുമാണ് എന്ന് ഓർമ്മപ്പെടുത്തലാണ് 'പാത്തുമ്മയുടെ ആട്". സ്വന്തം ജീവിതം എഴുതിയതിനാൽ ഭാവനകൊണ്ട് അതിനെ കളങ്കപ്പെടുത്താൻ ബഷീര് ശ്രമിച്ചിട്ടില്ല. ഭാവനപരമായി ജീവിതത്തെ ചിത്രീകരിക്കേണ്ടിവരുമ്പോൾ അത് കൃത്രിമത്വം നിറഞ്ഞതായിതീരുന്നു. തന്നിലെ എഴുത്തുകാരനെ ബഷീർ ആവും വിധംവെളിപ്പെടുത്തിയിരിക്കുകയാണ് നോവലിൽ.

ജീവിതം കൊണ്ട് മുറിവേല്ക്കപ്പെടുന്ന എഴുത്തുകാരന്റെ നിർമ്മലമായ മനസ്സ്, ഓരോ വേദനയുടേയും സന്തോഷത്തെ തിരിച്ചറിയാൻ നടത്തുന്ന ശ്രമങ്ങൾ പാത്തുമ്മയുടെ ആടില് നിന്നും വായിച്ചെടുക്കാം.

വിശിഷ്ടമായി സാഹിത്യരചനയ്ക്കും സമാധാനത്തിനുമായി വീട്ടിലെത്തിയപ്പോൾ അതിനുള്ള അന്തരീക്ഷം ലഭിച്ചില്ല എന്ന സങ്കടം. പുസ്തകങ്ങൾ എഴുതിവിറ്റ് പണമുണ്ടാക്കുന്നവന് എന്ന ധാരണയില് സാമ്പത്തികമായി ചൂഷണം ചെയ്യാനുള്ള സഹോദരങ്ങളുടേയും ഉമ്മയുടേയും ശ്രമം. വീട്ടിലെ ദാരിദ്ര്യാവസ്ഥ കണ്ടിട്ടുണ്ടാവുന്നമാനസികാസ്വസ്ഥത. കുട്ടികൾപോലും അതിന്റെ ഇരകളാകുന്നുവല്ലോ എന്ന വേവലാതി. ഇത്തരം ജീവിതാനുഭവങ്ങൾ പ്രത്യക്ഷ യാഥാർത്ഥ്യങ്ങളുമായി മുൻപിലെത്തുമ്പോള് കഥയെഴുത്തിനെ ജീവിതമെഴുത്താക്കുകയായിരുന്നു ബഷീർ. കഥ ജീവിതവും, ജീവിതം കഥയുമാക്കുകയാണീനോവലില്. വൈക്കം മുഹമ്മദ് ബഷീർ എന്ന വ്യക്തിയും എഴുത്തുകാരനും ഒന്നായി തീരുന്ന അപൂർവ്വ ദൃശ്യം നോവലിലുണ്ട്.

സാഹിത്യ രചനയെ ഉപജീവനത്തിനുള്ള തൊഴിലായി സ്വീകരിച്ച ഒരു വ്യക്തിയുടെ സ്വത്വമാണ് നോവലിലെ ബഷീറിനുള്ളത്. "ഞാൻ ആ കാലത്ത് സാഹിത്യകാരനായി എറണാകുളത്ത് താമസിക്കുകയാണ് 1936 - '37. ധാരാളം എഴുതും. പ്രതിഫലമൊന്നും കിട്ടിയിരുന്നില്ല. പ്രതിഫലം ചോദിക്കാനും വാങ്ങാനും പാടില്ലായിരുന്നു. സാഹിത്യ സേവനം ! സാഹിതീ ക്ഷേത്രത്തിലെ നിത്യപൂജ ! പക്ഷേ തിന്നാനുണ്ടായിരുന്നില്ല. ...... അങ്ങനെ ഞാൻ ഫുള് ടൈം സാഹിത്യകാരനായി ജീവിച്ചുവരുമ്പോള്"........ പാത്തുമ്മയുടെ ആടിലെ ഈ സന്ദർഭം ബഷീറിന്റെ എഴുത്തുജീവിതത്തെ അടയാളപ്പെടുത്തുന്നു. പ്രതിഫലം ലഭിക്കാത്ത സാഹിത്യമെഴുത്തിനെ സാഹിത്യസേവനം, സാഹിതീ ക്ഷേത്രത്തിലെ നിത്യപൂജ എന്നിങ്ങനെ പരിഹസിക്കുകയാണിദ്ദേഹം. മറ്റേതൊരു തൊഴിലിനും ലഭിക്കുന്നതുപോലുള്ള മാന്യമായ പ്രതിഫലം സാഹിത്യകാരനും ലഭിക്കണമെന്നാണ് ഇതുവഴി ബഷീർ വ്യക്തമാക്കുന്നത്. എഴുത്തുകാരനും ആഹാരം വക ലഭിക്കണം. എഴുത്തു തൊഴിലാക്കിയവൻ മറ്റേതൊരു തൊഴിലാളിയേയും പോലെ ചൂഷണം ചെയ്യപ്പെട്ടിരുന്ന ഒരു ജീവിത കാലാവസ്ഥ യെയാണ് ബഷീര് ഇങ്ങനെ പരിഹസിക്കുന്നത്. നർമ്മമധുരമായി പറയുന്ന ഈ വാചകങ്ങൾക്കിടയില് ഒരു എഴുത്തുകാരന്റെ ജീവിതയാതനയും വേദനകളും കാണാനാവുന്നു."ബാല്യകാല സഖി", ശബ്ദങ്ങൾഎന്നീ പുസ്തകങ്ങള് ആട് തിന്നുന്നു. നിർമ്മമനായി ഈ കാഴ്ച കണ്ട് നില്ക്കുകയാണ് ബഷീർ. ഉപജീവനത്തിനുതകാത്ത തന്റെ ഉല്പന്നം നശിപ്പിക്കപ്പെടുന്നതില് വേവലാതി തോന്നേണ്ടതില്ലാതെ ഒരു തൊഴിലാളിയുടെ മനോഭാവം ഈ അവസരത്തിൽ ബഷീറില് കണ്ടെത്താം. അതേ സമയം തന്റെ അദ്ധ്വാനത്തിന്റെ പങ്കുകൊടുത്തു വാങ്ങിയ നൂറുരൂപാ വിലയുള്ള പുതപ്പ് ആടുതിന്നുന്നതിൽ അങ്ങേയറ്റം വേവലാതിപ്പെടുകയാണദ്ദേഹം. പ്രസാധകന്മാര്അയച്ചുകൊടുത്ത " വിശ്വവിഖ്യാതമായ മൂക്ക്" എന്ന പുസ്തകത്തിന്റെ പത്തുകോപ്പികളില് ഒൻപതെണ്ണം ചന്തയില് കൊണ്ടുപോയി വിറ്റ് പണം കൊണ്ടുവരാന് ബഷീർ അനുജനെ എല്പ്പിക്കുന്നുണ്ട്. ജീവിതാവശ്യങ്ങളും കുടുംബത്തിൽനിലനില്ക്കുന്ന ദാരിദ്ര്യവുമാണ് ഇതിനദ്ദേഹത്തെ പ്രേരിപ്പിക്കുന്നത്. വായിക്കപ്പെടുകയും ആസ്വദിക്കപ്പെടുകയും ചെയ്യേണ്ട

സാഹിത്യത്തിന് വിപണനമൂല്യവും ഉണ്ട്. വായിക്കപ്പെടാതെ വില്ക്കപ്പെടുക മാത്രം ചെയ്യുന്നത്, എഴുത്ത്കാരനെ സംബന്ധിച്ചിടത്തോളം വേദനാജനകമാണ്.എഴുത്ത് ഒരു നിഷ്ഫല വ്യായാമമായിരുന്നു എന്ന വ്യർത്ഥ്യതാ ബോധമാണ് അയാളിലുണ്ടാവുക. ഈ ബോധത്തിന്റെ പ്രകടനമാണ് ' വിശ്വവിഖ്യാതമായ മൂക്കി'ന്റെ ഒരു കോപ്പി ബഷീര് ആടിന് തിന്നാൻ കൊടുക്കുന്ന സന്ദർഭത്തിലൂടെ വെളിപ്പെടുത്തുന്നത്. സ്വന്തം നാട്ടിൽ താന് എഴുതിയ പുസ്തകം ആരെങ്കിലും കാശ് കൊടുത്തു വാങ്ങിക്കുമോ? എന്ന സന്ദേഹത്തിലും സാഹിത്യത്തിന്റെ വിപണനതലം ബഷീർ വെളിപ്പെടുത്തുന്നുണ്ട്. എഴുത്തിലെ ജീവിതത്തെ ആസ്വദിക്കുന്ന സമൂഹം എഴുത്തുകാരന്റെ ജീവിതത്തെകൂടി കാണാന് തയ്യാറാവണമെന്ന് ബഷീർ വ്യക്തമാക്കുകയാണിവിടെ.

" ഇക്കാക്ക അതെല്ലാം ഇങ്ങ് എഴുതി തന്നാൽ മതി ഞാന് അച്ചടിപ്പിച്ചു വിറ്റോളാം". "വിറ്റാകാശ് കിട്ടുവോ" "എന്തുകമ്മീഷൻ തരും" - എന്നിങ്ങനെ മാത്രം ബഷീറിന്റെ സാഹിത്യ പ്രവർത്തനത്തെ നോക്കിക്കാണുന്നവരാണ് അബ്ദുൾഖാദര്, ഉമ്മ , അബൂ എന്നിവർ. പൊതുസമൂഹം എഴുത്തുകാരനെ വരുമാനമുള്ളവനായി തെറ്റിദ്ധരിക്കുന്നു. പോകുന്നതിനുമുൻപ് ഒരു നേരമെങ്കിലും വീട്ടിലെ പെണ്ണുങ്ങൾക്ക് വയറു നിറച്ച് ചോറുകൊടുക്കണം. എന്ന ആഗ്രഹവുമായി കഴിയുന്ന ബഷീറിന്റെ ചിത്രം നോവലിലുണ്ട്. ഇങ്ങനെ ആഗ്രഹിക്കാൻ മാത്രമേ അദ്ദേഹത്തിനാവുന്നുള്ളൂ.

വീട്ടുകാർ, പണം, കാവൽ, പാത്രങ്ങള് എന്നിവയുടെ പേരുപറഞ്ഞാണ് ബഷീറിന്റെ വരുമാനത്തിന്റെ പങ്കുപറ്റുന്നത്. സാധാരണക്കാരന്റെചെറുജീവിതത്തിലെ ചെറിയ ആവിശ്യങ്ങളാണ് അദ്ദേഹത്തിന് പരിഗണിക്കേണ്ടിവരുന്നത്. എന്നാൽ അവ സാധിച്ചു കൊടുക്കാൻ പോലുമാവാത്ത നിസ്സഹായതയാണദ്ദേഹം അനുഭവിക്കുന്നത്. എഴുത്ത് തൊഴിലാക്കിയവന് അനുഭവിക്കേണ്ടിവരുന്നസാമ്പത്തികാരക്ഷിതാവസ്ഥയെയാണ് സ്വന്തം ജീവിതാവിഷ്കരണത്തിലൂടെ ബഷീര് നോവലില് വെളിപ്പെടുത്തിയിരിക്കുന്നത്. കൂലിപ്പണിക്കു പോലുമുള്ള സാമ്പത്തിക സ്ഥിരത എഴുത്തു തൊഴിലാക്കിയവനില്ല എന്ന സത്യം താനനുഭവിക്കുന്ന ദാരിദ്ര്യത്തിലൂടെബഷീര് വെളിപ്പെടുത്തുന്നു. " ഈ പണ്ടപ്പരപ്പ് പരാതീനങ്ങളെ മുഴുവൻ ലക്ഷിക്കണതമനല്ലേ" എന്ന അബ്ദുൾ ഖാദറിനെ കുറിച്ചുള്ള കുടുബത്തിലെ തർക്കങ്ങളില് നിസ്സഹായനായ സാക്ഷിയാവാനേ ബഷീറിവുന്നുള്ളൂ. വീട്ടുകാർ പ്രതീക്ഷിക്കുന്നതുപോലുള്ള വരുമാനം സാഹിത്യ രചനയിൽ നിന്ന് തനിക്ക് ലഭിക്കുന്നില്ല എന്ന് വെളിപ്പെടുത്താനുമാവുന്നില്ല.

എഴുത്തുകാരനും സമൂഹവും തമ്മിലുള്ള പാരസ്പര്യത്തെ തന്റെതായ നിലപാടില് ബഷീര് പാത്തുമ്മയുടെ ആടില് വിലയിരുത്തുന്നുണ്ട്. എഴുത്തുകാരനെ അവഗണിച്ച് സമൂഹം എഴുത്തിനെ മാത്രമാണ് പരിഗണിക്കുന്നത്. ബഷീർ നാട്ടിലുണ്ടെന്നറിഞ്ഞ് സ്കൂള് വാർഷികത്തില് പ്രസംഗിക്കാന് ക്ഷണിക്കാനെത്തുന്ന ഹെഡ്മാസ്റ്റര്, ആ സമയത്ത് താനിവിടെ ഉണ്ടാവില്ല എന്നു ബഷീർ പറയുമ്പോള് " ഞങ്ങൾ പേരച്ചടിക്കും, ഉണ്ടെങ്കിൽ വന്നാല് മതി" എന്നാണ് മറുപടി പറയുന്നത്.

എഴുത്തുകാരന്റെ പേരിന്റെ പ്രശസ്തി ഉപയോഗപ്പെടുത്തുന്നവര് തന്നെക്കുറിച്ച് പറയാനിടയായതെന്തെന്ന് ബഷീര് ഭാവന ചെയ്യുന്നു. സ്വന്തം അവസ്ഥയെക്കുറിച്ചുള്ള അപകർഷതയെക്കാളും, സമൂഹം എഴുത്തുകാരനെക്കുറിച്ച് കരുതാനിടയുള്ള തെറ്റായ ധാരണകളെയാണ് ബഷീർ വെളിപ്പെടുത്തുന്നത്. വലിയ എഴുത്തുകാരനായിരിക്കുമ്പോൾത്തന്നെ ചെറ്റക്കുടിലിലെ ദുരിതമാണ് താൻ അനുഭവിക്കുന്നതെന്ന ഓർമ്മപ്പെടുത്തല് കൂടിയാണിത്. തന്നെ നോക്കുന്നുവെന്ന് തെറ്റിദ്ധരിച്ച പെണ്കുട്ടികളുടെ നോട്ടം ചാമ്പങ്ങയിലായിരുന്നുവെന്ന് പറയുന്ന ബഷീര്, സാഹിത്യതാത്പര്യവും സാഹിത്യകാരനോടുള്ള ആദരവുമെല്ലാം സമൂഹത്തിന് ഉണ്ടായിരിക്കുമെന്ന് എഴുത്തുകാരന് കരുതുന്നത്, ഒരു മിഥ്യാധാരണ മാത്രമാണെന്ന് നർമ്മമധുരമായി സ്ഥാപിക്കുകയാണ്. എന്നാൽ തന്നിൽനിന്ന് ഓട്ടോ ഗ്രാഫ് ഒപ്പിട്ടുവാങ്ങാന് വന്ന പുസ്തകവായന ശീലമുള്ള തൊഴിലാളിപുത്രിയെ അവതരിപ്പിച്ചുകൊണ്ട് എക്കാലവും സാഹിത്യത്തെയും സാഹിത്യകാരനെയും അറിയുകയും ആദരിക്കുകയും ചെയ്യുന്നത് അടിസ്ഥാന വർഗ്ഗമാണെന്ന് സൗമ്യമായി ഓർമ്മപ്പെടുത്തുകയും ചെയ്യുന്നു.

ജീവിക്കാൻ വേണ്ടി എഴുതുകയും ജീവിതത്തെ തന്നെ എഴുത്താക്കുകയും ചെയ്ത സാഹിത്യകാരനാണ് ബഷീർ. എഴുത്തിൽ നിന്നുള്ള പ്രതിഫലം ഉപജീവനത്തിനുതകാത്തതില് അദ്ദേഹം അസ്വസ്ഥനായിരുന്നു[3]. കഥകൾ തുരുതുരാ എഴുതി പത്രങ്ങൾക്ക്അയച്ചുകൊടുക്കും. സസന്തോഷംപ്രസിദ്ധപ്പെടുത്തും. കാശ് ആരും തന്നിരുന്നില്ല. പ്രതിഫലം ചോദിക്കുന്നത് അന്ന് നിഷിദ്ധമായിരുന്നു. ജോലി ചെയ്താൽ കൂലി ചോദിക്കുന്നത് മഹാപാപമായിരുന്നു. സാഹിത്യരചന തൊഴിലാക്കിയ തന്റെ സാമ്പത്തികാരക്ഷിതാവസ്ഥ ബഷീര് വെളിപ്പെടുത്തിയിട്ടുണ്ട്. ഈ മാനസികാവസ്ഥ പാത്തുമ്മായുടെ ആടിലും കാണാം.

സഹിത്യം ഉത്പാദിപ്പിക്കുന്ന സാഹിത്യകരൻ ഒരു എഴുത്തു തൊഴിലാളിയാണെന്ന്, സാഹിത്യലോകം അംഗീകരിക്കാനിടയില്ലാത്ത യാഥാർത്ഥ്യത്തെയാണ് ബഷീര് സ്വന്തം ജീവിതാവസ്ഥയെ മുൻനിർത്തി ' പാത്തുമ്മയുടെ ആടിൽ' വെളിപ്പെടുത്തി യിരിക്കുന്നത്. അതേ സമയം ധന്യതയേറിയ സർഗ്ഗപ്രക്രിയയെ വിപണന വസ്തുവാക്കേണ്ടി വരുന്ന അവസ്ഥയുടെ അധാർമ്മികതയും അദ്ദേഹം ഇതില് വ്യക്തമാക്കുന്നുണ്ട്. ചന്തയിൽ വില്ക്കാന് പുസ്തകം കൊടുത്തയക്കുന്നതിലും ഈ മനോഭാവമാണുള്ളത്. എഴുത്തുകാരന്റെ സർഗ്ഗാത്മകതയും ജീവിതയാഥാർത്ഥ്യങ്ങളും തമ്മിലുള്ള സംഘർഷം ബഷീര് അനുഭവിക്കുന്നത് ഈ നോവലിൽ നിന്ന് വായിച്ചെടുക്കാം. അപ്പോൾ അത് ഒരു തമാശക്കഥയല്ലാതാവുന്നു.

ബഷീർ രൂപപ്പെടുത്തിയെടുത്ത ഭാഷയില് സപരിസരങ്ങളെയാണദ്ദേഹം കഥാവിഷയങ്ങളാക്കിയത്. ആർജ്ജവും, ആത്മാർഥതയും അതുവഴി ബഷീറിന്റെ എഴുത്തിന് ലഭിക്കുമായിരുന്നു. സ്വസ്ഥവും ശാന്തവുമായ അന്തരീക്ഷമില്ലായ്മ സൃഷ്ടിക്കുന്നമാനസിക സംഘർഷത്തെ, എഴുത്തിനുള്ള ഉപാധിയാക്കികൊണ്ട് സഹിക്കുന്ന, ഒപ്പം

രസിച്ചാസ്വദിക്കുകയും ചെയ്യുന്ന ബഷീറെന്ന എഴുത്തുകാരനെ ഈ നോവലിൽ - 'പാത്തുമ്മയുടെ ആടിൽ' - കാണാം.

ആത്മപരതയെ നോവലാക്കാൻ വലിയ ഭാവന ആവശ്യമാണ്' എന്ന് ശ്രീ എസ്സ്. ഗുപ്തൻ നായര് നിരീക്ഷിച്ചിട്ടുണ്ട്. എന്നാൽ ജീവിക്കാനുള്ള വക കണ്ടെത്താൻ സാഹിത്യ രചനയെ ആശ്രയിച്ച ബഷീര്, തന്റെ ഭാവനാ പരിമിതിയെ ആത്മപരതയുടെ ആത്മാർത്ഥതകൊണ്ട് അതിജീവിച്ചു. വ്യക്തി ജീവിതത്തിലെ നിസ്സാരതകളെ എഴുത്തിന്റെ ഗംഭീരതകളാക്കി മറ്റുന്ന ബഷീറിന്റെ രാസവിദ്യ പാത്തുമ്മയുടെ ആടില് കാണാം.സാഹിത്യകാരന്റെ ജീവിതവും അയാളുടെ എഴുത്തും ഉദാത്തമായി പരസ്പരാദേശം നടത്തുന്നത് അനുഭവിപ്പിക്കാന് കഴിയുന്നുഎന്നത്പാത്തുമ്മയുടെ ആടിനെഒരു വിശിഷ്ടരചനയാക്കുന്നു.

**സഹായക ഗ്രന്ഥങ്ങൾ:**


പോൾ മണലില് - മലയാളത്തിന്റെ ബഷീര്

ഡി.സി ബുക്സ്, കോട്ടയം 1988

സാനു എം.കെ. - ബഷീര് വർത്തമാനത്തിന്റെ ഭാവി, ആശയം ബുക്സ്, കോഴിക്കോട്, 1994.

റഹ്മാൻ എം.എ - ആടും മനുഷ്യരും, ഡി.സി ബുക്സ്, കോട്ടയം1995.


****************

 ISSN - 2277-2359

# ॥पाणिनीयव्याकरणप्रत्ययार्थपरिचयः॥

**डॉ.विजयलक्ष्मी राधाकृष्णन्**
सहायकाध्यापिका, व्याकरण विभागः।

प्रकृति प्रत्ययात्मकपदरूपशब्दानाम् अर्थज्ञानार्थं व्याकरणशास्त्रे अनेके ग्रन्थाः सन्तीति विदितमेव सर्वैरपि विद्वद्भिः। तेषु व्याकरणाध्ययनप्रवृत्तानां छात्राणां व्याकरणशास्त्रसारांशज्ञानपिपासूनाञ्चअक्लेशेन व्याकरणशास्त्रज्ञानार्थं श्रीभट्टोजिदीक्षितप्रणीतः सिद्धान्तकौमुदी-ग्रन्थःप्रथमस्थानमलङ्करोतीति निश्चप्रचम्। पण्डितप्रकाण्डैः श्रीभट्टोजिदीक्षितमहोदयैः प्रायशः सर्वेषु शास्त्रेषु ग्रन्थाः रचिताः। तेषु सिद्धान्तकौमुद्यां सुबाद्यनेकप्रत्ययानाम् अर्थः तथा समासादिविचाराश्च साधु निरूपिताः सन्ति॥

**"सिद्धे शब्दार्थसम्बन्धे लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते यथा लौकिकवैदिकेषु कृतान्तेषु"**[1]इत्यादि भाष्यवार्तिकेन शब्दः अर्थः तयोः सम्बन्धञ्च नित्य इत्युक्तम्। तथा सति शास्त्रस्य'निष्प्रयोजनत्वापत्तौ उच्यते शास्त्रज्ञानपूर्वकशब्दप्रयोगेणैव अदृष्टं पुण्यं फलं सिद्ध्यति' इति। वस्तुतः धनम् वनम्, पचति अपचत् इत्यादयः सर्वेऽपि शब्दाः सिद्धाः अथवा नित्याः। 'शब्दः कूटस्थैरविचालिभिः वर्णैः भवितव्यमनपायोपजनविकारिभिः'[2]। तथापि अस्मादृशानां कृते शब्दानां प्रकृतिप्रत्ययादिविभागपूर्वक-निष्कृष्यज्ञानाय शास्त्रेण उपदेशः क्रियते। तथा च राम इति शब्दात् सु प्रत्यये एकोऽर्थः, अम् प्रत्यये अपरः, टाप्रत्यये ततोऽन्य इत्यादि विविधप्रत्यययोगे विविधार्थः इत्यादि बोधनाय शास्त्रेण धातुप्रातिपदिकादिप्रकृतिविभागः. सुप्तिङ् इत्यादि प्रत्ययविभागश्च कृतः॥

प्रत्ययार्थाः प्राधान्येन एवं विभक्ताः - सुप् प्रत्ययार्थः, तिङ्प्रत्ययार्थः, तद्धितप्रत्ययार्थः, णिच् प्रत्ययार्थः सन् प्रत्ययार्थः यङ्प्रत्ययार्थः, नामधातुप्रत्ययार्थः, सनाद्यन्तप्रत्ययार्थः, भावकर्मप्रत्ययार्थः, कर्म-कर्तृत्ययार्थः,कृत्यप्रत्ययार्थः,

---

[1]महाभाष्यम्।
[2]महाभाष्यम्।

कृत्प्रत्ययार्थः, स्त्रीप्रत्ययार्थः इत्यादयः। एवं समासान्त टजादिप्रत्ययार्थाश्च सन्ति। एषां प्रत्ययार्थानां सामान्यपरिचयः अत्र दीयते॥

**सुपप्रत्ययार्थः** –'स्वौजसमौट्'[1] इत्यादिना सुप्प्रत्ययाः विधीयन्ते। एते प्रत्ययाः प्रातिपदिकेभ्यः आगच्छन्ति यथा राम (प्रातिपदिकम्) सु (सुप् प्रत्ययः) रामः इति पदम्। व्याकरणशास्त्रे 'अपदं न प्रयुञ्जीत'[2] इति कश्चन सिद्धान्तः अस्ति। वाक्ये प्रत्येकः शब्दः पदमेव भवेत् इत्यर्थः। अतः केवलप्रातिपदिकस्य केवलधातोः वा वाक्ये प्रयोगः भवितुं नार्हति। प्रथमं तस्मात् पदस्य निर्माणं कृत्वा अनन्तरं वाक्ये प्रयोगः करणीयः। सु औ जस् इत्यादीनाम् एकविंशतिप्रत्ययानाम् अर्थविशेषाः उच्यन्ते॥

अत्र सु औ जस् इति प्रथमाविभक्त्यर्थबोधकप्रत्ययानां 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यनेन प्रातिपदिकाद्यर्थाः एकत्वं द्वित्वं बहुत्वं चार्थम्। द्वितीयाविभक्तेस्तु (अम् औट् शस्) प्रातिपादिकातिरिक्तकर्मत्वद्योतकत्वं संख्या चार्थः। टा भ्यां भ्यस् इति तृतीयत्रिकस्य कर्तृत्वं करणत्वञ्चार्थः। ङे भ्याम् भ्यस् इति चतुर्थत्रिकस्य सम्प्रदानत्वम् अथवा दानोद्देश्यकत्वम् अर्थः। ङसि भ्याम् भ्यस् इति पञ्चमीविभक्तेः विश्लेषाश्रयध्रुव-अवधिभूत-अपादानत्वमर्थः। ङस् ओस् आम् इति षष्ठीविभक्तेः स्वस्वामिभावसम्बन्ध पितृपुत्रभाव निमित्त निमित्ति भावादयः सम्बन्धाः अर्थः। ङि ओस् सुप् इति सप्तमीविभक्तेः'आधारोधिकरणम्'[3] इत्यनेन अधिकरणत्वमर्थः। तच्च अधिकरणं वैषयिकम्, अभिव्यापकम्, औपश्लेषिकम् इत्यादि भिन्नाः॥

**स्त्रीप्रत्ययार्थाः**- ते च प्रायोग टाप् डाप् चाप्, ङीप् ङीष् ङीन् ऊङ् ति इति। एते प्रत्ययाः प्रकृतेः विद्यमानस्त्रीत्वार्थकत्वं द्योतयन्ति। ते न स्त्रीवाचकाः अपि तु द्योतकाः एव। टाबादीनां वाचकत्वे'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्'[4]

---

[1]अष्टाध्यायी 4/1/2

[2]अष्टाध्यायी 2/3/46

[3]अष्टाध्यायी 1/4/45

[4]भूषणसारः। प्रकृति प्रत्ययं सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्राधान्यम्। पाचकः औपगवः इत्यादिस्थलेषु कर्तुरपत्यार्थस्य च प्राधान्यवद् इति।

इति न्यायेन स्त्रीत्वार्थस्य प्राधान्यं प्रकृत्यर्थस्य अप्राधान्यं स्यात् इत्यतः टाबादीनां स्त्रीत्वद्योतकत्वमेव। पञ्चकं प्रतिपदिकार्थः इति पक्षे प्रवृत्तिनिमित्तं, व्यक्ति, लिङ्गं, संख्या कारकश्चेति प्रातिपदिकार्थः इति पक्षे लिङ्गोऽपि प्रातिपदिकार्थः। तथा सति प्रत्ययः केवलं स्त्रीत्वद्योतका एव। यथा तटः इत्युक्ते पुल्लिङ्गः तटी इति ङीप् प्रत्ययसभिव्याहारे स्त्रीलिङ्ग इति तटम् इत्यत्र नपुंसकलिङ्ग इति च बोधः॥

**तिङ्प्रत्ययार्थः** – 'तिङ्'[1] इत्यनेन अष्टादशप्रत्ययानां ग्रहणम्। एते प्रत्ययाः धातुभ्यः आगच्छन्ति। यथा अस् (धातुः) ति (तिङ्प्रत्ययः)अस्ति इति पदम्। तिङ्-प्रत्ययेषु आद्यनवप्रत्ययाः परस्मैपदसंज्ञकाः अन्ये तु नव आत्मनेपदसंज्ञकाश्च। प्रायेण कर्तृकर्मसंख्याकालश्च तिङर्थः। सकर्मक-अकर्मकभेदेन धातवः द्विधा भवन्ति। अत्र सकर्मकधातुनांलकाराःकर्तरिकर्मणिचसन्ति।अकर्मकेभ्यस्तुभावे कर्तरिचस्युः। तथा च सकर्मकधातुभ्यः कर्तृविवज्ञायां लकारः भवति तर्हि तदादेशभूततिङामपि कर्तृत्वमर्थः। एकत्वविवक्षायामेकवचनम्, द्वित्वविवक्षायां द्विवचनं बहुत्वविवक्षायां बहुवचनञ्च भवतीत्यतः संख्या अपि तिङर्थः। वर्तमाने लट्, अनद्यतने लुट् इत्यादिना लटादयः वर्तमानादिकाले विधीयते इत्यतः तदादेशभूततिङामपि वर्तमानत्वादिकालोऽप्यर्थः।[2] एवञ्च पच् इत्यादि धातोः कर्तृविवक्षायां जायमान लङादीनामादेशभूततिङां कर्तृत्वं एकत्वादिसंख्या, वर्तमानत्वञ्चार्थः। बभूव इत्यत्र तु अनद्यतनभूत-परोक्षार्थवृत्तित्वरूपकालः कर्तृत्वमेकत्वञ्च ति प्रत्ययार्थः। भविता इत्यत्र तु अनद्यतनभविष्यत्कालकर्तृत्वं एकत्वञ्चार्थः। भविष्यति इत्यत्र अधिकतया सामान्यभविष्यदर्थः। भवेत् इत्यत्र विध्याद्यर्थः अधिकः। भूयात् इत्यत्र आशीरर्थः। भवतु इत्यत्र विधिनिमन्त्रणादयः। अभवत् इत्यत्र अनद्यतनभूतार्थः। अभूत् इत्यत्र सामान्य भूतार्थे लुङ् लकारः। अभविष्यत् इति हेतुहेतुमद् भावे द्योत्ये भूतार्थे लृङ्। आत्मनेपदेषु क्रियायाः फलं कर्तृगामी इति। 'अनुदात्तङितः आत्मनेपदम्'[3],'स्वरितञितः कर्त्रभिप्राये कियाफले'[1] इत्यनेन फलस्य कर्तृगामित्वे

[1]तिप् तस् झि – अष्टाध्यायी 3/4/78

[2]भूषणसारः।

[3]अष्टाध्यायी 1/3/12

एव आत्मनेपदप्रत्ययाः विधीयन्ते। यथा रामः पचति इत्यत्र रामः अन्येषां भक्षणाय पचति इति। किन्तु रामः पचते इत्युक्ते रामः स्वार्थं पाकं करोतीत्यर्थः भवति। एवं दशगणेषु दशविकारणप्रत्ययाः विधीयन्ते। ते तु सार्वधातुकप्रत्यये परे एव धातोः विधीयन्ते। तेषां प्राधान्येन स्वप्रकृत्यर्थान्यतरार्थं प्रत्यायकत्वं नास्ति। भ्वादिगणे 'कर्तरिशप्'[2] इति शप् प्रत्ययः सार्वधातुके परे विधीयते। ते च प्रायेण लट्, लोट्, विधिलिङ्, लङ् चेति चत्वार एव। अदादिगणे तु सार्वधातुकलकारेषु विधीयमान शपः 'अदिप्रभृतिभ्य शपः'[3] इति लुक् भवति। 'जुहोत्यादिभ्यः स्लुः'[4] इत्यनेन श्लु भवति। श्लौ इत्यनेन द्यातोः द्वित्वं भवति। दिवादिगण पठितानां धातूनां सार्वधातुके परे 'दिवादिभ्यः श्यन्'[5] इति श्यन् प्रत्ययः भवति। स्वादिभ्यस्तु 'स्वादिभ्यः श्नु'[6] इति श्नुप्रत्ययः। तुदादिभ्यः 'तुदादिभ्यः शः'[7] इति शप्रत्ययः। क्र्यादिभ्यः, 'क्र्यादिभ्यः श्ना' [8] इति श्ना प्रत्ययः। चुरादिभ्यस्तु 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्म वर्णचूर्णचुरादिभ्योणिच्' इति णिच् प्रत्ययश्च। एवं दश विकरणप्रत्ययाः॥

**णिचप्रत्ययार्थः।**'हेतुमति च' इत्यनेन प्रयोजकव्यापारे प्रेषणादौ च वाच्ये धातोः णिच् प्रत्ययः विधीयते। चौरादिकणिच् प्रत्ययातिरिक्त प्रेरणाद्यर्थे णिच् प्रत्ययः इति। प्रेषणादि इत्यनेन प्रेषणं अन्वेषणं अनुमति उपदेशादीनां ग्रहणम्। एष्वर्थेषु णिच् प्रत्ययः विधीयते। पठति इति अणौ रूपम् णौ तु पाठयति, पठितुं प्रेरयतीत्यर्थः। एवं भावयति इति णौ रूपम्। अत्र हेतुरित्यनेन 'तत्प्रयोजको हेतुश्च'[9] इति सूत्रेण विधीयमानः हेतोः ग्रहणम्। कर्तृः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्। प्रयोजक

---

[1]अष्टाध्यायी 8/2/6
[2]अष्टाध्यायी 3/1/68
[3]अष्टाध्यायी 2/4/72
[4]अष्टाध्यायी 2/4/75
[5]अष्टाध्यायी 3/1/69
[6]अष्टाध्यायी 3/1/73
[7]अष्टाध्यायी 3/1/771
[8]अष्टाध्यायी 3/1/81
[9]अष्टाध्यायी 1/4/55

 ISSN - 2277-2359

इत्यनेन प्रवर्तयितुः ग्रहणम्। एवं च प्रयोजकव्यापारः हेतुप्रयोजकनिष्ठप्रेषणादिव्यापारः च वाच्ये धातोः णिच् प्रत्ययः भवति। भृत्यादेः निष्कृष्टस्य प्रवर्तना प्रेषणं आज्ञेत्यर्थः। समानस्य अधिकस्य च संख्या आचार्यादः प्रवर्तना अध्येषणा। राजादेः सम्मतिः अनुमति। ज्वरितस्य कषायपाने हितावबोधनेन प्रवर्तना उपदेशः। हननात् भीत्या पलायमानस्य निरोधकरणमपि प्रयोजकव्यापारः। प्रयोजकनिष्टप्रवर्तनायां णिच् प्रत्ययः। एते प्रेषणादयः प्रकरणादिना अवगम्यते। घटं करोति इति अणौरूपम्। तत्र प्रयोज्यप्रयोजकोभय-समभिव्याहाराभावात् न णिच् प्रत्ययः। उदाः- भवन्तं प्रेरयति भावयति। देवदत्तः यज्वा भवति तं प्रेरयति याजक इत्यर्थे भूधात्वर्थस्य भवनस्य मुख्यकर्ता यज्वा तस्य यज्वभवने प्रवर्तयिता याजकादिः प्रयोजनकः तन्निष्टानां प्रेरणायां भू धातोः णिच् प्रत्ययः भवति। णित्वात् 'अचो ञ्णिति'[1] इति सूत्रेण वृद्धौ आवादेश शपि गुणे अयादेशे च भावयति। धात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलस्य कर्तृगामित्वे 'णिचश्च'[2] इत्यनेन आत्मनेपदे भावयते इति॥

**सन्प्रत्ययार्थः-** सन्प्रत्ययः सामान्यतः इच्छार्थेविधीयते।'धातोःकर्मणः समानकर्तृकादिच्छायाता' [3] इति सूत्रेण सन्प्रत्ययः विधीयते। अस्मिन् सूत्रे 'गुप्तिज्किद्भ्यः सन्'[4] इति सूत्रात् सन्नित्यनुवर्तते। इच्छायाः कर्मत्वमत्र विरक्षितम्। अत्र समानकर्तृत्वं इच्छानिरूपितमेव। कमेति स्ववाचकशब्दद्वारा धातौ सामानाधिकरण्येनान्वेति। एवञ्च इच्छासमानकर्तृत्वे सति इच्छाकर्मीभूतौ यो व्यापारः तद्वाचकात् धातोः इच्छायां सन् वा स्यादिति सूत्रार्थः। अत्र इषिकर्मीभूतव्यापारवाचकत्वात् धातोः सन् इत्यर्थः। धातोः सन् विधानात् तस्य आर्धधातुकसंज्ञा। धातोः विहितस्यैवआर्धधातुकसंज्ञा। न तु धातोः परेषाम्। आर्धधातुकत्वेन सनि आर्धाधातुकस्येड्वलादेः इति इडागमसिद्धिः। यथा पठितुपमिच्छति पिपठिषति। पठितुमिति तुमुन्नन्तम्।एकनिष्ठा पाठगोचरा वर्तमान

---

[1]अष्टाध्यायी 7/2/115

[2]अष्टाध्यायी 1/3/74

[3]अष्टाध्यायी 3/1/7

[4]अष्टाध्यायी 3/1/5

इच्छेत्यर्थः। पठ् धातोः इच्छार्थे सन् प्रत्यये 'सन्यङो'[1] इत्यनेन द्वित्वे हलादिशेपे 'सन्यतः'[2] इति अभ्यासस्य इत्वे सनः आर्धधातुकत्वेन इडागमे पिपठिष इत्यस्य 'सनाद्यन्ता धातवः' [3] इति धातुत्वात् लटि तिपि षत्वे पिपठिषति। कृत्तद्धिसमासैकशेष सनाद्यन्तधातुरूपाः पञ्चवृत्तयः। सनादयस्तु-

**'सन् काच् काम्यच् काङ् क्यवोऽथाचारकिप णिच् यङौ तथा।**

**यगाय ईयङ णिङ् चेति द्वादशामी सनादयः'।**

**यङ्प्रत्ययार्थः**- 'धातोरेकाचो हलादेः क्रिया समभिहारे यङ्'[4] इति सूत्रेण यङ् प्रत्ययः। पौनःपुन्ये भृशार्थे च द्योत्ये यङ् प्रत्ययः पिधीयते। पौनः पुन्यं भृशार्थञ्च क्रिया समभिहारः तस्मिन् द्योत्ये यङ् प्रत्ययः भवतीत्यर्थः। यः धातुः एकाच् हलादिश्च भवति तसमात् धातोः यङ् प्रत्ययः भवति। पौनः पुन्येन पुनः पुनः भवति अथवा अतिशयेन भवतीत्यर्थः। धातोः अर्थः पौनपुन्यं भवति अथवा अतिशयेन भवतीत्यर्थः। धातोः अर्थः पौनः पुन्यं भृषार्थश्च। भू धातोः पौनः पुन्ये भृशार्थे च वाच्ये 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्'[5] इति सूत्रेण यङ् प्रत्यये सन्यङोः इति द्वित्वे भूभूय इत्यत्र 'गुणोयङ् लुकोः' इत्यनेन गुणे भोभूय इत्यत्र 'गुणो यङ्लुकोः' इत्यनेन गुणे भोभूय इत्यत्र 'अभ्यासे चर्च' इति जश्त्वे बोभूय इति जाते 'सनाद्यन्ता धातवः' इति यङन्तस्य धातुत्वात् लटि ङित्वात् आत्मनेपदे तप्रत्यये शपि टेरेत्वे अतो गुणे इति पररूपे बोभूयते इति॥

**यङ्लुके प्रकरणे** तु यङ् प्रत्ययः भवति किन्तु 'यङोऽचिच' इत्यनेन तस्य लुक भवति। यङ्लुक्यपि यङीव 'गुणो यङ्लुकोः'[6] इति द्वित्वादयः भवत्येव। यङ्लुकि बोभवीति इत्युदाहरणम्॥

---

[1]अष्टाध्यायी 6/1/9

[2]अष्टाध्यायी 6/4/79

[3]अष्टाध्यायी 3/1/32

[4]अष्टाध्यायी 3/1/22

[5]अष्टाध्यायी 2/4/74

[6]अष्टाध्यायी 7/4/82

**सनाद्यन्तधातुरूपप्रत्ययार्थाः** –'सनाद्यन्ता धातवः' इत्यनेन सनाद्यन्तानां धातुसंज्ञा। ते च सन् क्यच् काम्यच्, क्यङ्, क्यष्, आचारक्विप् णिच् यङ् यक् आय ईयङ् णिङ् चेति द्वादश प्रत्ययाः॥

**नामधातुप्रत्ययार्था** – नामावयकत्वे सति क्रियावाचकत्वं नामधातुत्वम्। यत्र नामैव प्रत्ययसम्बन्धात् धातुत्वं याति स नामधातुः। नामप्रकृति क्रिया वाचकप्रत्ययाधीनत्वेन तादृश्यः प्रत्ययाः काम्यच्, क्यच्, किप्, क्यङ् क्यप् णिङ् णिच् चेति सप्तानां ग्रहणम्। एतेषां प्रकृतयः नाम अथवा सुबन्तानि भवन्ति। 'सुपः आत्मनः क्यच्'[1] इत्यनेन सुबन्तात् क्यच् भवति। अत्र सुपः इत्यनेन 'प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति परिभाषया सुबन्त इति गृह्यते। अत्र इषि कर्मणः एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे काच् प्रत्ययः विभाषया विधीयते। अतः सुबन्तादेव क्यचादयः। क्यचादौ तु 'सनाद्यान्ताः धातवः' इति सूत्रेण क्यजन्तानां धातुत्वम्। अतः प्रथमतया सुबन्तप्रकृतिकः क्यजन्तत्वेन च धातुत्वमित्यतः तेषां नामधातुरिति संज्ञा। यथा पुत्रं आत्मनः इच्छति इत्यत्र पुत्र इति सुबन्तप्रकृतिकात् क्यचि तदन्तात् लटि पुत्रीयति इति नामधातुरूपम्। 'काम्यच् च'[2] इत्यनेन काम्यच् प्रत्यये पुत्रमात्यनः इच्छति इत्यर्थे पुत्रकाम्यति इति॥

**कृत्प्रत्ययार्थः** -धातुभ्यः द्विविधाः प्रत्ययाः भवन्ति। तिङ् प्रत्यायः कृत् प्रत्ययाश्च धातुभ्यः कृत् प्रत्ययानां योजनेन प्रातिपदिकं लभ्यते। प्रातिपदिकनिर्माणाय संस्कृतभाषायां कृत् प्रत्ययाः च उपज्यन्ते। 'धातोः' इत्यस्मात् विहिताः कृत् इति नाम्न अभिधीयन्ते। इमे प्रत्ययाः विशेषाव्ययनिर्माणाय धातुभ्यः विहिताः सन्ति। कृत् प्रत्ययानां संयोगेन ये शब्दाः व्युत्पन्नाः भवन्ति ते कृदन्तः इति नाम्ना अभिधीयन्ते। यथा डुकृञ् करणे इति धातोः तृच् प्रत्यये कर्तृशब्दः व्युत्पद्यते। अत्र तृच् इति प्रत्ययः कृत् प्रत्यायः कर्तृशब्दञ्च कृदन्तः। कर्तृशब्दः संज्ञाशब्दः। अतः अस्य रूपाणि अन्यसंज्ञाशब्दवत् सर्वासु विभक्तिषु प्रचलन्ति। कुदन्तशब्दाः संज्ञाविशेषण अव्ययरूपाः विविधाः भवन्ति। ये कृदन्ताः संज्ञाशब्दाः विशेषणशब्दाः वा भवन्ति

[1]अष्टाध्यायी 3/1/8

[2]अष्टाध्यायी 3/1/19

तेषां रूपाणि न प्रचलन्ति। ते एकरूपाः भवन्ति। यथा - गम्लृगतौ इति धातोः तृच् गम्लृ प्रत्यये गन्तृशब्दः व्युत्पन्नः। गन्तृशब्दः संज्ञा शब्दः। अस्य रूपाणि नामरूपाणीव। गम्तृ गतौ इति धातोः तृच् गम्लृ प्रत्यये गत्वा शब्दः। गत्वा शब्दः अव्ययमस्ति सः शब्दः एकरूपः एव। कृत् प्रत्ययाः मुख्यरूपेण त्रिधा भवन्ति। कृत्यप्रत्ययाः कृत् प्रत्ययाः उणादि प्रत्ययाश्च॥

**भावकर्म तिङ् प्रत्ययार्थः** –सकर्मकधातुभ्यः कर्मणि कर्तरि च लकाराः स्युः। अकर्मकेभ्यस्तु भावे कर्तरि च। कर्तरि लकाराणां तदादेशानां तिङामर्थाः तिङ्प्रत्ययार्थः। भावार्थे कर्मार्थे च विवक्षिते तिङां के के अर्थाः इति विचार्यते। भाव इत्यनेन भावः भावना। साध्यत्वेनाभिधीयमाना क्रिया इत्यादयःगृह्यन्ते। धात्वर्थव्यापारः विवक्षितः। धात्वर्थः व्यापारार्थकप्रत्ययाः भावे इत्यनेन गृह्यते। एवं कर्म – विवक्षायां कर्मणि लकाराः तदादेशभूततिङामपि कर्मत्वमर्थः। एवं लकारस्य भावविवक्षायां कर्मत्वविवक्षायाञ्च लकाराः भवन्ति। तत्र 'भावकर्मणोः'[1] इति सूत्रेण भावकर्मणि आत्मनेपदमेव। 'सार्वधातुके यक्'[2] इत्यनेन भावकर्मणि यक् प्रत्ययः। किन्तु भावे उत्सर्गेण प्रथमपुरुष एकवचनमेव भवति। कर्मणि तु सर्वेऽपि पुरुषवचनानि स्युः। भूयते इति लटि रूपम्॥

**कर्मकर्तृतिङ्प्रत्ययानाञ्च-** कर्मणः कर्मत्वाविवक्षया कर्तृत्वेन विवक्षयां कर्मकर्तरि लकाराः। तथा सति कर्मणः कर्तृत्वेन तृतीया अथवा प्रथमाविभक्तिः। तत्र कर्मणः कर्तृत्वविवक्षायां 'कर्मवत् कर्मणा तुल्यक्रियः'[3]इत्यनेन कर्तुः कर्मवद्भावः। तेन 'सार्वधातुके यक्' इति यक् आत्मनेपदञ्च लभ्यते। तत्र कर्मवद्भावेऽपि न 'कर्मणि द्वितीया' इति द्वितीयाविभक्तिः। लकारवाच्ये एव कर्ता कर्मवद् भवति इत्यतः न द्वितीया। अत एव कर्म कर्तृ कृत्य क्तखलर्थाः प्रत्ययाः न भवन्ति, कर्मणि ते विहिताः इति हेतोः॥

---

[1]अष्टाध्यायी 1/3/13

[2]अष्टाध्यायी 3/1/67

[3]अष्टाध्यायी 3/1/87

 ISSN - 2277-2359

**<u>कृत् प्रत्ययार्थाः</u>** –'कृदतिङ्'[1] इत्यनेन 'धातोः' इत्यधिकारे तिङभिन्नानां प्रत्ययानां कृत् संज्ञा। 'कर्तरि कृत्'[2] इत्यनेन कृत् प्रत्ययानां कर्तृत्वमर्थः। यथा पक्ता देवदत्तः इत्यादयः। 'ण्वुल्तृचौ' इति सूत्रपर्यन्तं 'कृत्याः' इति सूत्रस्य अधिकारात् 'तव्यत्तव्यनीयः' इत्यादीनां कृत्य इति। विशेषसंक्षा अपिविहिताः। 'कर्तरि कृत्' इति वत् कृत्यप्रत्ययाः अपि कर्तरि इति प्राप्ते तं बाधित्वा 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रेण भावकर्मणीरेव कृत्यप्रययः इति लभ्यते। कृत् प्रत्ययानां संयोगेन ये शब्दाः व्यत्पन्नाः भवन्ति ते कृदन्तनाम्ना अभिधीयन्ते। यथा डुकृञ् करणे इति धातोः तृच् प्रत्यये कर्तृशब्दः व्युत्पद्यते। अत्र तृच् इति प्रत्ययः कृत् प्रत्ययः कर्तृशब्दञ्च कृदन्तः। कर्तृशब्दः संज्ञाशब्दः। गम्लृ गतौ इति धातोः कत्वा प्रत्यये गत्वा शब्दः। गत्वा शब्दः अव्ययमस्ति। कृत् प्रत्ययाः मुख्यरूपेण त्रिधा भवन्ति कृत् प्रत्ययाः उणादि प्रत्ययाश्च। कृत् प्रत्ययाः उणादि प्रत्ययाशकृत्यप्रत्ययाः तव्यत्, तव्य, अनीयर्, केलिमर्, ण्यत्, यत्, क्यप् इत्यादयः। कृत् प्रत्ययाः ज्वुल्, तृच्, ल्यु, अच् णिनि, क, अण् इत्यादयः। पक्तव्या माषाः, स्नानीयं चूर्णम्, दानीयः विप्रः इत्याद्युदाहणानि कृत् प्रत्ययाः – च्, प्वन् ल्यु, अच् णिनि, क, अण् इत्यादयः।

**<u>तद्धितप्रत्ययार्थाः</u>** – तस्मै हितम् तद्धितम्।'तदिताः'[3] इति सूत्रात् 'यूनस्ति'[4] इति सूत्रमभिव्याप्य ये प्रत्ययाः विहिताः ते तद्धितसंज्ञकाः भवन्ति। विभक्ति लिङ्ग संख्या एतदर्थकात् भिन्नाः प्रत्ययाः तद्धित इत्यर्थः। तद्धितप्रत्ययानां प्रकृतिः नामानि अथवा सुबन्तानि न तु प्रातिपदिकम् न वा धातुः। विभक्तीनां नामप्रकृतिकत्वात् अथवा प्रातिपदिकादुत्पत्या नाम प्रकृतिक प्रत्ययः इत्युक्ते दोषः। नामधातूनामपि नाम प्रकृतिकत्वात् दोषः आपद्येत। पुत्र इव आचरति पुत्रीयति छात्रम् इत्यादीपुत्र इतिनामप्रकृतिकात् काच् प्रत्ययः। तद्धितः द्विधा – प्रकृत्यर्थभिन्नार्थः स्वार्थिकश्चेति। स्वार्थिक इत्यनेन स्वप्रकृत्यर्थक एव ये प्रत्ययाः भवन्ति ते स्वार्थिकाः। तद्धितः पञ्चसु वृत्तिषु

[1]अष्टाध्यायी 3/1/93
[2]अष्टाध्यायी 3/4/67
[3]अष्टाध्यायी 4/1/73
[4]अष्टाध्यायी 4/1/77

अन्यतमः। सर्वे शब्दाः धातुजमाह इति न्यायेन सर्वेषामपि मूलप्रकृतिः धातुरेव। धातोः विधीयमान कृत् प्रत्ययाः प्राथमिकप्रत्ययाः। कृत् प्रत्ययेन नामरूपाणि उपजायन्ते। तदनन्तरं तन्नामप्रकृतिकात् द्वितीयप्रत्ययाः तद्धितार्थप्रत्ययाः। तेषाञ्च अपत्यादिविकाराद्यर्थाः। उपगोरपत्यं औपगवः। चातुरर्थिकप्रत्ययस्य – कुशाम्बेन निवृत्तं नगरे कौशाम्बी (निष्कौशाम्बी) शैषिके – पाणिनिना प्रोक्तं पाणिनीयम्। विनतायाः अपत्यं वैनतेयः। रक्ताद्यर्थे – कषायेण रक्तं वस्त्रम् इत्यत्र 'तेन रक्तं रागात्' इति अण् काषायमिति। चातुरर्थिके – उदुम्बराः सन्त्यस्मिन् देशे इति अण् – औदुम्बर इत्यादश्च तद्धितान्ताः॥

**समासान्तप्रत्ययार्थाः** – 'समासान्ताः'[1] इत्यधिकृत्य समासान्तप्रत्ययाः विहिताः। समासप्रक्रियायां कुत्रचित् अन्तिमे कश्चन तद्धितप्रत्ययः विधीयते अयं प्रत्ययः समासान्तप्रत्ययः। अस्य प्रत्ययस्य प्रयोगंविना समास्य निर्माणमेव न भवति। यथा मग्राणां राजा इत्यत्र एतादृशाः समासः भवति। मद्राणां राजा इति षष्ठीतत्पुरुषसमासः। मद्र आम् राजन् सु इत्यलौकिकविग्रहेसमासत्वात् प्रातिपदिकत्वे सुपः लुकि मद्रराजन् इत्यत्र 'राजाहस्सखिभ्यष्टच्'[2] इति टच् प्रत्ययः। अयं समासान्तप्रत्ययः। टकारचकारयोः इत् संज्ञायां लोपे 'नस्तद्धिते'[3] इति टिलोपे मद्रराजः इति समासः। यदि अत्र टच् इति प्रत्ययः न चेत् मद्रराजन् इत्यनिष्टं रूपं सिद्ध्येत्। अव्ययीभावादिसमासानां समासप्रत्ययाः विधीयन्ते। तेषां प्रत्येकमर्थवत्वं नास्ति। स्वार्थिक एव भवन्ति। 'अव्ययी भावे शरत् प्रभृतिभ्यः'[4] इत्यनेन शरदादिगणे विद्यमानेभ्यः शब्देभ्यः अव्ययीभावे टच् विधीयते। 'सर्वत्र अव्ययं विभक्ति' इत्यनेन अव्ययीभाव समासः। शरदः समीपं उपशरदम् इति। 'अक्ष्णोऽदर्शनात्'[5] इत्यच् प्रत्ययः, [6] 'अचतुरविचतुर' इत्यच् प्रत्ययः, 'ऋक्पूरब्धू पथामानक्षे' इत्यनेन 'अ'

[1]अष्टाध्यायी 5/4/68
[2]अष्टाध्यायी 5/4/91
[3]अष्टाध्यायी 6/4/144
[4]अष्टाध्यायी 5/4/107
[5]अष्टाध्यायी 5/4/73
[6]अष्टाध्यायी 5/4/77

 ISSN - 2277-2359

प्रत्ययः। सर्वे समासान्तप्रत्ययाः। सर्वेषु समासेषु समासान्नप्रत्ययाः न भवन्ति। केषु चन समासेषु केषाञ्चन शब्दानां विषये एव समासप्रक्रियायां समासान्तप्रत्ययः भवति। अस्मिन्नधिकारे पठिताः तद्धितप्रत्ययाः समासप्रक्रियायामेव प्रयोक्तव्याः। एतेषामन्यत्र वाक्येषु अथवा। पदनिर्माणे प्रयोगः नैव भवतुमर्हति॥

**॥ प्रत्ययार्थविचारः अत्र समाप्यते॥**

# ॥शिक्षणोपक्रमे कालिदासीयदिग्दर्शकप्रस्तुतयः॥

**डॉ.डि.वेणुगोपालरावः**

सहायकाध्यापकः, शिक्षाशास्त्रविभागः,

केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर् परिसरः

**यः क्रियावान् सः पण्डितः** इति संस्कृतसाहित्योपासकानां प्रामाणिकः कश्चन शैक्षिकसिद्धान्तः। सिद्धान्तस्यास्य प्रभावः वैदिकसाहित्यादारभ्याधुनिकसाहित्यं यावत् समेष्वपि शास्त्रेषु, तत्प्रतिपादकबुधां गूढार्थनिहितसाहित्यविचारेषु वा प्रस्फुटितो वर्तत एव। तदनु **योजकस्तत्र दुर्लभः** इति काचिदुक्तिरपि शैक्षिकसिद्धान्तस्यास्य बलप्रदायिनी आधारभूता वैव गणनीया भवति। उभयोरनयोः शैक्षिकसिद्धान्तयोः जन्मदाता इवावलोक्यते संस्कृतजगति **कविकुलगुरुः कालिदासः**। कालिदाससाहित्ये प्रस्तुतीकृतशैक्षिकविचाराणां दर्शनेन **नामूलं लिख्यते किञ्चित्, नानपेक्षितमुच्यते** इति मल्लिनाथोक्तिः नेत्रोन्मुखमायाति। तल्लक्षीकृत्यैवायं कालिदासः समस्ते स्वसाहित्यप्रकृते नैकान् शैक्षिकविचारान् दिग्दर्शकरूपेण कथानेपथ्यमनुगुणं तत्र तत्र प्रास्तुवदिति बुधां विचाराः। कथ्यते ह्युक्तिरेकास्य सारस्वसतकवेः विषये यथा-

**"पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठत कालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव"॥**

तत्तुल्यकवेरभावादित्येकं कथनं तस्य कालिदासस्य प्रजाभिमुखं विषयोपस्थापनौचित्य-विधानम् आत्मासात्करोति। **उपमा कालिदासस्य** इत्यपि काचिद्विशेषोक्तिः विषयोपस्थापनशैल्यां सर्वेभ्यः कविपुङ्गवेभ्यः तं कालिदासं पृथक्करोति। सहृदयाः सामान्यजनाः वा यथावगच्छेयुः तथैव विषयोपस्थापने अयमनन्य एवेति बुधामभिप्रायः। कासिदासस्य समस्तकृतिषु तत्कृतविषयप्रस्तुतिः, परिश्रमः, विचारः, सन्नद्धता, प्रयोगः, चिन्तनादीनि न केवलं साहित्यजगति, अपि च शिक्षाजगत्यपि विचारयोग्यान्येव भवन्ति। यथाहि कथ्यते यत्-

**आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥** इति।(अभि.शा.1.2)

इत्थमभिज्ञानशाकुन्तलग्रन्थारम्भे विषयोपक्रमावसरे सूत्रधार-पात्रतामाध्यमेन कालिदासेन प्रकटितविषय एवात्र शिक्षकाणां समेषां कृते वेदोक्तिरिवादर्शपूर्णः प्रमाणभूतश्च स्यात्। **आर्ये ! कथयामि ते भूतार्थमिति** सूत्रधारवचसा कासिदासः अस्मच्छिक्षकगणाय कक्षायां विषयोपस्थापनशैलीं मापनीं वा निर्दिशति यत्- विदुषाम् आपरितोषात् मम प्रयोगविज्ञानं न साधु मन्ये इति। बलवत् शिक्षितानामपि मनः स्वविषये अप्रत्ययमेव इति स्वयं शिक्षकाः स्वविषये गणनयोग्याः भवन्तीति यथार्थशैक्षिकविचारं प्रस्तौति कालिदासः। इत्थमनेके ये शैक्षिकविचाराः कालिदासेन अभिज्ञानशाकुन्तले ग्रन्थारम्भावसरे विषयेण सह गूढतया प्रतिपादिताः त एवात्राधुनास्मिन् शोधप्रबन्धे विचार्यन्ते॥

**कालिदासविषयप्रस्तुतेरौचित्यता** –

कालिदासः इति नाम्नापरिचितः कश्चन जनः भारते उत शिक्षाजगति न भवतीति कथने नातिशयोक्तिः। अत एव कथयन्ति केचन कवयः - **कवयः कालिदासाद्याः कवयो वयमप्यमी पर्वते परमाणौ च पदार्थत्वं व्यवस्थितम्** इति। समाजे प्रत्येकं मानवजन्मनः वा नैकानां भौतिकपदार्थतत्त्वानां प्राधान्यं कल्ययन्तः भारतीयाः कालिदासकवितामधिकृत्य कथयन्ति हि यत् – **कालिदासकविता नवं वयो, माहिषं दधि, सशर्करं पयः, ऐणमांसमबला च कोमला सम्भवन्तु मम जन्मजन्मनि** इति। एतदनु विशेषेण कालिदासविषये च कथ्यते यत् – **पुष्पेषु जाती, पुरुषेषु विष्णुः, नारीषु रम्भा, नगरीषु काञ्ची, वीरेषु रामः, विमलीषु पूषा, काव्येषु माघः, कविः कालिदासः** इति। कविः नाम कालिदास एव इति समस्तविचारेषु कालिदासाय मूर्धन्यस्थानमयच्छन् विद्वांसः। कालिदासस्य विषयोपस्थितिरनन्यानुपमाद्वितीयातुला इति वदन् मल्लिनाथः अवददेवम् – **कालिदासगिरां सारं कालिदासस्सरस्वती चतुर्मुखो अथवा साक्षाद्विदुर्नान्ये तु मादृशाः** इति। कालिदासस्य साहित्ये प्रत्येकं कथने निगूढविषयतत्त्वौचित्य-मस्तीति तदवगमने स एव कालिदासः सरस्वती चतुर्मुखः वैवावगच्छति नान्यः इति मल्लिनाथोक्तिं स्मरन्तः तत्तद्ग्रन्थपाठकाः स्वाभीष्टविषयान्वेषणे सफलाः भवेयुरिति कथने नातिशयोक्तिः॥

## शिक्षणप्रक्रिया & शिक्षणोपक्रमः –

**शिक्षा** काचित् मानवस्याजीवनप्रक्रिया इति शिक्षाविदः। शिक्षा शिक्षणमिति तत्त्वद्वयं प्रत्येकं मानवस्य जीवने तत्स्थितिबोधकं निर्धारकं वा भवति। सकारात्मकदिशा शिक्षां शिक्षणं वा विना मानवः साक्षात्पशुतुल्य एवेति समाजे गण्यते। सामाजिकक्षेत्रेक्षु सर्वेषु सामान्यस्तरादुन्नतस्तरं यावन्मानवः विशेषेणाभिधीयते इत्यत्रेयं शिक्षाथवेदं शिक्षणं वा मूलसूत्ररूपेण परिगण्यते। शिक्षाप्रक्रिया शिक्षणप्रक्रिया वा प्रधानरूपेण गुरुशिष्ययोः द्वयोर्मध्ये जायमाना काचिद्विशिष्टा शैक्षिकप्रक्रिया भवति। तत्रैकः विशिष्टः, शिक्षाकेन्द्रबिन्दुश्च भवति प्रथमः छात्रः। तत्रैवान्यः, अद्वितीयः, मार्गनिर्देशकः, पोषकः, तदाधारभूतश्च द्वितीयः भवति शिक्षकः। शिक्षा शिक्षणाधारिता, तच्छिक्षणं तु शिक्षकाधारितमिति लोकविदित विषय एव। स च शिक्षकः विशेषगुणयुतस्स्यादिति कालिदासः कथयति। तत्तु यथा मालविकाग्निमित्रे –

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव।।** इति।

शिक्षकः विषयज्ञानेन एव शिक्षकः न भवति। शिक्षके विषयज्ञानेन सह नैकानि विशिष्टानि तत्प्रतिपादकशिक्षणकौशलानि च भवेयुः इति निगूढतया मूल्यरूपेण च कालिदासः सूचयति। शिक्षकः जन्मना जायते इति कश्चन भारतीयप्राचीनविचारः तत्कालिक एवाभवन्नाधुनिकः इति सर्वेषामाधुनिकानां शिक्षकाणामनुभववेद्यविचार एव वर्तते। बालानां कृते शिक्षादः भवेत् अध्यापकः। तथापि शिक्षासमाजे सूक्ष्मेक्षिकयावलोक्यते चेत् भिन्नभिन्नप्रकारकाः शिक्षकाः दृश्यन्ते। केचन उत्तमरूपेण विषयज्ञाः, परन्तु विषयप्रतिपादककौशलानभिज्ञाः भवन्ति। तथैवान्ये केचन विषयप्रतिपादककौशलज्ञाः, परन्तु उत्तमविषयज्ञानानभिज्ञाः भवन्ति। उक्तरीत्या शिक्षाक्षेत्रे केनाप्येकप्रकारकेण अयोग्यास्सन्तः शिक्षकाः शिक्षणं विधास्यन्ति चेत् तदुत्तममेव न भवतीति सदृढं कालिदासः कथयति। येषु शिक्षकेषु ज्ञानेन सह तत्प्रदानकौशलञ्चेत्युभय-प्रकारकशक्तिः विद्यते तैः प्रदीयमाना शिक्षैव लोकहिताय कल्पते इति स्पष्टतयाभिव्यनक्ति कालिदासः।।

शिक्षाप्रक्रियायां शिक्षणकला काचिद्विशिष्टा कलेति शिक्षाविदः। तच्च शिक्षणं कालिदासोक्तरीत्या यस्मिन् उभयप्रकारकशक्तिर्विद्यते तेनैव सुसाध्यमिति सुस्पष्टमेव। तथापि शिक्षकेभ्यः सर्वेभ्यः शिक्षणोपक्रमः कश्चन सम्भ्रमात्मकः विषयः भवति। का योजना?, कः प्रक्रमः?,किं विधानं?,का प्रक्रिया? वानुसरणीयेति मतिविभ्रमः शिक्षणोपक्रमे समेभ्यः शिक्षकेभ्यः भवत्येव। निर्दिष्टा काचित् योजना प्रक्रिया वावश्य-मनुसरणीयेति प्रचीनार्वाचीनाः सर्वे शिक्षाविदः मुक्तकण्ठेनाङ्गीकुर्वन्त्येव। कञ्चन विषयं मनसि निधाय तु खण्डान्वय-प्रणाली, दण्डान्वयप्रणाली, आगमननिगमनप्रणाली, व्याख्याप्रणाली, प्रश्नोत्तरप्रणाली वा शिक्षकैः तच्छिक्षणावसरे अनुसरणीयेति साहित्यकप्रमाणानि उपलभ्यन्त एव। तदनु हर्बर्टीया पञ्चपदी, अभिक्रमिताधिगमः, प्रत्यक्षप्रणाली, परियोजना-प्रणाली, प्रयोगप्रणाली चेति नैकाः आधुनिकप्रक्रमाश्च विद्यन्ते। परन्तु कमपि विषयं स्वीकृत्य कक्षाप्रकोष्ठे निश्चितसमयान्तं यावत् कथं शिक्षकैः शिक्षणावसरे भाव्यमिति निश्चिता काचित् सम्पूर्णविधिविधानप्रक्रिया तु न विद्यते। तथापि शिक्षणप्रक्रियायां शिक्षणोपक्रमविषये कालिदासस्य ग्रन्थविषयोपक्रमः यश्चावलोक्यते तत्तु शिक्षकेभ्यः शिक्षणोपक्रमावसरे सर्वश्रेष्ठः आदर्शरूपः, प्रतिबिम्बसदृशश्च भवतीति गुरुविचारः॥

## शिक्षणयोजना तथा शिक्षणोपक्रमप्रस्तुतयः –

शिक्षकाय शिक्षणावसरे योजना काचिदुत्तमा लक्ष्यानुगामिनी च भवति। ग्रन्थारम्भे सन्नद्धता, योजना, विषयोपस्थितिः इत्यादिविषयाः शिक्षणोपक्रमतुल्यविषयाः एव भवन्ति। यथा शिक्षकः छात्राणामभिमुखं विषयमुपस्थापयति तथैव ग्रन्थकारः कविः तत्समसर्वप्रकारकपाठकानां सम्मुखं कथाविषयमुपस्थापयति एव। शिक्षकः कक्षायां निश्चितं विषयं प्रत्यक्षरूपेण छात्राणां पुरत एवोपस्थापयति। परन्तु कविः स्वमस्तिष्कं कथावस्तु परोक्षतयैव पाठकैस्सह स्वमानसकक्षाप्रकोष्ठे सत्सम्बन्धं संकल्प्यैव उपस्थापयति। शिक्षकः स्वशिक्षणावसरे छात्रैस्सह शैक्षिक-सम्बन्धे योग्यः भवति। कविः तु ग्रन्थान्तं यावत् स्वयमुभयप्रकारकश्च भवति। स एव शिक्षकतुल्यः अपि च स एव छात्रतुल्यश्च

 ISSN - 2277-2359

व्यवहरति। इत्थं शिक्षककार्यतुल्यं कवेः कार्यमिति विचार्यमाणे सति कालिदासस्य ग्रन्थोपक्रमविषयः शिक्षणोपक्रमविषयमाधत्ते। तत्र क्रमेण –

## आरम्भवाक्यानि अथवा प्रस्तावना –

शिक्षणे प्रारम्भिकवाक्यानि, आरम्भवाक्यानि, दैनिककथनानि, मङ्गलान्वेषककथनानि, शुभसूचकवचांसि, कुशलप्रश्नाः, परिचय-वाक्यानीति वा भिन्नभिन्नप्रकारेण कार्याणि शिक्षकैः कक्षारम्भे समाचर्यन्ते क्रियन्ते च। शिक्षणयोजनायाः नाम्ना या पाठयोजना लिख्यते तस्यां तु एतेषां कथनानामुल्लेखः न क्रियते शिक्षकैः। प्रश्नोत्तिरविधिना, संवादविधिना, चर्चाविधिना, कथाविधिना, चित्रमाध्यमेन वा प्रस्तावना विधीयते लिख्यते च। अनौपचारिकरूपेण प्रारम्भिककथनानि तु शिक्षकैः येनकेनापि प्रकारेण कथ्यन्त एव। विचारावसरे अस्मिन् ग्रन्थारम्भनान्दीविचारः विचारयोग्य एव भवति। कथारम्भे नाटकारम्भे वा कविः सूत्रधारपात्राताभिमुखत्वेन परिषदः पृष्टभागे विद्यमानस्सन् श्रोतृचिदाकर्षणाय मङ्गलरूपेण वस्तुनिर्देशरूपेण, आशीर्वादरूपेण, नमस्काररूपेण वा स्वाभिमतमुपस्थापयति। तदेव नान्दीश्लोकः इति काव्येषु निगद्यते। अभिज्ञानशाकुन्तलस्यारम्भे कालिदासः **या सृष्टिः स्रष्टुराद्या वहति . .** इत्येवं मङ्गलश्लोके इतिवृत्तान्तप्रस्तावञ्चाकरोत्। तत्र ईशः नाम दुष्यन्तः अथवा भरतः, या सृष्टिः नाम शकुन्तला, ये द्वे नाम शकुन्तलायाः सख्यौ, विश्वं व्याप्य नाम दुष्यन्तस्य कीर्तिः, विधिहुतं नाम शकुन्तलायाः गर्भधारणा इति बहुधा व्याख्याकारैः श्लोकोऽयं व्याख्यातः दृश्यते॥

अर्थादनेनावगम्यते यदारम्भे अपि विषयवस्त्वनुगुणमेव प्रारम्भिककथनानि शिक्षणोपक्रमे शिक्षकैः प्रोक्तव्यानीति। कथञ्चिदपि विषयप्रवेशः सम्पादनीयः इति मानसिकविचारः शिक्षकेषु न स्यात्। सृजनात्मकं, विचारात्मकं, मनोरञ्जनात्मकं, पाठोन्मुखीकरणात्मकमिति बहुधा चिन्तयन्तः शिक्षकाः विषयप्रस्तावात्मकः शिक्षणोपक्रमः स्यादिति विस्मरन्ति। उपक्रमे अथवा आरम्भकथनेषु एव मेरुदण्ड इव विंशति प्रतिशतं पाठ्यमानविषयप्रस्तुतिः सम्पाद्या वर्तते। नमस्ते, सुप्रभातं, कुशलिनः खलु इति सामान्यकुशलान्वेषणात्परं कथं सन्ति,

 ISSN - 2277-2359

भोजनं कृतं वा, भोजने किं विशिष्टं, किमर्थं भाषणं कुर्वन्ति, इतस्ततः भ्रमणं किमर्थं क्रियते इत्यादयः प्रश्नाः आवर्षं शिक्षकस्य शिक्षणोपक्रमे न भवेयुः। तथैव समाजे के के निवसन्ति, मानवाः कुत्र निवसन्ति, अस्माकं देशः कः इति अतिसामान्यप्रश्नाश्च न भवेयुः। यथा प्रत्येकं कविः स्वग्रन्थारम्भे मङ्गलसहितविषयोपक्रमं साधयति तथैव शिक्षकः प्रतिदिनं शिक्षणोपक्रमे विशेषशैलीमेव अनुसरेत्। प्रस्तावनायै आरम्भिकोपक्रमाय वा कालिदासस्य अभिज्ञानशाकुन्तलशैली शिक्षकेभ्यः दिव्यदर्पण एव॥

## शिक्षणे अभिमुखता तथा विषयप्रस्तुतीकरणञ्च -

**(नान्द्यन्ते प्रविशति सूत्रधारः)**

**सूत्रधारः – (नेपथ्याभिमुखमवलोक्य) आर्ये! यदि नेपथ्यविधानमवसितम्? तर्हीतस्तावदागम्यतमाम्।**

**नटी - (प्रविश्य) आर्य! इयमस्मि।**

**सूत्रधारः - आर्ये! अभिरूपभूयिष्ठा परिषदियम्। अत्र खलु कालिदासग्रथितवस्तुना अभिज्ञानशाकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः।**

नान्द्यन्ते प्रविशति सूत्रधारः, नेपथ्याभिमुखमवलोक्य इति पदद्वयमत्र विचारयोग्यं वर्तते। अनेन शिक्षकैर्ज्ञातव्यं वर्तते यत् – शिक्षकाः निश्चितरूपेण कक्षाप्रवेशानन्तरं स्थिरमेकत्र स्थित्वा कक्षाभिमुखमवलोक्य छात्राभिमुखमवलोक्य वा कार्यं सम्पादयेयुरिति। सन्दर्भेऽस्मिन् सूत्रधारः एव शिक्षत्वेन स्वीकरणीयः। **यदि नेपथ्यविधानमवसितं तर्हीतस्तावदागम्यतामिति** सूत्रधारस्य कथनं छात्राणां पठोन्मुखीकरणात्मककार्यमेव भवति। अनेन वाक्येन **पूर्वसन्नद्धता** काचिदपेक्षिता इति, तदपि अपेक्षितरूपेण विहिता वा नेति शिक्षणोपक्रमपूर्वकार्यं निर्दिश्यते। विषयप्रस्तुतीकरणसन्दर्भे प्रेरणापूर्वकम् तथा उत्साहवर्धनपूर्वकं च कथनानि वक्तव्यानीत्यत्र कालिदासः। **आर्ये! अभिरूपभूयिष्ठा परिषदिय**मितिसूत्रधारपात्रतामाध्यमेन कालिदासस्य यत्कथनं विद्यते तत्तु

प्रतिभावतां छात्राणामभिरूपभूयिष्टा कक्षेयमित स्वीकरणयोग्यं वर्तते। प्रतिभावतां बुद्धिमतां छात्राणां कक्षा इयं वर्तते। तस्यां कक्ष्यायामद्य अमुकनामधेयकपाठं पठ्यते अस्माभिः इति शिक्षकाः प्रेरणात्मकरूपेण पाठप्रस्तुतीकरणं सम्पादयेयुः। तदनु **तत्प्रतिपात्रमाधीयतां यत्नः** इति कालिदासनिर्देशरूपक-कथनवत् शिक्षकैः कक्ष्यायां विषयप्रस्तुतीकरणपुरस्सरमेव अनुदेशनकर्तव्यो-त्तरदायित्वरूपककथनमपि विधेयं भवति। तत्प्रतिपात्रमाधीयतां यत्नः इति कासिदासीयवाक्ये यत्नः इति पदं विशेषेण ग्राह्यं भवति। यथा शिक्षकैः पाठनाय यत्नः विधीयते तथैव छात्रैरपि प्रतिपदमवगमनाय निश्चितः यत्नः करणीय इति कालिदासः॥

नवेन नाटकेनोपस्थातव्यमस्माभिः इति कथनं कालिदासस्य विचारौन्नत्यदर्शने प्रामुख्यं भजति। अस्माभिः इति पदमत्र यथा सूत्रधारनटानां मध्ये मैत्रीभावं प्रकटयति तथैव कक्षाप्रकोष्ठे शिक्षणावसरे छात्राध्यापकयोर्मध्ये मैत्रीभावना स्यादिति निर्दिशति। शिक्षणावसरे शिक्षकैः मैत्रीभावनया विषयवस्तु पाठनीयम्। छात्राणां भागग्रहणं, छात्रैस्सह सुसम्पर्कः, क्रियाशीलता इत्यदिविचारान् **अस्माभिः** इति पदप्रयोगेण कालिदासः प्रकटयति। उपस्थातव्यं मया अथवा उपस्थातव्यं युष्माभिः इति पदप्रयोगः कालिदासेन न विहितः। द्वाभ्यां मिलित्वेति अर्थसूचकः पदप्रयोगः **अस्माभिः** इति कृतः वर्तते। आधुनिकशिक्षकेषु मिलित्वेति **मनोवैज्ञानिकभावना** शिक्षणावसरे न भवत्येव। अहं पाठयामि, भवन्तः श्रृण्वन्तु, अहं व्याख्यास्यामि श्रद्धया मौनेन च श्रूयताम्, अहं विवृणोमि मध्ये प्रश्नाः न करणीयाः, शिक्षणावसरे मध्ये मध्ये प्रलापो न विधेयः इति बहुविधकथनापेक्षया कालिदासप्रस्तुत्यनुसारं अस्माभिः मिलित्वा पाठने उपस्थातव्यमिति भावनां सम्पादयोयुः शिक्षकाः॥

**विषयोपक्रमः छात्रविश्वासश्च** –

शिक्षणे आत्मविश्वसः प्रधानः भवति। शिक्षकः आत्मविश्वासेन विषयप्रस्तुतौ दक्षः स्यात्। विषयावगाहने अथवा शिक्षककथनानुसरणे छात्रस्यापि आत्मविश्वासः सुस्थिरो भवेत्। आधुनिककक्षाप्रकोष्ठेषु बहूनां शिक्षकाणां मुखे आत्मनिर्भरता एव न दृश्यते। वाचने दोषाः, उच्चारणे अस्पष्टता, वाचनावसरे

कण्ठकम्पनम्, कक्षावलोकने इतस्ततः दर्शनम् इत्यादि अयोग्यताप्रदर्शकगुणाः एव अवलोक्यन्ते। विषयोपक्रमे शिक्षकस्यात्मविश्वासः एव तस्य शिक्षणप्रक्रियायाः मूल्याङ्कने मापनीवत्तिष्ठति। छात्राणां मुखचेष्टाः, शाद्बिकाशाब्दिकसङ्केताः, हावभावाश्च कक्ष्याशिक्षणे परोक्षतया मूल्याकलनतत्त्वानि भवन्ति। अभिरूपभूयिष्ठा परिषदियं, कालिदासग्रथितेन नवेन नाटकेनोपस्थातव्यं, तत्प्रतिपात्रमाधीयतामित्यादीनि कथनानि तु छात्रचेतनां जागरयन्ति। तदनु नट्याः इति कथनमत्र विचारणीयमेव वर्तते। यथाहि -

**सूत्रधारः** - **आर्ये! अभिरूपभूयिष्ठा परिषदियम्। अत्र खलु कालिदासग्रथितवस्तुना अभिज्ञानशाकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः।**

**नटी** - **सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते।**

**सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते** इति कथनं यथा नटीनटानां सूत्रधारस्य च विश्वासं तथा स्वीयायाः विश्वासं द्योतयति तथैव कक्ष्यायां छात्राः शिक्षकाश्च परस्परं, शिक्षणकर्मणि तथा अधिगमे स्वसिद्धतायां च विश्वासपात्राः भवेयुः। उभाभ्यां कृतपूर्वप्रयासः अत्र गणनीयः मूलभूतश्चेति सर्वैः ज्ञातव्यम्। **कालिदासग्रथितवस्तुना, उपस्थातव्यमस्माभिः** इति सूत्रधारस्य पदद्वयं तथा **सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते** इति नट्याः कथनं च पूर्वकृतप्रयासमेवञ्च कर्मणि विश्वासञ्च द्योतयति। आधुनिककक्षासु शिक्षकाः छात्राश्च मिलित्वा विषयमादायादौ सुपरिचिताः न भवन्ति। छात्रास्तु सुतरां पाठविषयेण अपरिचिताः भवन्ति। पदेन, वाक्येन वा केनापि छात्रः शिक्षणारम्भपर्यन्तं परिचितो न भवति। शिक्षणावसरे शिक्षणानन्तरं वा सर्वे छात्राः तद्विषयेण समस्तशब्दैः सह वा सुपरिचिताः भवन्तीति वक्तुं न शक्यते। पूर्वरङ्गे विहितप्रयोगः तादृशः कश्चन स्याद्येन तदभ्यासावसरे न कोऽपि क्लेशः केनापि नानुभोक्तव्यः इति कश्चन तत्त्वनिर्देशः शिक्षकैरत्र विशेषतया ग्राह्यः वर्तते। विषयस्य शिक्षणात् पूर्वं विषयेण सह नैकप्रकारकः परिचयाभ्यासः विधेयः। पूर्वसन्नद्धतारूपेण

 ISSN - 2277-2359

छात्राध्यापकाभ्याम् उभाभ्यां पाठानुगुणं शब्दाः, शब्दरूपाणि, शब्दार्थाः, विशेषार्थाः, शब्दप्रयोगविचाराश्चेति विशेषविचाराभ्यासः करणीयः। इत्थं कृताभ्यासबलेन छात्राः अपि शिक्षणावसरे शिक्षकेण सह तत्प्रतिपात्रमधीयानाः विश्वासयुताश्च भवेयुः॥

## विषयोपक्रमे विशेषभावौचित्यता –

**क्रीडासक्ताः बालकाः** इति कथनं सुपरिचितमेव। क्रीडासक्ताः इति कथनं बालानां न केवलं क्रीडेच्छां द्योतयति। क्रीडासक्ताः नाम मनोरञ्जनविषयैराकर्षिताः भवन्तीति सारः। सहृदयानां चिदाकर्षणाय, मनोरञ्जनाय वा यथा कविः ग्रन्थारम्भे विषयं प्रविश्य इन्द्रियाकर्षकं सन्निवेशमुपस्थापयति तथैव शिक्षकाः शिक्षणप्रक्रियायां छात्राणां इन्द्रियाकर्षणाय मनोरञ्जनाय वा उपक्रमेत। कथ्यते हि अभिज्ञानशाकुन्तले –

**सूत्र -** **आर्ये कथयामि ते भूतार्थम् -**

**आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**

**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥** इति। (अभि.शा.1.2)

**नटी** **- आर्य एवन्विदम्।**

**अनन्तरकरणीयमिदानीमाज्ञापयत्वार्यः।**

**सूत्र** **- किमन्यदस्याः परिषदः श्रुतिप्रसादनतः।**

**नटी** **- अथ कतमं पुनः ऋतुं समाश्रित्य गायामि।**

**सूत्र** **- ननु इममेव तावत्, आचिरप्रवृत्तम् उपभोगक्षमं ग्रीष्ममधिकृत्य गीयताम् . . .।**

इत्थमत्र सूत्रधारस्य तथा नटीनां च कथनानि विषयोपक्रमे विशेषौचित्यतायै मार्गोपदेशकानि भवन्ति।**आपरितोषाद्विदुषां न साधु मन्ये** इति नाटकारम्भादेव यच्चिन्तनं सूत्रधारस्य वर्तते तत्तु कालिदासस्य विषयोपस्थापनौचित्यतां द्योतयति। सर्वेषामिति बहुवचनप्रयोगः अपि कालिदासस्य ग्रन्थाधिगमस्य नाटकप्रदर्शनस्य वा व्यापकतां निर्दिशति। सर्वैरपि प्रयोगज्ञानं साधु इति अङ्गीक्रियेत इति कवेर्निर्णयः शिक्षकाय आदर्शपूर्णः भवति। शिक्षकाणां

शिक्षणप्रक्रियया प्रयोगज्ञानेन वा कक्षान्तर्गतच्छात्रास्सर्वे यदि समधिगताः, तर्हि तदैव स्वशिक्षणं साधु इति भावयेयुः शिक्षकाः। अतः तन्निमित्तं यथा विषयोपस्थापनाय मया प्रयासः विधीयते तथैव भवद्भिः छात्रैः विषयाधिगमे सज्जैर्भाव्यमिति विशेषतया सम्मानपुरस्सरं तान् छात्रान् प्रेरयेत्। तथैव स्वीयां शैक्षिकभावनां दृढतया छात्रसम्मुखे कक्षायामुपस्थापयेत् शिक्षकः। कथनानुसारं शिक्षकः प्रकृष्टविशेषविधिना योगदानेन च कार्याचरणे सिद्धहस्तः स्यात्॥

तदनु कृतयोगदानैः छात्रैश्च शिक्षककथनानुसारं कार्याचरणाय सिद्धाः भवेयुः। तदेव कथयति यत्कालिदासः – **आर्य एवन्विदम्। अनन्तरकरणीयमिदानीमाज्ञापयत्वार्यः** इति। कृताभ्यासेन सह नटीनटाः सर्वे यथा नाटकप्रदर्शनाय स्वसिद्धतां निरूपयन्तः सूत्रधाराज्ञायै प्रतीक्षालवः भवन्ति तथैव छात्राः शिक्षणोपक्रमे शिक्षककथनाय प्रतीक्षालवः भवेयुः। शिक्षकेण छात्रैस्सह कृतविषयसम्बद्धपूर्वसन्नद्धता अत्र छात्रेभ्यः शक्तिप्रदायिनी भवति। अनया शक्त्या एतत्किं?, कोऽयं शब्दः?, कः अर्थः?, कः भावः? इत्येतद्भावनाभ्यः ततः किं?, पश्चात् किम्?, अनन्तरं किं?, को विशेषः अत्रेति? विषयाधिगमे शिक्षकमनुसरेयुः छात्राः। इत्थं सम्पूर्णकक्षायां विषयाधिगमे छात्राः जिज्ञासापूर्वकाः भवन्ति चेत् विषयोपक्रमे तथा शिक्षणप्रक्रियायां वावश्यं शतं प्रतिशतं यावत् शिक्षकोऽपि सार्थकः भवतीति कथने नातिशयोक्तिः॥

**सूत्रधारः** - **आर्ये साधु गीतम्। अहो रागानुबन्धिचित्तवृत्तिरालिखित इव स्वरतो रङ्गः. तदादीनां कतमं प्रयोगमाश्रित्य एनमाराधयामः?**

**नटी** - **नन्वार्यमिश्रैः प्रथममेवाज्ञप्तम् अभिज्ञानशाकुन्तलं नाम अपूर्वं नाटकं प्रयोगे अधिक्रियतामिति ?**

**सूत्रधारः** - **आर्ये सम्यगनुबोधितोऽस्मि। ननु अस्मिन् क्षणे विस्मृतं खलु मया. यतः।**

इत्थमस्मिन् सन्निवेशे अपि कालिदासः आर्ये साधु गीतमिति नटीमौचित्यभावविशेषतया श्लाघयति। रङ्गः स्वरतो रागानुबन्धि-

 ISSN - 2277-2359

चित्तवृत्तिरालिखित इति सम्भ्रमाश्चर्येण नटीं प्रेरयति। तथैव तत्प्रभावतया किं करणीयमित्यपि विस्मृत्यपृच्छत् कतमं प्रयोगमाश्रित्य? आराधयाम इति। तत्सन्दर्भे सूत्रधारेणाज्ञप्तविषयं पुनरुद्धाटयन्ती सिद्धाहमिति औचित्यताविशेषकथनमपि शिक्षकैः ग्रह्यमेव भवति। शिक्षणावसरे अनुवाचनत एवेत्थं छात्राः शिक्षकैः औचित्यविशेषभावनया प्रेरणीयाः भवन्ति। न केवलं छात्राः शिक्षकैः, अपि च छात्रैरपि तत्तत्सन्दर्भे औचित्यतापुरस्सरं विशेषभावैः शिक्षकाः प्रेरणीयाः भवन्ति। शिक्षणावसरे छात्राध्यापकयोः परस्परौचित्यतापूर्वकः व्यवहारः शिक्षकपक्षतः विषयोपक्रमे तथा छात्रपक्षतः विषयाधिगमे चाद्वितीयशिक्षणप्रक्रमः भवति। **आर्ये सम्यगनुबोधितोऽस्मि. नन्वस्मिन् क्षणे विस्मृतं खलु मया यतः . .**। इति सूत्रधारस्य कथनं विचारात्मकं तथा विस्मयात्मकञ्च भवति। समस्तस्य नाटकस्य सृष्टिकर्ता कथं विस्मरति इति कश्चन प्रश्नः मनसि जागर्ति। विस्मृतिस्तु मानवस्य सहजप्रवृत्तिः भवति। तथैवास्य वेति भावना योग्यौपचारिकी च भवति। शिक्षणप्रक्रियायां विषयोपक्रमे विषयव्याख्याने वा शिक्षकाणामपीयं स्थितिः प्रत्यक्षगोचरा अनुभववेद्या च वर्तते। एतादृशेषु सन्दर्भेषु छात्राः यदि विषयेण सह सामान्यतया पूर्वमेव सुपरिचिताः स्युः, तर्हि ते निश्चितरूपेण शिक्षणे शिक्षकं सहकुर्वन्तः औचित्यपूर्वकव्यवहारसम्पादने सशक्ताः भवन्ति॥

इत्थमभिज्ञानशाकुन्तलस्य प्रस्तावनापरिमितविषयाध्ययने एव विशिष्टा शिक्षणप्रक्रिया तथा नैकानि शैक्षिकतत्त्वानि च आत्मसात्भवन्ति। स्वविशेषबुद्ध्या कवयः यथा काव्यानि सृजन्ति रचयन्ति च तथैवौचित्यतया तत्पाठकाश्च तेभ्यःनूतनतत्त्वान्यन्वेष्टुं शक्नुवन्तीति कथने न संशयलेशः। "**कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्, काव्येषु नाटकं रम्यं तत्रापि शकुन्तला**" इत्येतेषां वाक्यानामाधारेण काव्यसाहित्ये तु नाटकानि प्रदर्शनयोग्यानि, अभिनययोग्यानि प्रयोगविज्ञानानि च भवन्तीत्यतः तदारम्भोपक्रमविचाराः कक्षाविषयोपक्रमप्रस्तुतितुल्याश्चैवेति शैक्षिकमत्यात्र विचारः विहितः। सम्पूर्णरूपेण कालिदाससाहित्यस्य सूक्ष्मेक्षिकयावलोकनेन नैकानां नवशैक्षिकविचाराणामाविष्कारः सुसाध्य एवेति शम्॥

## परिशीलितग्रन्थसूची -

1. अभिज्ञानशाकुन्तलम् – बेतवोलु रामब्रह्मम्, राघवेन्द्रप्रकाशनम्, हैदराबादः,2020.
2. संस्कृतभाषाशिक्षणम् – मध्यप्रदेशसंस्कृतबोर्ड, लोकशिक्षणसंचानालयः, विद्यालयशिक्षाविभागः, मध्यप्रदेशः – 2004.
3. कालिदास की कला और संस्कृती, डा. देवीदत्त शर्मा, देववाणी परिषत्, दिल्ली-1951.
4. कालिदास की कृतियों मे धर्मशास्त्रीय विषय, डा. श्रीपति त्रिपाठी, नागप्रशाक-1997.
5. कालिदास के नाटको मे सौन्दर्यचेतना, जहाँआरा, बि.एस्.के. प्रकाशन-2015.
6. महाकवि कालिदास की नाट्यरचना ओं का शास्त्रीयाध्ययन, डा.जयकृष्ण प्रसाद खंडेवाल, रिसर्च बुक्स, मेघप्रकाशन-2009.
7. कासिदास की साहित्य आधुनिक परिप्रेक्ष्य में, डा.पि.के. पण्डा, विद्यानिधि प्रकाशन – 2009.

 ISSN - 2277-2359

# ॥ राष्ट्रियशिक्षानीतिषु समावेशी शिक्षा॥

**डॉविद्याधरः प्रभल.**

Assistant Professor

Dept. Of Education

Central Sanskrit University

Guruvayoor Campus

Puranattukara, Thrissur, Kerala.

**उपयुक्तविशेषपदानि** –

1. विशिष्टशिक्षा – Special Education
2. एकीकृतशिक्षा – Integrated Education
3. समावेशीशिक्षा – Inclusive Education
4. राष्ट्रियशिक्षानीतिः - National Policy of Education.
5. अधिनियमः - Act, 6.संविधानम् – Indian Constitution.

सृष्टिक्रमे सर्वप्राणकोटिः समानः।

**“समानी व आकूतिः समाना हृदयानि वः।**

**समानमस्तु वो मनो यथा वः सुसहासति”॥ (ऋ.वे.10.191.2.4)**

शिक्षाक्षेत्रेऽपि इयं पद्धतिः समादृता विद्वद्भिः। पारम्परिकधारायांतु शिक्षार्थिनः गुरभिर्सञ्चालितपरीक्षायामवस्यमुत्तीर्णश्चेदेव अध्ययनयोग्याः भवन्ति स्म नान्ये। परं भारते पाश्चात्यशिक्षापद्धतिः यदा आरब्धा तदा शिक्षार्थिनां पठनपद्धतिषु अध्ययनयोग्यतासु च विशेषपरिवर्तनं समारब्धम्। यथा सर्वेभ्यः शिक्षादानं, स्त्रीशिक्षाग्रहणे महान्प्रोत्साहः, सर्वविधेभ्यः छात्रेभ्यः शिक्षादानमित्यादि अभिनवसङ्कल्पाः शिक्षाजवनिकायां समाविर्भूताः। यथा बुनियादिशिक्षा – प्रौढशिक्षा – जनजाति-अनुसूचितजनजातीनां कृते शिक्षा - प्रधानतया विकलाङ्गशिक्षा च समारब्धा। क्षेत्रेष्वेषु दृष्टिपातः कृतत्वात्

पाश्चात्यशिक्षाप्रणाल्यपि भारते क्वचिदङ्गीकारयोग्येऽति अर्वाचीनानां मतम्। धारायामस्यां समेऽपि भारतीयवासिनः शिक्षामनिवार्यरूपेण गृह्णीयादिति सङ्कल्पः। विश्वबृहत्संविधानेष्वन्यतमः अस्मद्भारतीयसंविधानं सङ्कल्पमेनं द्रढयति। स्वातन्त्र्योत्तरकालात् तत्कालीनब्रिटीश् सर्वकारेणैव सङ्कल्पमेनं समारभ्य प्रोत्साहनञ्च अददात्। तस्य फलमेव साम्प्रतिकभारते साक्षरतायाः फलम्। तत्र विशेषतया विकलाङ्गशिक्षायां महान्श्रमः एभिराचरितेऽति लक्ष्यतेऽत्र। प्रणाल्या अस्याः विकसितपरिणाम एव साम्प्रतिकभारते अवलोक्यमानविशिष्टशिक्षा – एकीकृतशिक्षा - समावेशीशिक्षा च। प्रमुखानंशानेतानत्र विवरणपुरस्सरं ईषज्जानीमहे॥

**विशिष्टशिक्षा** - शिक्षाक्षेत्रे समर्थबालेभ्यः अतिरिक्ताः विकलाङ्गाः। अन्यथा समर्थाः,समर्थेतराः, अङ्गविकलाः,दिव्यङ्गा इति नाना नामभिः व्ययहारोऽस्ति। अन्यथा समर्थेभ्यः स्वावस्यकतापूर्त्यै आरचितशिक्षा-पद्धतिरेव विशिष्टशिक्षा। नाम वैयक्तिकभिन्नतानुसारं विशिष्टध्यानपूर्वकं प्रत्येकं छात्रमादाय(with special Attention) विशेषपाठनं यत्र प्रचलति सैव विशिष्टशिक्षेत्युच्यते॥

**एकीकृतशिक्षा** – पृथग्शैक्षिकावश्यकतायुतबालान् अर्थात् शारीरिक –मानसिक – बौद्धिकाक्षमान् छात्रान् सामान्यविद्यालयेषु प्रावेश्य समबालैः सह मेलयित्वा शिक्षणदानप्रक्रियामेव एकीकृतशिक्षेत्युच्यते। समर्थबालाः अन्यथा समर्थाश्च यत्र मिलित्वा शिक्षां गृह्णन्ति सैव एकरूपी शिक्षा॥

**समावेशी शिक्षा** - प्रत्येकं छात्रम् एकोपागमत्वेन परिगणय्य व्यक्तिशः परामर्शदानमेव समावेशीशिक्षा। अर्थात् विशिष्टावश्यकतायुतबालाः उत्तमबालैः सह स्थित्त्वा यत्र अध्ययनक्रियाकलापं कुर्वन्ति तत्रैव आवश्यकसंसाधनानामुपकरणानां प्रदानपूर्वकं सुशिक्षिताध्यापकैः पाठनक्रिया यत्र प्रचलति सा पद्धतिरेव समावेशीशिक्षापद्धतिः॥

तत्रादौ विशिष्टशिक्षाऽरब्धा। तदनु पाठनपद्धतिः विद्यालयानामाय-व्ययाधिक्यादेकीकृतशिक्षा प्रारब्धा। कालान्तरे नैकधा प्रयासः विहितश्चेदपि आभ्यां समर्थान्यथासमर्थच्छात्रयोरन्तरं दूरीकर्तुमशक्तस्सन्तः समेभ्यः समभावः

 ISSN - 2277-2359

समानाधिकाराः समानशिक्षणप्रणाली भोभूयादिति सङ्कल्प्य समावेशीशिक्षां समारभन्॥

यदत्र राष्ट्रियशिक्षानीतिषु समावेशीशिक्षा इत्याख्याः विचाराः प्रस्तूयन्ते –

## *राष्ट्रियशिक्षानीतिः – 1986*

नीत्यामस्यां विवक्षाभावम्(असमानता) अपाकृत्य समभावं जागरयेयादिति प्रमुखतया लक्ष्यं स्वीकृतम्। स्त्रीशिक्षासशक्तीकरणम्,जनजाति – अनुसूसितजनजात्यै एवं निम्नवर्गीयाणां कृते शैक्षिकोद्योगावसरकल्पनं तथैव बालबालिकाः विद्यालये प्रवेष्टुम् आवश्यकतप्रोत्साहदानम्। शिक्षाग्रहणाय विशिष्टबालानां कृते पृथक् विद्यालयानामुद्घाटनं, संसाधनानां पुरस्सरमध्येतृणां गृहाऽवासभोजनादि अवसरेषु विशेषश्रद्धा प्रदानमित्येते अंशाः नीत्यामस्यां प्रसिद्धाः॥

## **नीत्यामस्यां विकलाङ्गानां विशेषावसराः –**

1) अन्ध – पङ्गु – काण – मूक – बधिरादि विकलाङ्गेभ्यः समबालकैरिव समानशिक्षाप्रदानम्।
2) विकलाङ्गेभ्यःप्रत्येकं जनपदे पृथक् पृथक् विद्यालयाः आवासभोजनपुस्तकसमानवस्त्र -व्यवस्थाः प्रकल्पनीयाः।
3) आवस्यकतानुगुणं समबालैरिव व्यावसायिकशिक्षणप्रदानम्।
4) विकलाङ्गेभ्यः पाठयद्भ्यः शिक्षकेभ्यः पुनश्चरणकक्षाः सञ्चालनीयाः। प्रमुखतया प्राथमिकविद्यालयेषु कार्यरतेभ्यः शिक्षकेभ्यः निर्णीतावधौ प्रशिक्षणं प्रदेयम्।
5) नाना संस्थाः विशिष्टदिनेषु – उत्सवपर्वदिवसेषु च विकलाङ्गेभ्यःसेवायां यथा मग्नाः भवेयुः तथा प्रेरणा दातव्या।

शारीरिक - मानसिक – बौद्धिकदुर्बलेभ्यः सामाजिकेभ्यः तथा छात्रेभ्यः समर्थबालकैरिव समानशिक्षादाने प्रधानलक्षीभूते कर्मणि लग्नाः स्युः। यतोहि एतादृशेषु विकलाङ्गेषु आत्मविश्वासवर्धनेन

 ISSN - 2277-2359

जैविकसमस्यानां सम्मुखीकरणेन तथा तासां समाधानान्वेषणे च सामर्थ्यसम्पादनेन स्वकार्यसाधने पटुत्वमानतव्यम्। येन एतादृशाान्नामपि सर्वतो-मुखाभिवृद्धिः भवेदिति सङ्कल्पः। यस्मात् परिवारीयेभ्यः तथा सामाजिकेभ्यश्च अमी भारभूताः न स्युः॥

## *राष्ट्रियशिक्षानीतिः – 1992*

1986 शिक्षानीतेः परामर्शकत्वेन एवं कार्यान्वयनीतिरूपेण च नीतिरियं प्रवर्तते। अत्र प्रधानतया विद्यालयगमनसमवयस्कबाल-बालिकानां संख्यागणना निश्चयेन करणीयेति निर्णीतम्। व्यूहरचनया विशिष्टबालकान् (अन्ध –पङ्गु – काण –मूक – बधिरादि) सर्वान् सामान्यछात्रविद्यालये (General school)योजनापूर्वककार्यकलापारम्भ एव प्रमुखलक्ष्यम्। शिक्षकेभ्यः कौशलवर्धनकार्यक्रमाः, कार्यशालादयश्च सञ्चालनीयाः। अन्यथा समर्थबालान् समर्थबालकानां विद्यालयेषु योजनेन अमी आत्मानं धन्यं मन्यमानाः जीवने शारीरिक - मानसिक – बौद्धिकदुर्बलन्यूनताञ्च दूरीकृत्य समर्थजीवनयापने सामर्थ्यं प्रदर्शयन्ति॥

### *क्रियान्वयनम्* –

1) अन्यथासमर्थेभ्यः बालेभ्यः सार्वजनीनप्राथमिकशिक्षाम् अनिवार्यरूपेणप्राप्तुमुत्तमावसराः कल्पनीयाः।
2) शिक्षकप्रशिक्षणे विशिष्ट – एकीकृत – समावेशीशिक्षादीनां पाठ्यक्रमाः स्युः। सैद्धान्तिकप्रायोगिकपाठ्यक्रमाश्च स्युरेव।
3) श्यामपट्टाभियान(Operation Black board) संसाधनैः सह समावेशीबालकानां (Children with special Needs) संसाधानि च अनिवार्यतया तत्र नियोजनीयानि।
4) समग्रशिक्षापरामर्शद्वारा एकलक्षात्मकच्छात्राणामावश्यकताः पूरणीयाः।
5) जनपदकेन्द्रेषु विशिष्टविद्यालयाः उद्घाटनीयाः।

 ISSN - 2277-2359

6) Craft Men प्रशिक्षणेन सह अन्यथा समर्थबालेभ्यः वृत्तिपरक(व्यावसायिक)प्रशिक्षणञ्च देयम्।

7) एतेषां पृष्टपोषणाय वैयक्तिकसंस्थाः प्रोत्साहनीयाः।

8) Diet संस्था प्रशिक्षणकेन्द्रद्वारा शिक्षकप्रशिक्षणं तथा सर्वोत्कृष्टकौशलशिक्षकाणाञ्च निर्माणम्।

9) राष्ट्रे नाना प्रान्तेषु विद्यमान 527 शिक्षकशिक्षासंस्थाभ्यः (Teacher Education Colleges) 50 IASE द्वारा, SCERT द्वारा च विशिष्टबालकेभ्यः पाठ्यमानशिक्षकेभ्यः अपेक्षितसंसाधनानि अध्यापनाय प्रदर्शनानि (Demonstration)च प्रदेयानि।

10) NIEPA, NCERT साहायेन अधिकारिभ्यः यथाऽवसरशिक्षणकार्यक्रमसञ्चालनद्वारा विशिष्टबालबालिकानां साह्हायकरणम्।

11) अन्यथासमर्थछात्रेभ्यः अपेक्षितशिक्षकाणां शिक्षणसामग्रीणाञ्च NIH तथा तदधीनस्थ संस्थाभ्यः निर्माणं कार्यम्।

12) NCERT,NIH सहयोगेन मार्गदर्शकदातृभ्यः परामर्शदातृभ्यः च प्रशिक्षणं प्रदेयम्।

13) आकाशवाण्याः – दूरदर्शन्याश्च प्रयोगः शिक्षणे सार्वजनीनरूपेण च योजनीयः।

14) विशिष्टशिक्षणाय अपेक्षित सामग्र्याः सम्पादनम् (उपलब्धिकरणञ्च)।

15) विशिष्टशिक्षाकार्याणां पुरोगतिः प्रतिक्षणं परिशीलनीया।

 ISSN - 2277-2359

**भारतीयपुनरावासपरिषद् – 1992 (Rehabilitation Council of India)**

1992 तमे अब्दे संस्थेयमारचिता। 2005 अब्दे NCTE, RCI संस्थाभ्यां सहयोगेन कार्यमारब्धम्। विशिष्टशिक्षायाः सम्बन्धित-शिक्षकशिक्षायामुत्तमप्रमाणानि कल्पनीयानि। सततशिक्षाप्रशिक्षण - कार्यक्रमाः सञ्चालनीयाः। समावेशीशिक्षायाः पुरोगमाभिवृद्धये अनुसन्धानानि करणीयानि॥

**विकलाङ्गानामधिनियमाः – People with Disabilities Act - 1995**

समावेशीबालानां कृते समानाधिकाराः,प्रदत्ताधिकारपरिरक्षणं,सम्पूर्णसहभागित्त्वम्। इमानि प्रदेयानीति अय्रं नियमः कतिपयान् विशेषाधिकारान् प्राकल्पयत्। यथा –

***पञ्चमाध्यायेअनुभागः(Section) 26 इत्थं प्रादिशत् -***

**अनुभागः26(ए)** -अयं विशिष्टावश्यकतायुतबालानां 18 वर्षाणि यावत् अध्ययनाय वातावरणं प्रकल्प्य निश्शुल्कशिक्षा देयेति सूचयति।

**अनुभागः26(बि)**- सामान्यबालैः सह मिलित्वा अध्ययनाय प्रोत्साहनपूर्वकसुनिश्चितावसराः कल्पनीयाः।

**अनुभागः27(ए)** - दिव्याङ्गबालाः पञ्चमकक्षां यावदधीत्य त्यज्यन्ते, तदन्तरविद्याभ्यासाय यदि अवसराः न वर्तन्ते तादृशेभ्यः अनौपचारिककक्षाः ,वैयक्तिककक्षाश्च सञ्चालनीयाः।

**अनुभागः27(एफ)** – दिव्याङ्गबालबालिकानां कृते अपेक्षित पाठ्यपुस्तकानि तथाऽवश्यकान्योपकरणानि च मुक्तरूपेण प्रदेयानि।

एवं विद्यालयं प्रति आगम्यमानेभ्यः दिव्याङ्गेभ्यः आर्थिकसाहाय्यमपि निश्चितरूपेण करणीयम्। दिव्यङ्गपितृभ्यः आहोस्वित् तेषां संरक्षकेभ्यो वा अध्ययनाय गमनागमनव्ययः प्रदेयः।

**अनुभागः30(बि)**-विद्या- व्यावसायिक – वृत्तिकार्यक्षेत्रेषु गमनागमनव्ययस्था अवरोधरहितः स्यात्।

 ISSN - 2277-2359

**अनुभागः30(सि)** – अन्यथा समर्थेभ्यः अध्ययनोपकरणानि मुक्तरूपेण प्रदेयानि।

**अनुभागः30(डि)** –प्रोत्साहनाय छात्रवृत्तिः प्रदेया।

**अनुभागः30(जि),(एच्)** –अपेक्षितरूपेण पाठ्यपुस्तकनिर्माणं कुर्यात्। बधिराणां कृते एकप्रकारिकी भाषाध्ययनाय पाठ्यपुस्तकरचना कार्या।

**अनुभागः31** – काणेभ्यः(Blind) तथा निम्नदृष्टिच्छात्रेभ्यश्च लेखनसामर्गीं च प्रदातव्या।

**आरक्षणम् –**

**अनुभागः39** – दिव्याङ्गेभ्यः 3% प्रतिशतम् आरक्षणञ्च अध्ययनक्षेत्रे सुतरां प्रदेयम्।

**रक्षणसदुपायाः -**

**अनुभागः69** –दिव्यङ्गानामधिकाराः न अपहर्तव्याः स च प्रयत्नोऽपि न कर्तव्यः। यदि तादृशः कुचेष्टाः आचरिताः तर्हि तादृशाय वर्षद्वयं कारागारबन्धनं तथा 20,000/- अपराधशुल्कंस्थापयितुं शक्यते॥

**राष्ट्रियन्यास अधिनियमः 1990 ( National Trust Act) तथा शिक्षाधिकारः अधिनियमः**(Right of Children to Free and Compulsory Education Act)2009 द्वारा दिव्याङ्गेभ्यः नाना स्वर्णिमावसराः प्रकल्पिताः येन तेऽपि समाजे विकासपथमवाप्य जीवने सर्वतोमुखविकासं प्राप्नुयुः॥

**राष्ट्रियशिक्षानीतिः 2020 –**

1) नवशिक्षानीतिरियं दिव्याङ्गछात्राणां संसाधनेषु विशेषश्रद्धां प्रददाति। नूतनानां Apps सर्वविधपठितॄणां कृते उपयोगिनी सिद्धता कर्तव्येति सङ्कल्पः कृतः।
2) विस्तृतया शिक्षकप्रशिक्षणं तथा नियुक्तिश्च क्रियतेऽत्र।
3) दिव्याङ्गेभ्यः शिक्षादानपुरस्सरम् अन्यव्यासायिकक्षेत्रेषु तथा कौशलोन्नयने च शीक्षा प्रदीयते।

4) प्रत्येकं शिक्षणसंस्थासु दिव्याङ्गशिक्षायै सकुशलप्रशिक्षितशिक्षकनियुक्तिः क्रियते।
5) भवननिर्माणसमये दिव्याङ्गच्छात्राणाम् सर्वविधावसराः मनसि संस्थाप्य निर्माणं कुर्यात्।
6) सर्वराष्ट्रियप्रवेशपरीक्षासु यथा कैट्,नीट्, टेट्,आदिषु विशेषसुविधाः प्रकल्प्यन्ते इति सुनिश्चितम्।
7) शिक्षकच्छात्रसम्प्रेषणेऽपि विशिष्टश्रद्धा दातव्येति निर्णीतम्।
8) औद्योगिकक्षेत्रे विशेषप्रावधानं प्रकल्प्यनीयमिति विचारः।
9) समर्थजनैस्सह एभिरपि समानरूपेण शिक्षाग्रहणम् – आर्थिकस्वावलम्बनम् – स्वेच्छामयजीवनयापनमित्याद्यंशेषु समानतां सम्पादयेयुः।

## उपसंहारः –

भारतराष्ट्रं सर्वजनरक्षां सर्वजनशिक्षां सर्वजनहितञ्च काङ्क्षते। इत्थं दिव्याङ्गानामपि शिक्षादाने व्यावसायिकक्षेत्रे उद्योगकल्पने समाजे गौरवदापने - सम्पादने च समानावसरान् प्रकल्पयति। येन दिव्याङ्गा अपि आनन्दमयजीवनं सक्षमरूपेण सुचारु सञ्चालयेयु-रिति मे मतिः॥

**इति शम्**

## सन्दर्भग्रन्थाः –

1) भारतसंविधानम्।
2) Inclusive Education -Prof. Digumarti Bhashkara Rao.
3) Creating an Inclusive School – Dr. Rajesh Kumar Vashisht.
4)अन्तराष्ट्रीय विधि एवं णानवाधिकार – अग्रवाल.एच.ओ- इलाहाबाद.
5)www.humanrights/PDHREeducaion.com
6)www.humanrightdsinitiative.com
7) राष्ट्रियशिक्षानीतिः 2020 -Draft.
8) शिक्षा मे नव चिन्तन – अरोडा ,प्रो.रीता,शिक्षाप्रकाशन,जयपूर।

 ISSN - 2277-2359

# ॥मन्त्रविधिः॥

**Dr. SHYAMRAJ.C**

Assistant Professor,

Central Sanskrit

University,

Guruvayoor Campus,

## मन्त्रस्वरूपम्

मननात् त्रायते इति मन्त्र एवं मन्तारं त्रायते इति मन्त्र इति तान्त्रिकैः उच्यते। मन् धातोः ज्ञानविज्ञानावबोधनमित्यर्थाः सन्ति।अर्थात् यस्य सम्यक् ज्ञानेन आलोचनेन विचारेण चिन्तनेन त्राणनं भवति सःमन्त्रः भवति। एवं मननोपकरणं मन्त्रः, मननसाधनं मन्त्र इति केचित् अभिप्रयन्ति तन्त्रशास्त्रतत्वज्ञाः॥

## मन्त्रविधिः

तन्त्रशास्त्रे अयं विधिः एवं प्रयुङ्क्ते यत् आदौ गुरुणा परीक्षिताय अधिकारिणे शिष्याय श्रवणपूर्वकं दीक्षा दीयते मन्त्र उपदिश्यते च। तन्त्रशास्त्रप्रवेशनाय उद्युक्तस्य उपासनेच्छुकस्य शिष्यस्य कृते उपास्य-देवस्य मन्त्रः अवधानपूर्वकं श्रावणीयः इत्यर्थः। श्रुतस्य मन्त्रस्य मननं क्रियते मननेन विना श्रुतस्य तत्त्वस्य साफल्यं न भवति। उपास्यदेवेन सह परस्परैक्यरूपेण चिन्तनमेव मननमिति उच्यते॥

मननानन्तरं अविचलितचित्तेन मन्त्रमूर्त्या साकं परस्परैक्यम् अनुभवति। अर्थात् अचञ्चलबुद्ध्या निरन्तरं विषये एकाग्रतास्थापनेन चित्तस्थैर्यं भवति तेनाधिगमयोग्यता जायते। अधिगन्ता स्वस्यशास्त्रे इतरशास्त्रेषु च शीघ्राधिगमयोग्यः जायते। अनेन कुण्डलिनीशक्तेः जागरणं भवति तदा व्यक्तित्वस्य पराकाष्ठा भवतीति भारतीयमतम्। अत्र तावत् चरमलक्ष्यस्य मोक्षस्य प्राप्तये अन्तिमसोपानं भवति मन्त्रविधि इति निरूप्यते॥

## मन्त्रविधेः शास्त्रोक्तफलम्

तन्त्रशास्त्रेऽमुना विधिना एवं निरूप्यते यत् ये मन्त्राः शास्त्रे उक्ताः ते सर्वेऽपि तत्तत्फलदाः इति। यथा पञ्चाक्षरीमन्त्रः,अष्टाक्षरीमन्त्रः,द्वादशाक्षरीमन्त्रः इत्यादयः सिद्धमन्त्राः सन्ति। वाग्भटाचार्येण उक्तं यत् पञ्चाक्षरीमन्त्रजपेन ग्रहान् उन्मादादीन् अपस्मारादिरोगान् चित्तविप्लवान् च शमयितुं शक्यते॥

ईश्वरं द्वादशभुजं नाथमार्याविलोकितम्। सर्वव्याधिचिकित्सां च जपन् सर्वग्रहान् जयेत्॥

**तथोन्मादनापस्मारानन्त्यं वा चित्तविप्लवम्।**[1]

चित्तस्थैर्यमपि जायत इति एवं च वश्यमोहनस्तम्भनोच्चाटनमारणादयः अत्र प्रतिपादिताः विद्यन्ते किन्त्वत्र विस्तरभयात् नैव वर्ण्यते॥

## मन्त्रविधेः वैज्ञानिकता

आधुनिकमते वैज्ञानिकत्वपरिकल्पनायाः प्रमाणीकरणं समस्यायाः परीक्षणनिरीक्षणादिभिः प्राप्तफलविश्लेषणेन एव सम्भवति। विशिष्य भारतीयाचार्याः प्रत्यक्षप्रमाणम् अङ्गीकुर्वन्ति। तत्कारणादेव आधुनिकमनोवैज्ञानिकैः किञ्चिद् आनुमानिकमपि तच्छास्त्रं परीक्षणादिना फलप्रदर्शनाय योग्यमिति कथञ्चित् साधितम्। व्यक्तेः सामाजिकशारीरिकचारित्रिकस्वरूपनिर्धारणाय विकासाय च अर्धचेतनायाः मनसः स्थानं कीदृशमिति शास्त्रीयपरीक्षणदिना निरूप्य निगमितम्॥

वैज्ञानिकक्षेत्रे मनोवैज्ञानिकानां प्रवेशः अन्धविश्वासानां विनाशकतया महाविस्फोटनमेव लोके अकार्षीत्। तेषाम् अर्धचेतनायाः स्वरूपशक्त्यादीनां वर्णनेन महत्परिवर्तनं लोके समभूत्। एतेन 82% रोगाः मनसि उद्भूय शरीरे प्रकट्यमानाः(psycho-somatic)इति न्यरूपयत्। अतः रोगाणां निवारणे मानसिकपरिकल्पनायाः क्रियमाणप्रयोगानाम् आर्षाणां साधुता समागता। त एव भारतीयानां तन्त्रमन्त्रयन्त्र-कुण्डलिनीयोगादिप्रयोगाणां वैज्ञानिकता वरीवर्त्ति इति अनुसन्धानेन प्रमाणयितुं योग्यमस्ति॥

auto suggestion एव प्रागुक्ताः प्रयोगाः सफलाः भवन्तीति मनोवाज्ञानिकानाम् अभिमतम्। तद्दिशा अयं प्रयोगः प्रतिदिनं स्वजीवने इच्छापूर्त्तये

---

[1]अष्टाङ्गहृदयम्3.5-6

 ISSN - 2277-2359

उपयोगदा अस्ति। उदाहरणार्थं निद्रायाः प्राक् प्रातः पञ्चवादने एव मया उद्धातव्यमिति सम्यक् मनसि विचिन्तयन् यः कश्चित् निद्राति पुनः तस्य उद्धानं तस्मिन् एव निर्धरिते समये परसहाय्यं विना स्वतः सम्भवतीति सुविदितवेद्यमेव समेषाम्। अतः तदभिप्रायेण अपेक्षितकामपूर्त्यर्थं स्वात्माभिप्रेरणारूपेण “मया प्रातः उद्धातव्यं,अहं कार्यमिदं कर्तुं शक्तः,मयि सकारात्मकचिन्ताः वर्धन्तां,अयं रोगः सम्पूर्णतः नष्टो भूत्वा आरोग्यदृढगात्रो भवेयम्” इत्येवं रूपेण स्वव्यक्तित्वपरिपोषणाय महतां रोगाणां निवाराणार्थमपि उपबोधमनसि प्रेरणां दत्वा अपेक्षितं साधयितुं शक्यते। एवं रूपेण प्रतिपादनं Dr. Joseph murphy महोदयेन The power of your subconscious mind इत्यस्मिन् ग्रन्थे निरूपितं वर्तते। एतेषां प्रागुक्तानां मनोवैज्ञानिकविषयाणां प्रयोगाः अस्मदाचार्याणाम् आर्षाणां बुद्धिमध्यतिष्ठन् इति तत्कृतानुसन्धानेन विज्ञेयम्। अतः एव पाश्चात्याः भारतीयामिमां पद्धतिं सादरातिशयेन आलोकयन्ति॥

पञ्चकोशसिद्धान्तरीत्या अस्मभ्यम् अवगतविषयः अस्ति यत् मनसः प्राणे शरीरे च प्रभावप्रकटनसामर्थ्यम्। इदमेव तत्त्वं रोगनिदानतया शास्त्रोषु आयूर्वेदादिषु प्रसिद्धं प्रयोगकरञ्च दृश्यते। अयमेव विषयः psycho-somatic इति रोगदृष्ट्या ते निरूपयन्ति। मन्त्राणां प्रयोगेण मानसिकक्लेशापगततया तदुत्तरप्राणाशरीराणां दृढता सम्पाद्यते। मन्त्राणां प्रयोगः मनोमयकोशम् एव न तदन्तस्थं विज्ञानमयकोशं संशुद्धयतीत्यतः सः मन्त्रप्रयोगः आनन्दमयकोशमपि उद्घाट्य मोक्षाख्यम् आनन्दप्रदायकं भवति। मन्त्रसाधनया उत मन्त्रविधिना उपासकः अधिगन्ता गुरुवचनेन प्राप्तमन्त्रस्य सार्थकं निरन्तरजपं कुर्वन् उपबोधमनसः कृते स्वात्माभिप्रेरणा एव करोति। एतेन उपास्यः देवः तदभीष्टं फलं प्रददाति॥

मनोवैज्ञानिकाःस्वनिर्देशनंसामान्यानां भाषाप्रयोगा-वगमात्मकानाम् एव शब्दानां प्रयोगं कुर्वन्ति। तत्र शब्दं ज्ञात्वा अर्थं स्मरन् एव प्रेरणां ददातीति हेतोः सामान्योपयोगाय योग्यः दृश्यते। परन्तु मन्त्राः न सामान्यशब्दाः इति मन्त्रसाधकानां सुविदितमेव। अतः तेषां सदुपयोगिनां मन्त्राणां प्रयोगः गुरुमुखात् अधीत्य यदा उपासकेन तदर्थविचिन्तनेन जपः क्रियते तदा सा मन्त्रसाधना इष्टफलदा भवति। अत्र

वैज्ञानिकदिशा स्वात्माभिप्रेरणया एव फलसिद्धिः सम्भवतीति वदन्ति। यतो हि तेषां गतिः तन्मते सूक्ष्ममिति चिन्त्यमानस्य मनसः पर्यन्तमेव समागतमस्ति।तदनन्तरगतानां सूक्षामाणाम् अन्वेक्षणीयानां आत्मविषयकाणां तत्त्वानाम् अवबोधः दुस्साध्यः दृश्यते। परं मन्त्रसाधनेन जायमाना उपास्यदेवानुग्रहः, स्वात्मसंशुद्धिः,बुद्धिविकासः,व्यक्तित्वपरिपूर्णता इत्यादयःप्रत्यक्षगोचाराः गुणाः सम्भवन्तीति तन्त्रवेत्तारः ब्रुवन्ति॥

मन्त्रविधिः न केवलम् आध्यात्मिकोन्नतये अपि च मन्त्रप्रयोगसम्पूतकानां घृतादिद्रव्याणां औषधानां परिसेवयापि रोगमुक्तिं कारयति। यथा धन्वन्तरमूर्त्तेः साधनया नैकस्मात् रोगात् प्रमुच्यते सः औषधोपसेवकः। धेनुसरस्वतीमन्त्रजपेन सम्यक् बुद्धिः वर्धते इति बहूनां पण्डितानाम् अभिमतमस्ति। शिक्षाक्षेत्रे यदि बालकानां समस्यां ज्ञात्वा तदनुगुणं बालकेभ्यो मन्त्रः दीयते तदा बालकस्य मन्त्रमननेन मनसः एकाग्रता वर्धते एवमधिगमे अग्रे नयति च॥

एतेषु प्रयोगेषु अपि auto suggestion उपकरणत्वेन एव मन्त्रविधिः सम्भवतीति मनोवैज्ञानिकानां मतं न योग्यम्। यतो हि तत् मन्त्रपूतं द्रव्यमिति बोधः द्रव्यसेवकस्य न भवति चेदपि फलदायकं दृश्यते।अतः मन्त्राणां प्रवृत्तिस्थानं न वा मनसा च अधीनं ततोऽपि सूक्ष्मतरबुद्धिगतम् आत्मगतञ्च अस्ति। एतेन मन्त्रसाधनायाः आत्मीयतासिद्धिः इति सम्पूर्णं व्यक्तित्वविकासम् मोक्षं च साधयति इति न, तत्साधनसाधकत्वेन उपान्तरफलरूपेण व्यवहारपरिवर्तनं, चारित्रिकनिर्माणम् इत्यादिकमपि संसाधयति॥

## मन्त्रविधेः कल्पनायाः उद्देश्यं प्रयोजनञ्च

भारते ये वैज्ञानिकाः विविधशास्त्रप्रवक्तारः आसन् ते सर्वेऽपि मन्त्रदृष्टारः ऋषयश्च आसन् अनेन कारणेन अस्मत्परम्परायां वैज्ञानिकाः अनुसन्धातारः एव महर्षयःसमभवन्। अतः वैज्ञानिकाः एव ऋषयः उभयोः पन्था एक एव। आध्यात्मिकाधिष्ठितमेव शास्त्रचिन्तनमिति हेतोः तेषां सिद्धान्ताः अधुनापि परीक्षणादिना निर्दिष्टफलानि ददति इत्यतः ते सिद्धान्ताः वैज्ञानिकताम् आयान्ति। अद्यविद्यमानानां वैज्ञानिकोपकरणानाम् अभावेऽपि सूक्ष्मतराणां

 ISSN - 2277-2359

नक्षत्रकल्पना,दूरमापनं,गुरुत्वाकर्षणमित्यादीनां विषयाणां विस्पष्टप्रतिपत्तये मन्त्रोपासनादि-प्रयोगेणैव ते ऋषयः समर्थाः अभवन् इति मन्यते॥

- **शिक्षाक्षेत्रे नूतनप्रवृत्तिरूपेण मन्त्रविधेः परिकल्पना**

  एतेन शिक्षकः अधिगन्तुः व्यक्तित्वविकासाय,बुद्धिपरिपोषणाय चारित्रनिर्माणाय च उपयोक्तुमर्हति। यदा शिक्षकः उत गुरुः मन्त्रवता वाक्येन शिष्यमुपदिशति तदा तत्सकारात्मकाभिप्रेरणया तस्मिन् शिष्ये अधिगमः जायते परिवर्तनं च सम्भवति॥

  उदाहरणार्थं "सज्जनो भव,हिसां न कुर्यात्,शक्यं त्वया कर्तुं" इत्यादिभिः अभिप्रेरणात्मकवाक्यैः अयोग्यमपि अधिगन्तारं सुयोग्यं कर्तुं शक्यते॥

- **वैज्ञानिकक्षेत्रे मन्त्रविधेः प्रयोगः**

  ज्योतिषज्ञः सिद्धमन्त्र एव भवति इत्येवं शास्त्रविषयकवैज्ञानिकत्वं सम्पादयितुं मन्त्रविधेः प्रयोगान् आधुनिकाः कुर्युः॥

- शिक्षाक्षेत्रे स्वास्थ्यसंवर्धनार्थं च मन्त्रविधिः उपयोगाय कल्पते। समाजे विशिष्य शिक्षाक्षेत्रे च आध्यापकानां छात्राणां च आरोग्यप्रदानाय मन्त्रविधिः उपयोगकारी भवति॥

- **मन्त्रविधेः auto suggestion इति प्रयोगः**

  तन्त्रशास्त्रोक्तमन्त्रविधि एव एतावत् अपूर्ण auto suggestion सञ्ज्ञकेन परिदृश्यते। auto suggestion इति यः प्रयोगः समीपकाले आधुनिकमनोवैज्ञानिकैः सम्पादितः दृश्यते सः अपूर्णः इति मन्त्रविधेः अनुसन्धानेन ज्ञायते। यतो हि auto suggestion शक्तेः साधुता एतैः अधुना दृष्टा सम्पादिता च वर्तते। परम् अस्मच्छास्त्रपुङ्गवैः ऋषिभिः मनसः प्रधान्यं तन्त्रमन्त्रप्रयोगेन शारीरिकादि-अभीष्टप्रयोजनानि आत्मीय-साक्षात्कारमपि कल्पितानि आसन्।अतः मन्त्रविधेः साधुत्वं ज्ञात्वा तत्प्रयोगः स्वात्माभिप्रेरणायाः स्थाने करणीयः इति अभिमन्यते॥

- मनसः शक्तेः ज्ञानम् एवम् उपबोधमनसः प्रयोगश्च आधुनिकमनोवैज्ञानिकानां ह्यैव योगदानमिति परिकल्पना न योग्या॥

  मनसः शक्तिं ज्ञात्वा एव ऋषयः मन्त्रदृष्टारः अभूवन् अत एव सः प्रयोगःसर्वेषां स्वाधिकारानुसारं मन्त्रप्रयोगार्थं हेतुरभूत्। पुरा सामान्यतो सर्वेषां मानवानां दैनन्दिनचर्यासु मन्त्रप्रयोगः भवति स्म। मन्त्राणां मनश्शक्तिवर्धनाय महत्वं ज्ञात्वा एव ते ऋषयः प्रयोगान् कुर्वन्ति स्म। अतः अर्षः अयं मन्त्रविधिः नूतनैः एभिः मनोवैज्ञानिकैः प्रथमः कल्पित इतिति कथनं व्यर्थं भवति॥

- **चतुर्मुखीप्रक्रिया**

  विधौ अस्मिन् दृश्यते यत् शिष्यः अधिगन्ता, गुरुःअध्यापकः,विषयःमन्त्रमूर्त्तिः,इति अध्ययनविधित्वेन मन्त्रविधेः परिकल्पना॥

एवं विशिष्टस्य मन्त्रविधेः सकारात्मकानुसन्धानम् अप्रकटीकृतानां नूतनतथ्यानां विश्लेषणेन समाजोपकारी भविष्यति॥

 ISSN - 2277-2359

# ॥सप्तद्वीपा वसुन्धरा॥

**डॉ.विजयानन्दः अडिगः बि**

सहायकाचार्यः, फलितज्यौतिषविभागः,

केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर्-परिसरः।

"**सप्तद्वीपा वसुन्धरा**" इत्यस्ति पुराणवचनम्[1]। अनेन अयं भूगोलः सप्तभिः द्वीपैः समावृतः इति स्पष्टं ज्ञायते। तानि कानि सप्त द्वीपानि? भूगोले एतेषाम् अवस्थितिः कुत्र? इत्यादिविचारान् भारतीयज्यौतिषिकाः स्वसिद्धान्तग्रन्थेषु संहिताग्रन्थेषु च व्यक्ततया न्यरूपयन्। तत्र भास्कराचार्यः सिद्धान्तशिरोमणेः गोलाध्यायस्य भुवनकोशाख्ये प्रकरणे भूगोलस्वरूपं यत् प्रत्यपादयत् तदिह किञ्चित् प्रकाशयितुमीहे। अस्मिन् प्रबन्धे प्राधान्येन भूगोलस्य स्वरूपं तत्र प्राचीनानां मतान्तराणि, भूगोले पुरनिवेशः, द्वीपानां समुद्राणां च स्थानानि, जम्बूद्वीपे भारतवर्षे च विद्यमानानि नव खण्डानि, सप्त कुलाचलाः, मेरुसंस्थानं चेति एतान् विषयान् यथाग्रन्थं सङ्गृह्य निरूपयामि॥

## भूस्वरूपम् –

तत्रादौ आचार्यः भास्करः- **भूमेः पिण्डः शशाङ्कज्ञ..**[2] इत्यादिश्लोके पाञ्चभौतिकः भूपिण्डः चन्द्रादिनक्षत्रान्तकक्ष्यावृत्तैः[3] संवृतः विशिष्य अन्याधारं विना स्वशक्त्या एव आकाशे तिष्ठति [4] इति इमां भूमिकांपौराणिकादिमतनिराकरणपूर्वकस्वानुभवसिद्धदृक्प्रतीतिविषयनिरूपणाय प्रास्तौत्। पुराणादीनां मतानि यथा –

---

[1]स्कन्दपुराणम्-खण्डः-५/अ-२६/श्लो.२८।

[2] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.२।

[3] द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३१।

[4] द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३२।

पुराणेषु इतिहासे[1] च क्वचित् आदिशेषः स्वशिरसि भूमिं बिभर्ति इति उल्लेखः वर्तते। यदि आदिशेषः भूमिं धरति तर्हि आदिशेषस्य धर्ता कः? तद्धर्तुः धर्ता च कः? इत्येवम् आधारपरम्परा ऊहनीया भवति, तथा च अन्तिमः आधारः यः भवति तस्य स्वशक्तिः एव कल्पनीया। तदपेक्षया कल्पनालाघवेन भूमिः एव स्वशक्त्या आकाशे नियतं तिष्ठति इति निरूपणमेव प्रशस्तम् इति आचार्यास्य मतम्[2]। अस्मिन्नेव प्रसङ्गे आचार्यः वेदेषु[3] आर्षसिद्धान्तग्रन्थेषु[4] च नामान्तरेण व्यवहृतां भुवः आकर्षणशक्तिम् **आकृष्टिशक्तिश्च मही**[5] इति निरूपयति॥

बौद्धाः तावत् एवं मन्वते[6] – भुवं परितः यत् भपञ्जरं दृश्यते तत् सर्वदा चलम्, यतः आकाशे यत् किमपि वस्तु अचलं न तिष्ठति अतः आधाररहिता भूः अपि आकाशे प्रतिक्षणम् अधोऽधः पतति इति। यद्येवं तर्हि आकाशे यत् पाषाणखण्डादि गुरुमद् वस्तु क्षिप्यते तत् भुवं न प्रत्यागच्छेत्, यतः यावता कालेन आकाशे क्षिप्तं वस्तु अधः भूमिं प्रति आगच्छेत् तावता भूमिः तदपेक्षया क्षिप्रगत्या अधः पतेत्। कदापि नैवं सम्भवतीति हेतोः बौद्धानां वादः युक्तिशून्यः इति अभिप्रायः[7]॥

जैनास्तु एवमभिप्रयन्ति[8] – द्वौ सूर्यौ, द्वौ चन्द्रौ, द्वे नक्षत्रमण्डले चेति। यतः तेषां सिद्धान्ते दर्पणोदरवत् समतला भूः, तन्मध्ये चतुर्भुजाकारकः मेरुपर्वतः स्थितः वर्तते। एवं सति मेरोः एकस्मिन् कोणे यदा रविचन्द्रतारकाः, न तदा अन्यस्मिन् कोणे भवितुमर्हन्ति, अतः सूर्यादीनां द्वित्वमिति तेषां मतम्। तद्यथा-

---

[1] इमां महीं शैलवनोपपन्नां ससागरग्रामविहारपत्तनाम्। त्वं शेष सम्यक् चलितां यथावत् संगृह्य तिष्ठस्व यथाऽचला स्यात्॥ (म.भा/आदिपर्व-अ.३६ इति शब्दार्थकौस्तुभः_पृ.सं.२६१०) 'शेषः सदैवाहितभूमिभारः' इति कालिदासः अपि अमुमेवार्थं शाकुन्तले(५-४) द्रढयति।

[2] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.४-५।

[3] द्रष्टव्यम् – ऋग्वेदः-१-६-५/ १-३५-९/ १-१०३-२/ १-१६४-१३/ ८-१२-२८/ ८-१२-३० / १०-१४९-१।

[4] द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३२।

[5] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.६।

[6] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.७।

[7] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.९।

[8] सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.८।

ISSN - 2277-2359






यद्येवं मन्यते तर्हि ध्रुवमत्स्यनक्षत्रपुञ्जस्य[1] परिभ्रमणम् असङ्गतं स्यात्। यतः भरणीनक्षत्रस्थस्य रवेः अस्तमनकाले उदयकाले च ध्रुवमत्स्यपुच्छभागे एव तस्य दर्शनात्[2]। यदि द्वौ सूर्यौ भवतः तर्हि एकः ध्रुवमत्स्यस्य पुच्छभागे अस्तमितः चेत् अपरः मुखभागे उदितः भवेत्, तथा अदर्शनात् जैनानां मतमपि युक्तिरहितमिति सिद्धम्॥

## भूगोले पुरनिवेशः –

भूगोले प्राधान्येन भूमध्यरेखायां चत्वारि, ध्रुवप्रदेशयोः एकैकं चेति आहत्य षट् पुराणि प्राचीनैः प्रोक्तानि। तत्रादौ लङ्का, ततः पूर्वस्यां 90° अन्तराले यमकोटिः, लङ्कातः पश्चिमायां 90° अन्तराले रोमकम्, अस्मात् अपि पश्चिमायां 90° अन्तराले सिद्धपरं चेति एतानि चत्वारि नगराणि भूमध्यरेखायां स्थितानि सन्ति। एतेभ्यः चतुर्भ्यः अपि पुरेभ्यः उत्तरस्यां 90° अन्तराले सुमेरुः, दक्षिणस्यां 90° अन्तराले कुमेरुः च भवति।[3] एतेभ्यः भूमध्यरेखादेशेभ्यः स्वदेशः कियदन्तरितः इति स्वदेशसम्बद्धनिरक्षदेशस्य ज्ञानम् अनेन सिद्ध्यतीति केवलम् एतानि एव पुराणि प्राचीनैः उदाहृतानि॥

## द्वीपानां समुद्राणां च स्थानानि –

भूगोलः उत्तरगोलार्धं दक्षिणगोलार्धं चेति द्विधा विभक्तः। तत्र उत्तरगोलार्धे एकः महाद्वीपः, दक्षिणगोलार्धे च अवशिष्टाः षट् लघुद्वीपाः सन्ति। तत्र तावत्

---

इन दोहों में जीवन की कठोर वास्तविकता पर बडी मार्मिक उक्तियाँ कही गई हैं। इन्होंने केवल शुष्क कथन द्वारा नीति की उक्ति नहीं बाँधी अपने नीतिपरक दोहों में वे युक्ति से काम लिये हैं। ऐसी युक्ति की सहायता ली है जो उस तथ्य की सार्थकता प्रमाणित करने में सहायक हो। इस युक्ति के कारण सतसैया में सूक्तियाँ तो पाई जाती हैं पर कोरे नीति कथन नहीं। कवि ने धन के नशे में चूर उन व्यक्तियों को देखा था और पाया था कि धन का नशा धतूरे से भी बढ़कर होता हैः-

**"कनक-कनक तैं सौगुनी मादकता अधिकाइ।**
**उहि खाए बौराइजगइहिं पाएं बौराइ।।"[8]**

एक और उदाहरण देखिए जिसमें बिहारीलाल ने मनुष्य के स्वभाव के बारे में इसप्रकार कहा हैः-

**"कोटि जतन कोऊ करै परै न प्रकृतिहिं बिच।**
**नल बल जल ऊँचो चढै, तऊ नीच को नीच॥"**[9]

अर्थात् कोई कितना भी प्रयत्न करें किन्तु मनुष्य के स्वभाव में अन्तर नहीं पडता। नल के बल से पानी ऊपर तो चढ़ जाता है। किन्तु फिर भी अपने स्वभाव के अनुसार नीचे ही बहता है॥

**भाषा सौंदर्य**

अब तक हम बिहारी काव्य के भाव सौंदर्य पर चर्चा कर रहे थे। इस संदर्भ में उनके काव्य के भाषाई सौंदर्य पर भी विचार करना होगा। बिहारी काव्य की भाषा ब्रज है। किन्तु बिहारी ने ब्रज भाषा के साथ संस्कृत, प्राकृत, अपभ्रंश, अरबी, फारसी शब्द विधान भी अपनाया है। इन भाषाई शब्दों के प्रयोग से उनके काव्य और प्रभावी, सौंदर्यमय हो उठे हैं॥

बिहारी काव्य पूर्ण रूप से अलंकारों से अलंकृत हैं। यों कहें तो अतिशयोक्ति न होगा कि शब्दालंकार एवं अर्थालंकारों का सुंदर मणिकांचन हैं उनके काव्य। अनुप्रास, यमक, श्लेष, वक्रोक्ति जैसे शब्दालंकारों के प्रयोग से काव्य में जो चमत्कार आया है देखिए-

**"कनक कनक तैं सौगुनी मादकता अधिकाइ।**
**उहि खाए बौराइजगइहिं पाएं बौराइ॥"**[10]

दूसरी ओर उपमा, भ्रांतिमान, विरोधाभास, अतिशयोक्ति, अन्योक्ति जैसे अर्थालंकारों के प्रयोग से भाव सौंदर्य की गरिमा बढा़ने का कार्य भी किया है। विरोधाभास अलंकार का एक सुंदर प्रयोग देखिए -

**"या अनुरागी चित्त की, गति समुझै नहिं कोइ।**
**ज्यौं - ज्यौं बूड़ै स्याम रंग, त्यौं त्यौं उज्जलु होइ॥**[11]

भाषा सौंदर्य के अंतर्गत शैलिगत सौंदर्य पर भी चर्चा करने की आवश्यकता है। सांकेतिकता, संक्षिप्तता, एवं कथन चातुरी की शैली बिहारी काव्य की अन्यतम विशेषता है और उनके काव्य सौंदर्य का रहस्य भी॥

**निष्कर्ष**

भाव सौंदर्य के साथ भाषा सौंदर्य बिहारी काव्य की अपनी विशिष्टता है। जैसे आचार्य रामचन्द्र शुक्ल ने कहा है "भावों का बहुत उत्कृष्ट और उदात्त स्वरूप बिहारी में नहीं मिलता" किन्तु मुक्तक रचना में जितनी विशेषतायें पाई जाती हैं वे सतसई में अपने चरम उत्कर्ष पर पहुँची हुई हैं॥

**संदर्भग्रन्थ सूचि**

1. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.31
2. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.31
3. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य,प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.31
4. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.30
5. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.31
6. बिहारी के नीतिपरक दोहे, विकिपीडिया
7. बिहारी के नीतिपरक दोहे, विकिपीडिया
8. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय नव देहली, पृ.31
9. बिहारी के नीतिपरक दोहे, विकिपीडिया
10. राष्ट्री भाग एक, मध्यकालीन हिन्दी काव्य, प्रकाशक राष्ट्रीय संस्कृत संस्थान, मानित विश्वविद्यालय, नव देहली, पृ.31

 ISSN - 2277-2359

# KNOWLEDGE REPRESENTATION USING FOL IN ARTIFICIAL INTELLIGENCE

**Nisha Vinod**
Guest Teacher, Computer Education
CSU, Guruvayoor Campus

Knowledge can be defined as familiarization and collection of facts and principles of the language, concepts, procedures, rules, ideas, places, facts, abstractions, places, customs, associations and using these notions effectively in modelling different aspects of the world. The meaning of knowledge is closely related to the meaning of intelligence as intelligence requires the possession of and access to knowledge. The written content in any language is a common way to represent knowledge external to a computer or a human.
Ex:
X is tall – Simple fact, an attribute possessed by a person
X is taller than Y – complex binary relation between two persons

## DEFINITIONS OF KNOWLEDGE

Knowledge can also be based on Belief and Hypothesis. Belief is a meaningful and coherent expression which may be true or false. Hypothesis can be defined as belief which also contains some supporting evidence, but may still be false. Knowledge is true justified belief.




Figure 1: Knowledge Based System having Knowledge Base as separate Entity

 ISSN - 2277-2359

### KNOWLEDGE BASED SYSTEM

It is a system that depends on a rich set of knowledge to perform complex real-world tasks. The systems make their database from the expert knowledge that has been taken from facts, rules, heuristics and procedures.

### EXPERT SYSTEMS

Expert Systems are computer applications developed to solve complex problems of real world using artificial approaches, at the level of extra-ordinary human intelligence and expertise.

### COMPONENTS OF EXPERT SYSTEMS

Knowledge Base
Inference Engine
User Interface

### KNOWLEDGE BASE

Knowledge is required to represent intelligence. The success of any expert system depends upon the collection of highly accurate knowledge in the Knowledge Base system.

### COMPONENTS OF KNOWLEDGE BASE

The Knowledge Base of an expert system has two basic components, factual and heuristic knowledge.

**FACTUAL KNOWLEDGE**: It is the information which is based on facts and figures widely accepted by the Knowledge Engineers and Scholars.

**HEURISTIC KNOWLEDGE**: It is knowledge based on practice, accurate judgement, one's ability of evaluation and guessing.

### INFERENCE ENGINE

The Inference Engine is essential in deducing a correct, flawless solution by use of efficient procedures and rules.

In case of ***Knowledge-based Expert system***, the Inference Engines accesses and manipulates from the Knowledge Base to arrive at a particular solution.

In case of ***Rule based Expert System***, inference engine,

Applies rules frequently to the facts, which are gained from earlier rule application.

Adds new knowledge into Knowledge Base if required.

Resolves rules conflict when multiple rules are applicable to a particular case.

To recommend a solution, the Inference Engine uses the following strategies-

Forward chaining

Backward chaining

**FORWARD CHAINING**: Inference Engine follows the chain of conditions and derivations and finally infers the outcome. It considers all the facts and rules, and sorts them before arriving at the solution (start state to goal state).

**BACKWARD CHAINING**: On the basis of what has already happened, the Inference Engine tries to find out which conditions could have occurred in the past for this result. This strategy is used for finding out cause or reason (goal state to start state).

**USER INTERFACE**

User Interface provides interaction between user of the Expert System and the Expert System itself. The user of the Expert system need not necessarily have knowledge about AI. The user interface makes it easy to trace the credibility of the conclusions.

## HANDLING UNCERTAINTY IN KNOWLEDGE

In Expert Systems "Uncertainty" is related to the working with inexact inaccurate data, imprecise information, handling identical situation, reliability of the results etc.. An expert system allows the user to allocate probabilities, certainty factors, or confidence levels and many more techniques to any or

 ISSN - 2277-2359

all input data. This feature closely characterizes how most problems are handled in the real world.

An expert system considers all relevant factors into account and makes a suggestion based on the best possible solution rather than the only exact solution to handle such problems. Uncertainty is defined as the lack of exact knowledge that would enable us to reach a perfectly reliable conclusion.

## KNOWLEDGE REPRESENTATION TECHNIQUES

Knowledge can be represented in many different ways so that it becomes understandable. The structuring of knowledge depends on how designers might view it. Different knowledge representation techniques are

Logic Semantic Network Frame Scripts

## KNOWLEDGE REPRESENTATION USING "PROPOSITIONAL LOGIC" AND FOL

"**Logic** is a great knowledge representation language for many AI problems"

**Propositional Logic** is the simple foundation and fine for some AI problems.

Uses defined propositional symbols like P and Q.

User defines semantics of each propositional symbol.

-P means "It is hot", Q means "It is humid" etc..

A sentence (well-formed formula) is defined as follows

A symbol is a sentence

If S is a sentence, then, ¬S is a sentence.

If S and T are sentences, then (S □ T), (S □ T), (S → T) and (S ↔T) are sentences.

A sentence results from a finite number of applications of the rules.

 ISSN - 2277-2359

**First order logic (FOL)** is much more expressive as a KR language and more commonly used in AI.

Ex: Every elephant is gray: □x(elephant(x) → gray(x))

There is a white alligator: □x(alligator(x) □ white(x))

**Deduction**:

"An important part of human reasoning"

**Goal**:

In Deduction we represent knowledge in logic and mechanize logical reasoning.

That is, given a set of assumptions (facts) and Universal laws of Logic (Deduction) we can find all new facts which logically follow from the assumptions. All these can be used to prove or disprove an assertion.

**CONVERSION FROM NATURAL LANGUAGE SENTENCES TO PREDICATE LOGIC**

All Pompeians were Romans □x **(Pompeian(x) → Romans(x))**

All Romans were either loyal to Caesar or hated him

□x (**Romans**(x) →(**Loyal (x, Caesar**) □ **Hated** (x, **Caesar**)))

People only try to assassinate rulers they aren't loyal to.

□x □y(**Person**(**x**)□ **Rulers**(**y**) □ **Try Assas (x, y)**→ ¬ **Loyal To** (**x, y**))

**RESOLUTION**

Resolution is a way of mechanizing Deduction. Resolution cancels a pair of literals with opposite signs from two clauses, and combines the rest to a new clause.

Given ¬ **Feathers (Squigs) □ Bird (Sqiugs)**

**Feathers (Squigs)we can conclude Bird (Sqiugs)**

**RESOLUTION ALGORITHM**

Convert all facts to Clause Form (Product of Sum (POS)/Conjunctive Normal Form (CNF))

Convert Negate the goal (theorem to be proven)

Convert the negated goal to clause form and add to set of facts.

Until NIL is found repeat
Select 2 clauses
Compute their resolvent
Add it to the set of facts.
Ex: -
Facts: -

| FACTS | CLAUSE (CNF) |
|---|---|
| IF IT IS SUNNY AND WARM DAY YOU WILL ENJOY. | **(Sunny □ warm) → enjoy**<br>**= ¬(sunny □ warm) □ enjoy**<br>**= ¬ sunny □ ¬ warm □ enjoy** |
| IF IT IS RAINING YOU WILL GET WET | **(raining → wet)**<br>**= ¬ raining □ wet** |
| IT IS WARM | **warm** |
| IT IS RAINING | **raining** |
| IT IS SUNNY. | **sunny** |
| GOAL | |
| YOU WILL ENJOY | **enjoy** |

**NEGATE THE GOAL**
**(¬ enjoy)**
Deduction
**¬ sunny □ ¬ warm □ enjoy**
**Warm**
**Sunny**
**¬ enjoy**
Empty. Achieved goal without clauses 2 **(¬ raining □ wet**)and **4 (raining).**

**CONCLUSION**: **-** (**¬ enjoy**) is empty. There the goal "You will enjoy" is proved to be true.
The above is a very simple example and we have achieved the goal without much trouble. But that is not the case in every

situation where clauses are complex involving more number of implications, bi-implications and quantifiers which are to be reduced.

Ex: □ x (Brick(x) C (□ y (On (x, y) □¬ Pyramid(y)) □¬ □y (on (x, y) □ on (y, x)) □□ y (¬Brick(y) →¬ Equal (x, y)))

The quantifiers and operators need to be deduced based on priority and following steps need to be carried out in order.

Eliminate implications (→ )

Move negation down to atoms (¬)

Perform Skolemization (Eliminate existential quantifiers by inserting skolem functions) (□)

Rename variables so no 2 variables are the same. (x, y, z etc..)

Eliminate Universal quantifiers (□)

Move disjunction down to literals. (□)

Eliminate conjunctions. (□)

Again rename all variables so that no 2 are the same.

Final deduced Clause Form after above mentioned steps: -

[(¬Brick(x) □ On (x, Support(x))

[(¬Brick(w) □¬ pyramid (Support(w))

[(¬Brick(u) □¬ on (u, y) □¬ on (y, u)

[(¬Brick(v) □¬ Brick(z) □¬ Equal (v, z))

**Conclusions about Resolution:**

- It is powerful but subject to exponential explosion
- Theoretically, First Order Predicate Logic is
- Undecidable, No guarantee to halt
- Acceptable, If the goal is true guaranteed to halt
- Together, it is called semi decidable

**References:**Artificial Intelligence by Kevin Knight.

 ISSN - 2277-2359

# ॥परिभाषेन्दुशेखरपरिभास्करयोः स्थिता "व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति" परिभाषा॥

**- श्री सुब्रह्मण्यभट्टः**,
अतिथ्यध्यापकः, व्याकरणविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर परिसरः।

पाणिन्यादि मुनीनादौ प्रणम्य व्याकरणशास्त्रे प्रसिद्धं विचारमेकमुपस्थापयितुमीहे। तत्रादौ व्याकरणशास्त्रे परिभाषापदेन प्रसिद्धानां वाक्यविशेषाणां परिचयः कार्यः। परितो भाष्यते व्याप्रियते इति परिभाषा, अथवा अनियमे नियमकारिणी परिभाषा इति वा व्याख्यानेषु लभ्यते। तत्र परिभाषाभिधेयानां वाक्यानां लोके तावत् न्यायः इति पदेनापि व्यवहारः दृश्यते। यथा – 'गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः' इति न्यायः लोके प्रसिद्धः। सः एव अस्माभिः शास्त्रेऽस्मिन् परिभाषापदेन व्यवह्रियते। तथा च परिभाषाणां अध्ययनेन प्रायः बहवो विषयाः समधिगताः भवन्तीति हेतोः परिभाषाणामध्ययनक्रमः अस्माभिः आदृतः। परिभाषाणां व्याख्यानाय बहवो ग्रन्थाः बहुभ्यः वर्षेभ्यः प्रचलिताः सन्ति। तत्र तावत् "परिभाषा सङ्ग्रहः" इत्यस्मिन् ग्रन्थे बहुभिः ग्रन्थकारैः ये च यावन्तश्च परिभाषाव्याख्याभूताः ग्रन्थाः विरचिताः तेषां सङ्ग्रहोऽकारि।

नागेशभट्टः इति ग्रन्थकारः **परिभाषेन्दुशेखर**नामकं ग्रन्थं रचयामास। तस्मिँश्च ग्रन्थे त्रयस्त्रिंशदधिकं शतं परिभाषाः तेन सङ्ग्रहीताः स्वव्याख्यानमाधुर्येण परिपाविताश्च सन्ति। तदुत्तरकालीनः श्रीमच्छेषाद्रिसुधीरिति ग्रन्थकारः **परिभाषाभास्कर**नामकं ग्रन्थं रराच। तत्रापि परिभाषाणामुपरि व्याख्यानं स चक्रे। उभयोरपि ग्रन्थयोरादौ **व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति** परिभाषा विद्यते। तस्याः परिभाषायाः विषये उभयोरपि ग्रन्थयोः ग्रन्थकर्त्रोराशयमत्र प्रकाशयितुमिच्छामि।

महाभाष्ये पस्पशान्हिके 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्यानावसरे 'अथ सिद्धपदार्थस्य कः अर्थः?' इति आशङ्कामुत्थाप्य

सिद्धशब्दः नित्यपर्यायवचीति प्रतिपादयितुम् एकपदावधारणपक्षं, पूर्वपदलोपपक्षं च उपस्थाप्य ततः "अथवा **'व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति**' नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः" इति भाष्यकृता प्रथमवारं परिभाषेयमुक्ता। एतस्याः उपादानं तावत् भाष्ये बहुत्र कृतम्।

परिभाषेन्दुशेखरे तु 'अ इ उ ण्'[1] इत्यस्मिन् सूत्रे 'लण्'[2] इति सूत्रे च णकारः निर्दिष्टः तत्किमर्थमुभयत्र णकारः आवश्यकः? एतेन णकारमादाय यत्र प्रत्याहारः क्रियते तत्र अण् इण् इत्यादिषु सन्देहो भवति। तेन च सन्देहेन इदं शास्त्रं न आदर्तव्यमिति मतिरुत्पद्येत इति दोषमाशङ्क्य समाधानरूपेण इयं **व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति** परिभाषा व्याख्याता। तथाहि – व्याख्यानतः विशेषप्रतिपत्तिः सन्देहादलक्षणं न हि इति अस्याः अन्वयः। क्वचित् शास्त्रेषु उक्तविषये यदि सन्देहो भवति तर्हि तत्र व्याख्यानतः विशेषविषयाः सन्देहनिवारकाः प्रतिपाद्यन्ते। सन्देहः उत्पन्नः इत्येतावता शास्त्रमिदमनुष्ठानयोग्यं नेति न भावनीयमिति अस्याः परिभाषायाः अर्थः। तत्र परिभाषेन्दुशेखरे विशिष्टः अन्यतराद्यर्थरूपः यः विद्यते अर्थात् सन्देहो नाम इदं न वा इति रूपेण भवति तत्र शिष्टैः आचार्यैः कृतात् व्याख्यानात् एव प्रतिपत्तिः निश्चयः भवति इति। शास्त्रं तावत् निर्णयं प्रतिपादयितुं भवति। अतः तस्य निर्णयजकस्य विषये सन्देहेन अप्रवृत्तिः न युज्यते। सन्देहमात्रेण इदं किञ्चित् सूत्रं सूत्रमेव न अथवा इदं प्रामाणिकं न इति नैव विचारणीयमिति आशयः। तथैव अत्र व्याख्यानं यत्क्रियते तेन असन्देहो भवति इति विषयः कथं ज्ञायते? एषा परिभाषा कथं वा सिद्धा? इति जिज्ञासायामुच्यते। असन्देहेन अनुष्ठानं भवेदित्येतदर्थम् आचार्याणां सन्देहोच्चरणम्।

तथा हि अ इ उ ण् इति सूत्रे णकारोच्चारणं तथैव लण् इति सूत्रे च णकारोच्चरणमिति द्विः णकारमुच्चार्य आचार्यः सन्देहमुद्भावयति। ततः एतादृशसन्देहे सति व्याख्यानमेव शरणमिति प्रतिपादयति इति प्रतिपाद्यते नागेशभट्टेन। लण् सूत्रे भाष्ये च अयमेव विचारः प्रस्तुतः यत् "व्याख्यानाच्च

[1]माहेश्वरसूत्रम् – १।

[2]माहेश्वरसूत्रम् – ६।

द्विरुक्तः" इत्यनेन वार्तिकेन एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा **व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति। अणुदित्सवर्णस्य चाप्रत्ययः**[1]इति सूत्रं परिहाय पूर्वेणाण् ग्रहणम्, परेण इण्ग्रहणमिति व्याख्यास्यामः इति भाष्ये स्पष्टमेव प्रतिपादितम्। तदेवानुसृत्य परिभाषेन्दुशेखरे विचारः प्रस्तुतः।

परिभाषाभास्करेऽपि प्रथममेव एषा परिभाषा व्याख्याता। तत्र अभिमतार्थस्य उपलब्धये अभियुक्तवचनरूपेण विद्यमानेन अभिमतार्थः चीयते। सन्देहनिवारणाय व्याख्यानं सहकरोति इत्युच्यते। अत्र ग्रन्थे सन्देहो नाम कः इति उच्यते, यथा – कोटिद्वयावगाहिज्ञानमभिमतानभिमत-साधारणज्ञानमनभिमतमात्रज्ञानं च इति। इदं त्रयमपि सन्देहे भवति इति ग्रन्थकर्तुराशयः। एतदेव मनसि निधाय उदाहरणान्युक्तानि परिभाषाभास्करे। तथा च कोटिद्वयावगाहिज्ञाने तावत् ङेर्यः[2], ङेराम्नद्याम्नीभ्यः[3] इत्यादौ ङेः इति पदविषये सन्देहे जाते व्याख्यानेन ङेर्यः[4] इति सूत्रे चतुर्थ्येकवचनस्य ग्रहणम्, ङेराम्नद्याम्नीभ्यः[5] इत्यत्र तु सप्तम्येकवचनस्य ग्रहणमिति अभिमतार्थः निर्णीयते। एवमेव प्रातिपदिकान्तनुम्विभक्तिषु च[6] इत्यस्मिन् सूत्रे उत्तरपदभूतं यत्प्रातिपदिकं तदितरं च सामान्यं यत् प्रातिपदिकं तयोरुभरोर्मध्ये कस्य ग्रहणमिति सन्देहे व्याख्यानतः अभिमतस्य उत्तरपदभूतस्य प्रातिपदिकस्य ग्रहणमिति सिध्यति। एवमेव अट्कुप्वाङ्नुम्व्यवायेऽपि[7] इत्यस्मिन् सूत्रे नुम् पदेन अनभिमतस्य नुमः एव ग्रहणे प्रसक्ते, नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति व्याख्यानं क्रियते। तेन च अभिमतार्थलाभो जायते। एतत् सर्वमपि व्याख्यानतो विशेषप्रतिपत्तिः इति परिभाषायाः फलम्। इदं परिभाषाभास्करग्रन्थे स्पष्टतया निरूपितम्। एवं च

[1]अष्टाध्यायी सूत्रम् – १/१/६९।
[2]अष्टाध्यायी सूत्रम् – ७/१/१३।
[3]अष्टाध्यायी सूत्रम् – ७/३/११६।
[4]अष्टाध्यायी सूत्रम् – ७/१/१३।
[5]अष्टाध्यायी सूत्रम् – ७/३/११६।
[6]अष्टाध्यायी सूत्रम् – ८/४/११।
[7]अष्टाध्यायी सूत्रम् – ८/४/२।

 ISSN - 2277-2359

परिभाषेन्दुशेखरे परिभाषाभास्करे च **व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति** परिभाषा कथं प्रतिपादिता इति यथोचितं प्रतिपादितम्॥

**सन्दर्भग्रन्थाः**

१. परिभाषेन्दुशेखरः – राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

२. परिभाषासङ्ग्रहः – म.म. के. वि. अभ्यङ्करः, भण्डार्कर इन्स्टिट्यूट, पूना।

# ॥शास्त्रदिशा कर्मयोगसमीक्षा॥

***धनेशः पि वि***

*योगाध्यापकः*

*के.सं.विश्वविद्यालयः - गुरुवायूर् परिसरः*

संयोगार्थकयोगशब्देन नैके सम्प्रदायाः योगे विद्यमानास्सन्ति चेदपि ततो विलक्षणमिदं दर्शनमिति निरुपणाय युज समाधाविति धातोः प्रयोगेण पातञ्जलयोगदर्शनसिद्धान्ता विवक्षिता इत्येव ***योगः समाधिः*** [1]इति व्यासभाष्यम् प्रमाणीकरोति। विद्यमानाः योगसम्प्रदायाः तावत् दर्शनोक्तलक्ष्यं साधयितुं तत्रोक्तविविधसाधनानां पृथग् निर्देशं वा, तत्साधनां साधयितुं शक्तिं वा प्रदास्यन्ति। तद्यथा, हठ इति सम्प्रदायः राजयोग इति नाम्ना प्रथिताष्टाङ्गयोगसाधनायेति हठयोगप्रदीपिकामङ्गले दृश्यते, ***विभ्राजते प्रोन्नतराजयोग-मारोढुमिच्छन्नधिरोहिणीव*** [2]। एवं ईश्वरप्रणिधानम् इति विशिष्टां योगसाधनां भक्तियोग इति सम्प्रदाये निरूपयन्ति। अतः स्पष्टं भवति यत् कैवल्यं साक्षाद्वा परम्परया साधयितुमेव योगसम्प्रदायाः प्रवर्तन्त इति॥

इत्थं विद्यमानेष्वनेकसम्प्रदायेषु कर्मणा मोक्षप्राप्तिरिति युक्त्या कर्मयोग इति सम्प्रदाये साधना दृश्यते। इतरसम्परादयवत् प्रामाणिकग्रन्थोऽयमिति वक्तुं कर्मयोगस्य नास्ति। अनेन मार्गोऽयं नूतन इति वा अनुचित इति वा न चिन्तनीयम्, यतो ह्यस्मिन् विषये मुख्यतया भगवद्गीतायां तथा उपनिषत्सु माण्डूक्योपनिषदि एवं पुराणेषु भागवते च निरूपणं दृश्यते। पुनश्च कालान्तरे विवेकानन्दस्वामिना स्वधर्मभाषणेन एतस्य कर्मयोगसम्प्रदायस्य प्रचारः कृतः। एवं व्यवहाराय सामान्यजनस्य अपेक्षितं तत्थ्यं निरूपयति इत्यतः मुख्ययोगसम्प्रदायेषु अन्यतमत्वमागतम्। इतः विलक्षणमेव कर्मानुष्ठानेन मुक्तिरिति कथयतो मीमांसकस्य मते दृश्यते। विहितानां यज्ञयागादिकर्मणामनुष्ठानं मोक्षसाधकमिति पूर्व-मीमांसकाः।

---

[1] योगसूत्रम् – 1-1,व्यासभाष्यम्।

[2] हठयोगप्रदीपिका - 1-1.

एतद्विषये मीमासाशास्त्रं सम्यक् प्रतिपादयतीत्यतो तदतिरिक्तमेवात्र सम्प्रदाये निरूप्यते॥

अत्र धर्मानुसारं क्रियमाणप्रवृत्तावेव कर्मशब्दविवदिषा। ***स्वधर्मे निधनं श्रेयः परधर्मो भयावहः*** [1]इति गीतोक्त्या स्वधर्मानुष्ठानेन मरणमपि श्रेयस्करं भवति इत्यवगम्यते। अत्र स्वधर्मः कः, मया इत्थमेव कार्य्यम्, एतद्धि कर्म अनुष्ठेयम्, इदमननुष्ठेयम् इत्यादीनां विवरणाय स्मृतिग्रन्थाः प्रवृत्ताः सन्ति। अतः कालदेशानुगुणं स्वधर्मलक्षणं परिणमते। इत्थं परिणामशीलस्य धर्मस्य विषये सम्प्रदायरूपेऽस्मिन् कर्मयोगे नैव उच्यते इति अवगन्तुं क्लेशो न भवेदिति मन्ये। अतः स्वधर्मशब्दार्थ उच्यते ***स्वधर्मो योगमार्गः स्यात्*** इति। एवं योगमार्गः नितरां श्रेयस्करः इति प्राप्यते॥

कर्म त्रिविधमित्युच्यते। सञ्चितम्, प्रारब्धम्, आगामि इति। पूर्वकृतकर्मसमूहः येषां फलं नानुभुक्तं तत्सञ्चितमिति, प्रारब्धं नाम अस्मिन् जन्मनि अवश्यमनुभोक्तव्यकर्माणि तथा आगामि भाविनि काले फलदायकानि कर्माणि इति॥

क्रियमाणं भवति कर्म, अतः सः द्विप्रकारकः, धर्मः अधर्मश्चेति। धर्मकर्मणा पुण्यं, तथा अधर्मेण पापं च जायते। पुण्यस्य फलं सुखं, पापफलं दुःखं च भवति। एतादृशकर्मफलं जातिः, आयुः, भोगः इति कर्मविपाकं जनयति। कर्मफलानुभवाय मनुष्यजातिरुत्तमा वा पशुजातिः, एवमेव कियत्कालमस्य जीवनं स्यादिति आयुषः निर्णयः, तथा सुखदुःखानुभवानां व्यवस्था च स्वयं क्रियमाणकर्मणो परिणाम एव भवति, स एव विपाकः। तदित्थं कर्मणः संस्कारास्सम्भवन्ति। संस्कारो नाम कर्मानुष्ठानेन जायमानः सूक्ष्मरूपः परिणामविशेषः। तत्र एकत्रीकृताः एकरूपसंस्काराः वासना अथवा आशयः इति नाम्ना कथ्यन्ते। एवं वासनावशादेव मनुजानां प्रवृत्तिः भवति। एतादृशप्रवृत्तौ अथवा कर्मणि कः प्रेरक इति चेत् क्लेशः इति उच्यते। अविद्या-अस्मिता-रागः-द्वेषः-

[1] भगवद्गीता – 3-35.

अभिनिवेशः इति पञ्चक्लेशाः सन्ति।[1] एतद्वशादेव कर्म करोति। अतः कर्मानुष्ठाने बीजं भवति क्लेशः। तत्र च मुख्या अविद्या।[2] एवम् अविद्यादिना क्लेशेन धर्माधर्मरूपककर्मप्रवृत्तिः, ततो विपाकः, पुनश्च तज्जनितवासनावशाद् रागद्वेषादिना कर्मप्रवृत्तिरिति कर्मसंस्कारचक्रम-निशमावर्तते। अयमेव संसारबन्धः। इतश्च सर्वदा मुक्तो भवति ईश्वरः इति तल्लक्षणकथनवेलायां कर्मसम्बन्धविषये प्रागुक्तं सर्वमपि पातञ्जले निरूपितमस्ति।[3] अस्मदादीनां तु अविद्यानाशात् मुक्तिः भवति इति सिद्धान्तः।।

एवम् अविद्यादिक्लेशवशात् कर्म क्रियते। कर्म च प्रधानतया द्विप्रकारकम्, धर्म अधर्म इति। इतः जन्ममरणचक्रतो मुक्तिमेव साधकः इच्छति। तदर्थं फलनिरपेक्षं कर्म अनुष्ठेयं भवति। यस्य कर्मणः फलानुभवेन वा तत्संस्कारेण वा कर्मान्तरोत्पत्तिर्न भवति अथवा यत्कर्म अथवा संस्कारो वा मोक्षसाधनायामुपकरोति तादृशकर्मणामाचरणमेव कर्मयोगेणाभिमतमिति योगिनामभिप्रायः। यतो ह्येतद्धि योगिजनैकसाध्यम्।।

***कर्माशुक्लाकृष्णं योगिनः त्रिविधमितरेषाम्*** [4] इति योगसूत्रदिशा कर्म वस्तुतः चतुष्प्रकारकम् यथा - शुक्लं,कृष्णं, शुक्लकृष्णं, अशुक्लाकृष्णम् इति। शुक्लं नाम पुण्यं धर्मकर्म, कृष्णं नाम पापमधर्मकर्म, शुक्लकृष्णं नाम मिश्रकर्म एतत्रिकं सामान्यानामितरेषां कर्म। योगिनां तु कर्म, न वा पुण्यरूपकं तथा न वा पापरूपकं, न वै मिश्रं च इति हेतोः अशुक्ल-अकृष्णकर्म इत्युच्यते। तेन कर्मणा फलनिष्पादनं न भवतीत्यतः क्लेशान् न जनयति। क्लेशाभावे च पुनः कर्मसंस्कारचक्रस्याप्रवृत्या साधको कालेन मुक्तो भविष्यति।।

एवं कर्मसिद्धान्तं सुचयितुमेव भगवद्गीतायां कर्मण्येवाधिकारः न तु तत्फले अधिकार इति बोधयति भगवान्। अतः कर्मफलहेतुत्वेन कर्म न करणीयं परमेतेन

---

[1]***अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः*** – योगसूत्रम् – 2-3.

[2]***अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्*** – योगसूत्रम् – 2-4.

[3]***क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः*** - योगसूत्रम् - 1-24.

[4] योगसूत्रम् – 4-7.

 ISSN - 2277-2359

कर्म न त्याज्यमिति च शास्ति।[1] अत एव सङ्गं त्यक्त्वा योगिना कर्म कार्य्यमिति उपदिशन् तेन कर्मणा एकाग्रप्रवृद्ध्या कर्मकुशलता च समायाति साधकस्य इत्यादिशति। तस्मादुक्तम् - ***योगः कर्मसु कौशलम्*** [2] इति॥

## ***सन्दर्भग्रन्थसूची***


1. पातञ्जलयोगसूत्रम् -Kaivalya Dhama - Lonavala - Pune - 2005.
2. श्रीमद्भगवद्गीता - Geeta Press - Gorakhpur - U.P - 2018.
3. हठयोगप्रदीपिका - Swami MuktiBodhananda - Bihar School of yoga - Munger -1999.
4. **Karma Yoga** - the Yoga of Action - Swami Vivekananda - Advaita Ashrama - Calcutta - W.B - 2010.


[1] भगवद्गीता - 2-47.

[2] भगवद्गीता - 2-50.

# ॥पुरुषार्थचतुष्टये धर्मस्वरूपविचारः॥

**डॉ. ओ. वि. शिबु**
अतिथ्यध्यापकः, अद्वैतवेदान्तविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर परिसरः।

पुरुषार्थप्राप्तिरेव सर्वमानवानां जीवनलक्ष्यम्। धर्मार्थकाममोक्षाः चतुर्विधपुरुषार्थाः भवन्ति। एतेषु पुरुषार्थेषु धर्मस्य स्वरूपविचारः अत्र क्रियते। परमपुरुषार्थस्य आधारः धर्मस्य क्रियात्मकशक्तिरेव भवति। जीवनमार्गः सुगमः सुखकरः च भवितुम् उपनिषदाचार्यैः उपदिश्यते 'धर्मं चर' इति। आयुरारोग्यैश्वर्याणाम् अभिवृद्धिः तथा मुक्तिश्च धर्मादेव सम्भवति। प्रपञ्चसारं च धर्मे अधितिष्ठति॥

**"धर्मादर्थः प्रभवते धर्मात् प्रभवते सुखम्।**
**धर्मेण लभते सर्वं धर्मसारमिदं जगत्॥"**

(वाल्मीकिरामायणम्-अरण्यकाण्डम्-9-30)

ऐहिकामुष्मिकैश्वर्याणाम् अभिवृद्धिः येन लभ्यते सः धर्मः। उक्तं च वैशेषिकदर्शने " यतोभ्युदयनिश्रेयससिद्धिः स धर्म" इति। भारते प्रकाशितेषु आदिमधर्मग्रन्थेषु प्रथमगणनीयः ऋग्वेदः भवति। ऋग्वेदे धर्मस्य महत्वम् विस्तृतरूपेण दृश्यते॥

**"त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्य अतो धर्माणि धारयन्"**

(ऋग्वेदः-1-22-15)

येन विश्वं भद्रतया परिपाल्यते सः धर्म इति मन्त्रस्यास्यार्थः। एवं इतिहासपुराण्वेष्वपि धर्मस्य महत्वं दरीदृश्यते। समानरुपेण अस्मिन् लोके परलोके च येन भुक्तिमुक्तीश्च दीयते स धर्म। उक्तं च महाभारते-

**"धारणाद्धर्म इत्याहुः धर्मो धारयति प्रजा।**
**यः स्यात् धारणसंयुक्तः स धर्म इति निश्चयः॥"**

(महाभारतम्)

तथा मीमांसायां ''चोदनालक्षणोऽर्थो धर्म''इत्युच्यते। कर्मानुष्ठाने प्रेरणा येन दीयते सः धर्म इति। धर्मलक्षणानि धर्मानुष्ठानजीवनं च धर्मशास्त्रेषु स्पष्टतया निर्दिश्यन्ते॥

**''धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥''**

(मनुस्मृति ६.९२)

इतोपि विपुलीकृत्य त्रिंशल्लक्षणान्येव पद्मपुराणे दृश्यते-

''सत्यं दया तप: शौचं तितिक्षेक्षा शमो दम:।
अहिंसा ब्रह्मचर्यं च त्याग: स्वाध्याय आर्जवम्॥
संतोष: समदृक् सेवा ग्राम्येहोपरम: शनै:।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्॥
अन्नाद्यादे संविभागो भूतेभ्यश्च यथार्हत:।
तेषात्मदेवताबुद्धि: सुतरां नृषु पाण्डव॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गते:।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्॥
नृणामयं परो धर्म: सर्वेषां समुदाहृत:।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति॥''

(७-११-८ १२ )

धर्मस्य विजयः तथा धर्मस्य महत्वमेव इतिहासे सर्वत्र दृश्यते। ''यतो धर्मस्ततो जय'' इति महाभारतवचनं प्रसिद्धमेव। तथा भगवद्गीतायां भगवता श्रीकृष्णेन स्वधर्मबोधनं धर्मानुष्ठाने प्रेरणा च दीयते। धर्मग्लानिः यथा संभवति तदानीं धर्मसंरक्षणाय अधर्मनाशाय च भगवतः अवतारः भविष्यति इत्युच्यते॥

**''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥''**

(भगवद्गीता-4-7)

यद्यपि जनाः सर्वे धार्मिकविषयान् जानन्ति तथापि अनुष्ठाने विमुखाः सन्ति। धर्मं कर्तुं न इच्छन्ति परन्तु तस्य फलं वाञ्छन्ति। यथा कथितमस्ति -

**“धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः।**
**फलंपापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः॥”**

(सुभाषितरत्नाकरम्)

किन्तु एवं भवितुं कथमपि न शक्यते। जनानां धर्मभीतिः अनुचितैव। स्वकर्तव्यस्य परिपालनविधिरेव धर्मः। यतोहि तस्मादेव भौतिकाध्यात्मिकोन्नतिः संभवति। गीतायां भगवान् श्रीकृष्णः अर्जुनं प्रति धर्मस्य उपदेशं करोति॥

**“श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥3.35॥”**

ये जनाः धर्मस्य रक्षां कुर्वन्ति, धर्मानुकूलमाचरन्ति तेषां जनानां धर्मोऽपि रक्षां कुर्वन्ति। यश्च पुनः धर्माचरणं नहि विदधाति, धर्मं न रक्षति तथा धर्मं हन्ति, हतो धर्मः तमपि हन्ति तस्य विनाशं करोति। अतः धर्मो न हन्तव्यः। महाभारते एवं कथितमस्ति-

**“धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्॥”**

युगप्रभावेण श्रीनारायणगुरुदेवेन धर्ममहत्वम् एवमुच्यते-

**“ धर्म एव परंदैवं धर्म एव महाधनम्।**
**धर्मस्सर्वत्र विजयी भवतु श्रेयसे नृणाम्॥”**

(श्रीनारायणगुरुकृति- धर्म)

यद्यपि गुरुदेवेन एका एव कृतिः धर्ममुद्दिश्य विरचिता तथापि धर्माचरणविषये श्रीनारायणधर्ममिति बृहत् ग्रन्थमविरचयत। तत्र सामान्यधर्माः ब्रह्मचारिधर्माः गृहस्थधर्माः सन्यासिधर्माः च विशेषतया प्रतिपादितमस्ति। सामान्यधर्मे पञ्चधर्मबिन्दवः एवं कथ्यते॥

**“अहिंसा सत्यमस्तेयस्तथैवाव्यभिचारिता।**
**मद्यस्य वर्जनं चैव पञ्चधर्मास्समासतः॥”**

(श्रीनारायणधर्मं)

एवं पञ्चशुद्धयः उक्तं च –

 ISSN - 2277-2359

**"कायवाक्चेतसां शुद्धिरिन्द्रियाणां गृहस्य च।**
**संक्षेपान्मर्त्यवर्गस्य पञ्चैताः शुद्धयः स्मृताः॥"**

(श्रीनारायणधर्मं)

वेदव्यासो धर्मस्सर्वस्वं प्रतिपादयन् एवं उल्लिलेख –

**"श्रूयतां धर्मस्सर्वस्वं श्रुत्वाचैवावधार्यतां।**
**आत्मनप्रतिकूलानि परेषां न समाचरेत्॥"**

(पद्मपुराणं 19-357)

एवं कथयितुं शक्यते, यत् जीवने सर्वदा सर्वथा धर्मस्य अपेक्षा वर्तते। अनेनैव जनः एकान्तिकं आत्यन्तिकं च आनन्दं लब्धुं शक्नोति। अतः सर्वदा धर्मस्य आश्रयः कर्तव्यः। जन्तूनां मानवानां च पृथक्करणं धर्मेणैव भवति॥

**"आहारनिद्राभयमैथुनं च समानमेव पशुभिर्नराणाम्।**
**धर्मो हि एको अधिको विशेषो धर्मेण हीनः पशुभिः समानः॥"**

- चाणक्य नीति (१७/१७)

सर्वे मानवाः धर्मानुष्ठानेन प्रसारणेन च धर्मसंरक्षणं कर्तव्यः॥

इति शम्।

## ग्रन्थसूचिः

ऋग्वेदः
महाभारतम्
राणायणम्
पद्मपुराणम्
भगवद्गीता
चाणक्यनीतिः
सुभाषितरत्नाकरम्
श्रीनारायणधर्मम्
श्रीनारायणकृतिः॥

 ISSN - 2277-2359

# ॥संस्कृतस्य मातृभाषिपरम्पराशिक्षणं च॥

**ललित मोहन पन्तोला**

शिक्षाशास्त्रविभाग

केन्द्रीयसंस्कृतविश्वविद्यालय, गुरूवायूर् परिसर

अणुवाक् – luckypantola10@gmail.com

सकलेविश्वे विद्वांसःपूर्वाग्रहं विना स्वीकुर्वन्ति यत् कल्पारम्भादेव मानवानां संवादस्य एकमात्रभाषा वैखरीस्वरूपेण **इडासरस्वती** वा ख्यापिता आसीत्। आर्यभाषा, देवभाषा, वेदभाषा, वाग्ङ्म्भिडी, संस्कृतञ्च विविधैर्नामभिस्सा ज्ञायते। इयं हि प्रकृतिरिति। उच्चारणस्योपरि प्रकृतेः साक्षात् प्रभावो भवति। प्रकृतिभेदः उच्चारणभेदस्य पश्चाच्च भाषाभेदस्य प्रमुखं कारणमिति। इदानीं यद्वयं ज्ञातुं प्रभवामः तद् भाषाभेदस्य परम्परा केन प्रकारेण वा कदा प्रारब्धा इति ? तदा तु सन्देहं विना वक्तुं पारयामः यत् संस्कृतभाषिपरम्परां सीम्नि बध्नातुं न शक्ष्यामः। अस्याः समयसीमा का इति वक्तुं सम्यग्तया न पार्यते इत्यर्थः। यतः यादारभ्य मानवः भाषासम्पर्कसाधने सफलो दृश्यते, तदारभ्य अस्यां देववाण्यां प्रथमतया भाषासम्प्रेषणे समर्थ्यमागतमासीत् मानवस्य इति सुसिद्धमेव॥

मातृभाषया व्यहारस्य प्राचीतमं प्रमाणं भरतमुनेः नाट्यशास्त्रे मिलति। यस्मिन् तैः प्रप्रथमं संस्कृतस्य द्वे विभाषे उक्ते **'अतिभाषा तु देवानां आर्यभाषा तु भू भुजाम्, संस्कारपाठसंयुक्ता सप्तद्वीपप्रतिष्ठिता '**। [1]अन्यमपि **'हय इति देवान् वाजि इति गन्धर्वान्, अश्व इति मनुष्यान् अर्वा इति असुरान्।'**[2] अत्र उपस्थापितेऽस्मिन् प्रथमश्लोके संस्कृतभाषायाः विशिष्टं स्वरूपं प्रतिपादितं विद्यते। अत्र देवानां भाषा अतिभाषात्वेन, आर्यभाषा भूमौ वसतानां कृते प्रयुक्ता। तदानीं मुख्यतः द्वे भाषे प्रतिष्ठिते आस्ताम्, प्रथमा तु देवानां भाषा या अतिभाषेत्युक्ता द्वितीया आर्याणां भाषा च। द्वयोः भाषयोः संस्कारपाठस्य तदानीं प्रभावः आसीत्

[1]भरतमुनिः नाट्यशास्त्रम्।

[2]तत्रैव।

इत्यर्थः। सप्तसु द्वीपेषु अनयोः प्रतिष्ठा आसीत् इत्यपि श्लोकेन ज्ञायते। तथैव द्वितीयश्लोके तु संस्कृतभाषायाः चतुर्णां स्वरूपाणां वर्णनं दृश्यते। वयं समेऽपि मानवाः अश्वः इति जानीम एव। तदानीन्तन काले अश्व इति पशवे भिन्नभिन्ना संज्ञा दृश्यते॥

श्लोकस्यास्य प्रथमपादे अश्वं - देवाः हयेति बभाषे, वाजि इति गन्धर्वाः बभाषे, अश्व इति मानवाः बभाषे अर्वा च असुराः बभाषे इति प्रसङ्गः प्राप्यते। संस्कृतभाषायाः प्राचीनेतिहाससम्बन्धद्धसूचना आदिकाव्ये रामायणेऽपि वर्तते। **'यदि वाचं प्रदास्यामि द्विजातेरिव संस्कृताम्, रावणं मन्यमाना मां सीता भीता भविष्यति'।**[1]अयं श्लोकः 5000 वर्षेभ्यः अधिकः पुरातनः वर्त्तते इत्यत्र नास्ति सन्देहः। श्लोकानुगुणं वक्तुं शक्नुमः यत् रामायणकालीना जनभाषा संस्कृतमासीत्। ऋक्संहिता भाषादृष्ट्या संस्कृतस्य आद्यतमं रूपं विद्यते। अस्याः भाषाविज्ञानस्वरूपं प्राचीनं वर्तते। अस्मिन् शास्त्रे भाषाद्वयस्य लौकिक्याः वैदिक्याश्च प्रमाणानि मिलन्ति **'संस्कृतं नाम दैवी वागन्व्याख्याता महर्षिभिः'।** [2] श्लोकेऽस्मिन् संस्कृतं भाषिकपरम्परायां प्राचीनमिति निर्दिष्टम्। राष्ट्रकालादिदृष्टया संस्कृतभाषिकपरम्परायाः नैकानि रूपाणि आसन्। इत्यपि प्रमाणानि मिलन्ति यत्र पूर्वोत्तरकाले **'उदीचाम्'** मध्यदेशीयानां भाषा विभाषा वा आसीत्। ततः परं पाणिनिकालात् नियमितशुद्धव्याकरणपरम्परायाः स्थायित्वं दृश्यते, अनन्तरं महर्षेः पतञ्जलेः काले संस्कृतं प्रायशः जनभाषारूपेण आसीत् इत्यस्य प्रमाणं अनेन श्लोकेन मिलति यथा - **'गादर्शात्प्रत्ययक्कालकवनाद् दक्षिणेन हिमवन्तमुत्तरेण वारियात्रमेतास्मिन्नार्यावर्ते आर्यानिवासे..............................**'।[3] संस्कृतमातृभाषिपरम्परा कतिभ्यो वर्षेभ्यो प्रवाहमाना अस्ति, संस्कृतमातृभाषिपरम्पराविचारः कियान् पुरातनः मतेऽस्मिन् विदुषां मतैक्यं नास्ति। संस्कृतमातृभाषिपरम्परा वाक्येऽस्मिन् 'भाषी' इति

---

[1]सुन्दरकाण्डम्।
[2]काव्यादर्शः दण्डी।
[3]महाभाष्यम्, पतञ्जलिः।

शब्दस्यार्थः संस्कृतभाषावदनपरम्परायाः कियान् पुरातनेतिहासः इति स्वीक्रियते। अस्य कालक्रमे अपि विदुषां मतैक्यं नास्ति। कतिचन प्रमाणानि प्राप्यन्ते यैः वक्तुं शक्नुमः यत् कियती पुरातनी संस्कृतिः इयम्। अस्मिन् शास्त्रे भाषाद्वयस्य वैदिक्याः लौकिक्याः च प्रमाणानि मिलन्ति। अत्र केवला अनुमितिः अस्माभिः शक्यते यया वक्तुं शक्नुमः यत् संस्कृतमातृभाषिपरम्परा आदिकालात् अधुनापर्यन्तमपि प्रचाल्यमाना अस्तीति॥

- **मातृभाषाध्ययनस्य वर्तमानकालिक्यः सम्प्रत्ययः**

वयं जानीमः यत् अस्माकं काचन मातृभाषा अस्ति, परं यया भाषया वयं व्यवहरामः सा कदाचिद्भिन्ना। भारतीयानां तु स्थितिः एवमस्ति यत् आबाल्यात्ते मातृभाषायां निजसमाजे व्यवहारं कुरुते, परं विद्यालयस्य पठनपाठनाय या भाषा भवति सा तु समाजात् भिन्ना। वस्तुतः इयं स्थितिः न केवलं भारते अपितु सकले विश्वे ये राष्ट्राः ब्रिट्रेनफ्रांसराष्ट्रयोः औपनिवेशिकराष्ट्राः वर्तन्ते, तेषु इदानीमपि मातृभाषायाः स्थाने आङ्लफ्रैञ्चभाषे शिक्षायाः माध्यमत्वेन स्वीकृते वर्तेते। भारतं तेषु राष्ट्रेषु एकः यत्र इदानीमपि आङ्गलं शिक्षायाः माध्यममिति॥

भारतीयसंविधानस्य अनुच्छेदक्रमाङ्क 350 (क)तमधारायां प्राथमिकस्तरे मातृभाषया शिक्षणस्य विचारः प्रदत्तः। तद्यथा **It shall be the endeavour of every state and of every local authority within the state to provide adequate facilities for instruction in the mother - tongue at the primary state of education to children belonging to linguistic minority groups, and the president may issue such direction to any state as the considers necessary or proper for securing the provision of such facilities.**[1]महात्मागान्धी मातृभाषया शिक्षणस्य पक्षे आसीत्। अयं महोदयः शोषणरहितसमाजस्य स्थापनायाः पक्षे आसीत्। अनेन **बुनियादी**शिक्षायाः सम्प्रत्ययः समाजस्य पुरस्तात् स्थापितः। प्रतिवर्षं फरवरीमासस्य 21 तमे

[1] Constitution of India.

दिनाङ्के**अन्ताराष्ट्रियमातृभाषादिवसः** सकले विश्वे आचर्य्यते। विश्वे सर्वेषु राष्ट्रेषु मातृभाषायाः स्थितिः का ? अस्य विचारः दिवसेऽस्मिन् क्रियते॥

अत्रादौ मातृभाषाधारितं शिक्षणं नाम किम् ? अस्य प्रश्नस्य उत्तरम् आवश्यकं प्रतिभाति। वस्तुतः औपचारिकशिक्षायां प्राथमिकस्तरे यस्याः भाषायाः प्रयोगः छात्रस्यावगमनाय विधीयते, सा भाषा बालकस्य गृहव्यवहारेऽपि व्यवह्रियते यथा हिन्दीभाषा, आङ्गलम् इत्यादयः। अनया भाषया यदि छात्रः सम्पूर्णशिक्षामधिगच्छति तर्हि तस्य अधिगमः उत्तमरीत्या विस्तीर्णो भवति। अनेन एव छात्रस्य भाविने जीवनाय बहुविधभाषाणां विषयाणाञ्च अवगाहनं सम्यक् रीत्या भवति॥

- **विषयत्वेन मातृभाषा**

विषयत्वेन मातृभाषया शिक्षणेन पठनकौशलस्य विकासेन सह वाचनकौशलस्यापि अभिवर्धनं भवति। उदाहरणाय कश्चन बालः हिन्दीभाषामाध्येन प्रथमकक्ष्यातः अधीते। अन्तरं तेन विविधाःभाषाः विविधिषयाश्च अधीताः। एवम्प्रकारेण अनुदेशनत्वेन मातृभाषया शिक्षणेन विविधविषयानाधारीकृत्य प्राथमिकस्तरे माध्यमिकस्तरे उच्चस्तरे च पाठ्यते॥

- **मातृभाषया शिक्षणस्य लाभाः**

वस्तुतस्तु मातृभाषया पाठनेन बहुः लाभो भवति। बालः यस्मिन् क्षेत्रे जन्म आलभते तत्रत्यां विशिष्टां संस्कृतिं तत्रत्यविशिष्टं ज्ञानं च मातृभाषयैव अधिगच्छति। सा च भाषा यदि तस्य विद्यालयेऽपि माध्यमत्वेन विषयत्वेन च पाठ्यते तर्हि सः आबाल्यादेव पठनेन सह चिन्तनकौशलेऽपि समर्थो भवति। यत्रएवं न भवति तत्र बालाः रटन्तः दृश्यन्ते न तु अवगमनसमर्थाः।अस्य नैके लाभास्सन्ति तथापि केचन अधः प्रस्तूयन्ते यथा अपव्ययसमस्यायाः निवारणाय, अवरोधन-समस्यायाः निवारणाय, अधिगमसौकर्याय, अधीताधिगमस्य स्थानान्तरणाय, छात्रस्य गृह-परिवार-समवयस्कवर्गाणां सहभागित्व-वर्धनाय, पठनपाठने मितव्ययतागुणसम्वर्धनाय च॥

## ▪ प्राथमिकस्तरे मातृभाषया शिक्षणं किमर्थम् ?

राष्ट्रियशिक्षानीतौ 2020 प्राथमिकस्तरे केवलं मातृभाषया अध्ययनस्योपरि बलं ददाति। तत्र स्पष्टोल्लेखः वर्त्तते यत् बालकस्य मस्तिष्कतन्त्रिकातन्त्रस्य समुचितः विकासः मातृभाषया प्राथमिकस्तराद् शिक्षणेन भवितुमर्हति इति। एचञ्च राष्ट्रियान्ताराष्ट्रियशोधैर्ज्ञायते प्राथमिकस्तरादेव मातृभाषया विविधविषयाणां शिक्षणे भूते सति बालकस्य भाविने जीवनाय दिग्दर्शनं सञ्जायते। भाषाविद्वद्भिर्निगदिदं वर्त्तते यत् बाल्यकाले बालकस्य स्मरणशक्तिः उत्तमा भवति। ते अनया सह तर्ककरणेऽपि समर्थाः भवन्ति। अन्तरञ्च तेषां वैयक्तिकजीवनस्तरः उत्कृष्टः भवति। मातृभाषा बालकस्य जीवनपरिवेशं परितः विद्यमाना भवति। इयमेव प्राथम्येन तस्य सामाजिकीकरणस्य आधारभूता। अनया सः शैशवात् भाषाविकसनमाप्नोति। मातृभाषया शिक्षणेन बालकः स्वविचारान् अध्यापकस्य पुरतः स्थापने समर्थो भवति। येन बाल्यादेव सः भाषणे, चिन्तने, क्रियाधारिताधिगमे च समर्थो भवति। अनया रीत्या शिक्षणं समसमाजे (Homogeneous community) भवति यत्र अध्यापकः समेषां विषयाणामुपस्थापनं मातृभाषया उपस्थापयन्ति छात्राश्च सोत्साहं भागं संगृह्य वास्तविकज्ञानमाप्नुवन्ति। अतः मातृभाषया शिक्षणं प्राथमिकस्तरादेव भवितव्यम्।

## ▪ मातृभाषया शिक्षणेन वैश्विकस्तरे लाभाः

मातृभाषाधारितेन शिक्षणेन बहुषु राष्ट्रेषु साक्षरताप्रतिशतं शतप्रतिशतं वर्तते। छात्राः, अध्यापकः किं कथयति इति सम्यक्तयावगच्छन्ति। अनेन उत्तमः चिन्तनस्तरः सञ्जायते।छात्राणां तर्कक्षमतायाम् अभिवृद्धिर्जायते। सहैव तेषां मनसि चिन्तनात्मकप्रश्नानां जागरणं भवति। सकले विश्वे मातृभाषया शिक्षणस्य लाभान्अधोलिखितया तालिकया अनुसारं ज्ञातुं शक्ष्यामः -

## धनिकराष्ट्राः

| स्तरः | राष्ट्रनाम | प्रतिव्यक्ति G.n.p स्तरः | जनभाषा | राजभाषा |
|---|---|---|---|---|
| 1. | स्विटजरलैण्ड | 38,380 | जर्मन, फ्रेन्च, इटैलियन | जर्मन, फ्रेन्च, इटैलियन |
| 2. | डेनमार्क | 32,050 | डेनिश | डेनिश |
| 3. | जापान | 32,030 | जापानी | जापानी |
| 4. | संयुक्तराज्य अमेरिका | 31,910 | आङ्ग्ल | आङ्ग्ल |
| 5. | स्वीडन | 26,750 | स्वीडिश | स्वीडिश |
| 6. | जर्मनी | 25,620 | जर्मन | जर्मन |
| 11. | फ्रांस | 24,170 | फ्रेन्च | फ्रेन्च |

## निर्धनराष्ट्राः

| स्तरः | राष्ट्रनाम | प्रतिव्यक्ति G.n.p स्तरः | जनभाषा | राजभाषा |
|---|---|---|---|---|
| 1. | कोंगो | 100 | लिङ्गाला,किङ्गवाना | फ्रेन्च |
| 2. | इथोपिया | 100 | अम्हारिक | अम्हारक |
| 3. | बुरुण्डी | 120 | किरुंदी, स्वाहिली | फ्रेन्च |
| 4. | सियरा लियान | 130 | मेडे,तेमने,क्रिओ | आरङ्ग्ल |
| 5. | मालावी | 180 | चिचेवा | आङ्ग्ल |
| 6. | नाईजर | 190 | हौसा, द्जेर्मा | फ्रेन्च |
| 9 | नेपाली | 220 | नेपाली | नेपाली |

 ISSN - 2277-2359

1

उपरि दत्ताङ्कानां विश्लेषणानुसारं निष्कर्षः सुस्पष्टमेव प्रतिभाति यत् ये राष्ट्राः विश्वे प्रगतौ सन्ति तेषु राष्ट्रेषु जनभाषा या, सैव राजभाषा अपि अस्ति। तत्रैव ये राष्ट्राः सकलेऽपि विश्वे निर्धनराष्ट्रत्वेन ज्ञायन्ते तेषु राष्ट्रेषु जनभाषाराजभाषयोर्मध्ये भेदः दृश्यते। सकले विश्वे विकसितराष्ट्रेषु मातृभाषया शिक्षा प्राथमिकस्तराद् उच्चशिक्षापर्यन्त दीयते।परञ्च ब्रिट्रेनफ्रांसराष्ट्रयोः ये औपनिवेशिकराष्ट्रास्सन्ति तेषु मातृभाषास्थाने आङ्गलभाषया फ्रेंचभाषया वा शिक्षा दीयते। अतः एतयोः राष्ट्रयोः विकासः शनैः शनैः जायमानः प्रौद्योगिक्याः युगेऽपि। मातृभाषया शिक्षेति अस्माकं जन्मसिद्धाधिकारः संविधानप्रदत्तश्च।एनां विना वयम् अपूर्णाः। अतः मातृभाषायाः स्थानम् अस्माकं पाठ्यचर्यायां प्राथमिकस्तराद् उच्चशिक्षापर्यन्तं भवेदिति॥

---

[1](G.N.P = gross national product.2011)

# ॥वैयाकरणमते शक्तिविचारः॥

**Dr. Sreehari Varma K.M.,**
Guest Teacher in Vyakarana,
CSU Guruvayoor Campus, Puranattukara.

## उपोद्घातः

शब्दः एकः। पदार्थोऽपरश्च भवति। अतः शब्देन अर्थस्य बोधे जननीये तयोः परस्परं केनचन सम्बन्धेन भवितव्यम्। किञ्च शब्दानाम् आकाशस्य विशेषगुणत्वात्[1], आकाशे तस्य समवायेन वर्तमानत्वात् घटपदे उच्चारिते आकाशस्य उपस्थितिः स्यात्, एकसम्बन्धिज्ञानम् अपरसम्बन्धि-स्मारकमिति न्यायात्। तच्च नेष्टम्। अतः तद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावः अवश्यं कल्पनीयो भवति।तदुक्तं - तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः इति[2]। तस्मिंश्च स्वीकृते सति घटपदे उच्चारिते आकाशस्य बोधो न भवति, वृत्त्या अनुपस्थितत्वात्।शाब्दबोधहेतुकपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वं वृत्तित्वं[3] बोध्यम्। सा च वृत्तिः शक्तिर्लक्षणा व्यञ्जनेत्येवं सामान्यतः त्रिधा भवति। तत्र प्रथमा वृत्तिः शक्तिः इत्युच्यते। अत्र विषये भिन्नाःसम्प्रदायाः वर्तन्ते।आलङ्कारिकाः इमाम् अभिधेति कथयन्ति[4]। शब्दोच्चारणानन्तरं यस्यार्थस्य साक्षात् झटिति बोधो जायते, तत्र वृत्तिरभिधा, साऽग्रिमेति ते वदन्ति॥

---

[1]शब्दगुणकमाकाशम्। अन्नंभट्टः, तर्कसङ्ग्रहः।
रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥ विश्वनाथपञ्चाननः, मुक्तावली।

[2] नागेशभट्टः, परमलघुमञ्जूषा।

[3] नागेशभट्टः, वैयाकरणसिद्धान्तमञ्जूषा।

[4] स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते। मम्मटभट्टः, काव्यप्रकाशः। कारिका 8।

मीमांसकानां मते तु न शक्तिः पदार्थान्तरमेव। सा च पदपदार्थयोः वाच्यवाचकभावनियामिका भवति। वैशिष्ट्याख्यसम्बन्धेन अर्थनिष्ठा, प्रतियोगितासम्बन्धेन पदनिष्ठा च इति तेषामभिप्रायः॥

अस्माच्छब्दादयमर्थो बोद्धव्य इत्येवम् ईश्वरेच्छा शक्तिरिति प्राचीननैयायिकाः। तेषां मतेऽपि आधुनिकशब्देऽपि शक्तिरस्त्येव, 'एकादशेऽहनि पिता नाम कुर्यात्' इतीश्वरेच्छायाः तत्रापि सत्त्वात्। नव्यनैयायिकास्तु इच्छामात्रं शक्तिः, न त्वीश्वरेच्छा। एवञ्च आधुनिकसङ्केतितेऽपि शक्तिरस्त्येव इति कथयन्ति।प्राचीन-वैयाकरणास्तु बोधजनकतारूपां शक्तिमाहुः॥

**'इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥'**[1]

चक्षुरादीनाम् इन्द्रियाणां चाक्षुषेषु विषयेषु यथा अनादिः योग्यता = तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थैः साकं तद्बोधकारणतैव योग्यता, सैव शक्तिरिति तदर्थः। नागेशभट्टास्तु,पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः भवति। सा वाच्यवाचक-भावरूपा इति कथयन्ति[2]॥

तेषां मते शक्तिरत्र विचार्यते। वाच्योऽर्थः। वाचकः शब्दः। अतः वाच्यवाचकभावरूपा शक्तिः भवति। तद्ग्राहकञ्च इतरेतराध्यासमूलकं तादात्म्यम्। इतरेतराध्यासश्च योऽर्थः स शब्दः, यः शब्दः सोऽर्थः इत्येवंरूपो भवति। शब्दार्थयोस्तादात्म्यादेव श्लोकमशृणोत् अथार्थं वदति, रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिन इत्यादिव्यवहाराः सङ्गच्छन्ते। तयोर्मिथः तादात्म्याभावे तु अर्थस्य उच्चारणाशक्यत्वेन अर्थं वदतीति व्यवहारस्यासाङ्गत्यापत्तिः। तथा राम इति द्व्यक्षरेण शब्देन पिनाकिनो मानभङ्गकथनस्यापि असाङ्गत्यापत्तिः। ननु शब्दार्थयोः तादात्म्ये तयोर्मिथः भेदाभावेन वह्निरिति शब्दोच्चारणे मुखे दाहापत्तिः,

---

[1] भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकारिका।कारिका 37।

[2] नागेशभट्टः, परमलघुमञ्जूषा।

तथा मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिश्च स्यादिति चेत् अत्रोच्यते। तादात्म्यं नाम तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् इति भेदाऽभेदसमनियतं भवति। अंशतो भेदः, अंशतः अभेदश्च वर्तत इति तात्पर्यम्। तत्र भेदो वास्तविकः, अभेदश्च आरोपितो भवति। अतः पूर्वोक्तस्थले भेदस्य वास्तविकत्वात् दोषो नास्ति। वस्तुतस्तु बौद्धोऽर्थो वर्तते। पदमपि स्फोटात्मकं बौद्धम् अस्ति। तयोरेव मिथः तादात्म्यं स्वीक्रियते। न तु बाह्यस्य वैखरीरूपस्य शब्दस्य बाह्यार्थेन सह। बौद्धे पदार्थे वह्न्यादौ दाहादिजननशक्तेरभावात् पूर्वोक्तो दोषो नास्ति। बौद्धार्थस्वीकारः आवश्यक एव। अत एव -

**'एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशश्रृङ्गधनुर्धरः॥'**[1]

इत्यादौ वन्ध्यासुतादिपदानां बाह्यार्थराहित्येऽपि तेषां बौद्धार्थमादाय अर्थवत्त्वात् प्रातिपदिकसंज्ञा, अतो विभक्त्युत्पत्तिः, तेन पदत्वं च सिध्यति। बौद्धार्थस्वीकाराभावे तु तेषां बाह्यार्थाभावेन अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञायाः अभावे विभक्तुत्पत्तेरपि अभावेन पदत्वाभावेन प्रयोगोऽपि न स्यात्, 'अपदं न प्रयुञ्जीत' इत्युक्तेः। ननु शशश्रृङ्गमित्यादौ श्रृङ्गादौ शशादिसम्बन्धित्वभ्रम एव इति तेषां व्यवहाराणामनुपपत्तिः बौद्धार्थस्वीकाराभावेऽपि न इति चेन्न। शशरूपजन्तुदर्शनबाधे सति शशश्रृङ्गं नास्ति इति वाक्ये श्रृङ्गे शशीयत्वभ्रमस्य उपपादयितुमशक्यत्वात्। तस्मात् वाच्यवाचकभावरूपा शक्तिः। तद्ग्राहकञ्च तादात्म्यम् इति सिद्धम्॥

ईश्वरेच्छा इच्छा वा शक्तिरिति नैयायिकोक्तं स्वीकर्तुं न शक्यते। इच्छायाः सम्बन्धत्वस्य वक्तुमशक्यत्वात्। सम्बन्धो हि सम्बन्धिभ्यां भिन्नो द्विष्ठः आश्रयतया विशिष्टबुद्धिनियामकश्च। यथा संयोगसम्बन्धेन घटवत् भूतलमिति। अत्र संयोगरूपः सम्बन्धः सम्बन्धिनि घटे भूतले च वर्तते। सम्बन्धिभ्यां घटभूतलाभ्यां भिन्नो भवति। आश्रयतया घटवद् भूतलमिति विशिष्टबुद्धिनियामकश्च भवति। परन्तु इच्छारूपः

[1] नागेशभट्टः, परमलघुमञ्जूषा।

सम्बन्धिनि घटशब्दे पदार्थे वा नास्ति। घटः इच्छावान्, तदर्थो वा इच्छावान् इति व्यवहाराभावात्॥

तस्याश्च वाच्यवाचकरूपायाः शक्तेः कार्यजनने तादात्म्यरूप-सम्बन्धस्यैव कारणता अस्ति। न हि केवलं शक्तिरस्तीति हेतोः घटशब्दे श्रुते तत्पदार्थस्य बोधो जायते। तदुक्तम् -

**'उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।**
**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः॥'**[1]इति।

उपकारः = उपकार्योरुपकारकयोर्बोधशक्त्योः उपकारकस्वभावः सम्बन्धः यत्रास्ति, तत्र धर्मः शक्तिरूपः कार्यं दृष्ट्वा अनुमीयते। असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारकः, गुणानामपि द्रव्याश्रितत्व-नियामक इति अस्यार्थं हेलाराजो[2] व्याचष्टे॥

सा च वाच्यवाचकभावरूपा शक्तिः साधुशब्देष्विव अपभ्रंशेष्वपि अस्त्येव। शक्तिग्राहकोपायेषु श्रेष्ठभूतस्य व्यवहारस्य उभयोरपि वर्तमानत्वात्। व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तेः स्मरणं सञ्जायते। नैयायिकास्तु - असाधुशब्देषु शक्तिः नास्ति इति वदन्ति। असाधुशब्दे श्रुते अर्थबोधस्तु न साक्षात्, किन्तु साधुशब्दस्मरणद्वारैव इति तेषामभिप्रायः॥[3]

परन्तु इदं न समीचीनम्। असाधुशब्दे श्रुते साक्षादेव अर्थबोधसम्भवे साधुशब्दस्मरणद्वारा अर्थबोधकल्पनाया वैयर्थ्यात्। किञ्च ये साधुशब्दं न जानन्ति तेषाम् असाधुशब्दे श्रुते अर्थबोधानापत्तेः। अत एव 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते' इति भाष्यं[4] सङ्गच्छते। अत एव 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः'[5] इति सङ्गच्छते। अपभ्रंशानामपि वाचकत्वादेव आर्यम्लेच्छाधिकरणं सङ्गच्छते। अनेन अधिकरणेन

---

[1] भर्तृहरिः, वाक्यपदीयम्।

[2] वाक्यपदीयस्य व्याख्याता।

[3]विश्वनाथपञ्चाननः, मुक्तावली। शब्दखण्डः।

[4] पतञ्जलिः, व्याकरणमहाभाष्यम्। प्रथमाध्याये प्रथममाह्निकम्।

[5] भर्तृहरिः, वाक्यपदीयम्।

 ISSN - 2277-2359

वेदप्रतिपाद्यार्थनिर्णये आर्याणामेव अधिकारेण वैदिके शब्दे अर्थसन्देहे जाते यं शब्दं यत्रार्थे ते प्रयुञ्जते तेन शब्देन तदर्थ एव गृह्यत इति आर्यम्लेच्छाधिकरणस्याशयः। तथा हि तस्मिन्नधिकरणे आर्याः यवशब्दं दीर्घशूकेऽर्थे प्रयुञ्जते। म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते। वेदे तु आर्यप्रसिद्धेः बलवत्त्वात् दीर्घशूकपरतैव इति सिद्धान्तितम्। तार्किकमते तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन उभयोः समबलत्वाभावेन आर्यम्लेच्छप्रसिद्ध्योः कस्य बलवत्त्वमिति विचारस्यैव असाङ्गत्यं स्पष्टमेव। तस्मात् साधुष्विव अपभ्रंशेष्वपि शक्तिरस्त्येव इति वैयाकरणानां मतम्॥

एषा च शक्तिःरूढिः, योगः, योगरूढिः, यौगिकरूढिः इत्येवं चतुर्धा भवति। शास्त्रकल्पितावयवार्थनिरूपिता शक्तिः योगः। यथा – पाचकः। तत्र पच् धातोः पाकोऽर्थः। अक इत्यस्य कर्ता अर्थः। पाचक इत्यस्य पाककर्ता इत्यर्थः सम्पद्यते च। शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपिता शक्तिः रूढिः। यथा – मणिनूपुरादौ। अत्र भ्वादिगणपठितात् शब्दार्थकात् मण् धातोः औणादिके इन् प्रत्यये मणिशब्दः। तथा नु स्तुतौ। नुवनं नूः। सम्पदादिभ्यश्च इति क्विपि नूः इति भवति। पुर अग्रगमने इत्यस्मात् धातोः इगुपधज्ञाप्रीकिरः कः इति सूत्रेण कप्रत्यये पुर इति। नुवः पुरः नूपुरः इति च भवति। अत्र इमौ शब्दौ केवलं रत्नविशेषं भूषणविशेषं वा बोधयतः। यत्र अवयवार्थभाने सत्यपि यस्मिन् कस्मिन्नर्थे तस्यार्थस्य सङ्कोचो भवति तर्हि तत्र योगरूढिः। यथा – पङ्कजपदे। अत्र पङ्के जातः इति विग्रहे सत्यपि पङ्कजपदं पङ्के जातं सर्वं न बोधयति। किन्तु पङ्के जातं पद्ममेव इति अवयवार्थस्य सङ्कोचः अस्त्येव। यत्र क्वचित् अवयवार्थस्य बोधः क्वचित् रूढ्यर्थस्य च बोधः तत्र यौगिकरूढिः शक्तिः इत्युच्यते। यथा – अश्वगन्धपदे। तत्र अश्वस्य गन्धः यत्रेति अवयवार्थस्य बोधे वाजिशालार्थः, अवयवार्थभानाभावे तु रूढ्या ओषधिविशेषस्य बोधश्च॥

यत्र शब्दे श्रुते अर्थस्य सन्देहो भवति तत्र संयोगादिभिः उपायैः अर्थस्य निर्णयः क्रियते। तदुक्तम् -

**‘संयोगो विप्रयोगश्च साहचर्यं विरोधिता**

 ISSN - 2277-2359

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥'**[1]इति।

तत्र संयोगरूपेण उपायेन अर्थनिर्णयस्य उदाहरणम् - सशङ्खचक्रो हरिः[2] इति। शङ्खचक्राभ्यां सह वर्तते सशङ्खचक्रः इति बहुव्रीहिः। हरिशब्दस्य यमः, वायुः, इन्द्रः, विष्णुः इत्येवं बहवोऽर्थाः वर्तन्ते। अतः हरिशब्दस्य कोऽर्थः इति सन्देहे सति सशङ्खचक्र इति शङ्खचक्रसम्बन्धेन विष्णुः इत्यर्थो निश्चीयते॥

विप्रयोगस्य उदाहरणम् - अशङ्खचक्रो हरिरिति। अविद्यमाने शङ्खचक्रे यस्येति विग्रहः। अत्रापि हरावेव शङ्खचक्रसम्बन्धस्य सम्भवेन विप्रयोगेण हरिः विष्णुरेवेति निश्चीयते॥

साहचर्येण अर्थनिर्णयस्य उदाहरणम् – रामलक्ष्मणाविति। सदृशयोरेव सहचरणस्य दृष्टतया अत्र लक्षणया साहचर्यशब्देन सादृश्यमेव उच्यते। 'रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे राघवे चासिते श्वेते मनोज्ञेऽपि च वाच्यताम्' इति विश्वकोशात् रामशब्दोऽनेकार्थकः। तथा सारसदुर्योधनदाशरथपुत्रादौ प्रसिद्धत्वात् लक्ष्मणशब्दोऽपि अनेकार्थकः। एवञ्च अत्र लक्ष्मणशब्दसाहचर्यात् रामो न भार्गवादिः। रामशब्दसाहचर्याच्च लक्ष्मणो न सारसादिः। परस्परसाहचर्यात् उभयोः दशरथपुत्रे शक्तिः निश्चीयते॥

अथ विरोधेन अर्थनिर्णयस्य उदाहरणम् – रामार्जुनगतिस्तयोरिति। रामः अर्जुनश्च अनेकार्थः शब्दो भवति। तेष्वर्थेषु कार्तवीर्यार्जुन-भार्गवरामयोरेव परस्परं विरोधः इति विरोधेन रामः भार्गवरामः, अर्जुनः कार्तवीर्यार्जुनः इति निश्चीयते॥

स्थाणुं वन्दे भवच्छिदे इत्यत्र भवच्छेदरूपसामर्थ्यात् स्थाणुशब्दस्य शिवः अर्थः इति निश्चीयते। सैन्धवमानय इति प्रकरणेन अर्थनिर्णयस्य उदाहरणम्। तथा हि सैन्धवपदस्य लवणं, तथा अश्वोऽप्यर्थः इति सः नानार्थः। तत्र भोजनरूपप्रकरणे

---

[1] भर्तृहरिः, वाक्यपदीयम्।

[2] नागेशभट्टः, वैयाकरणसिद्धान्तमञ्जूषा। विश्वनाथः, साहित्यदर्पणः।

सैन्धवमानय इत्युक्ते लवणमेवानीयते, न त्वश्वः, तथा मृगयाप्रकरणे अश्वस्यैव आनयनं न तु लवणस्य इति बोध्यम्॥

लिङ्गस्य उदाहरणम् - अक्ताः शर्कराः उपदधाति इति। अक्ताः इत्यस्य अञ्जनविशिष्टाः इत्यर्थः। मृत्तिकामिश्राः क्षुद्रपाषाणप्रायाः शर्कराः। तत्र 'तेजो वै घृतम्' इति घृतस्तुतिरूपात् लिङ्गात् अक्ताः इत्यस्य घृतसाधनकाञ्जनपरत्वं बोध्यते॥

रामो जामजग्न्यः इति शब्दस्यान्यस्य सन्निधेः उदाहरणम्। यद्यपि अनेकार्थो रामशब्दः तथापि जामदग्न्य इति पदसान्निध्यात् रामः परशुराम एव बुध्यते। अभिरूपाय कन्या देया इत्यत्र सामर्थ्यात् अभिरूपतराय इत्यर्थः कल्प्यते॥

औचित्येन अर्थनिर्णयस्य उदाहरणम् -

**'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।**
**यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः॥'**

इति। अत्र औचित्यात् परशुना इत्यत्र छेदनार्थत्वं, मधुसर्पिषा इत्यत्र सेचनार्थत्वं, गन्धमाल्याद्यैः इत्यत्र पूजनार्थत्वं च गृह्यते।भात्यत्र परमेश्वरः इति देशेन अर्थनिर्णयस्य उदाहरणम्। अत्र अत्रेति राजधानीरूपदेशवर्णनेन परमेश्वरपदं राजबोधकमेव, न तु ईश्वरपरमिति निर्णीयते॥

कालेन अर्थनिर्णयस्य उदाहरणम् - चित्रभानुर्भाति इति। चित्रभानुशब्दस्य अग्निः सूर्यश्च इत्येवम् अर्थद्वयं भवति। दिवा चेत् प्रसिद्ध्या सूर्यः, रात्रौ अग्निश्च गृह्यते॥

व्यक्तिः – पुंस्त्वादिः। मित्रो भाति, मित्रं भाति इति तदुदाहरणम्। मित्रशब्दः सूर्यं तथा सुहृदं च बोधयति। तत्र 'मित्रं सुहृदि मित्रोऽर्के' इति कोशात् पुल्लिङ्गे सूर्यस्य बोधः, नपुंसकलिङ्गे सुहृदः बोधश्च॥

स्थूलपृषतीमित्यत्र पृषतीशब्दे ईकारस्य उदात्तत्वे तत्पुरुषः, पूर्वपदप्रकृतिस्वरेण स्थूलशब्दे लकारोत्तरवर्त्यकारस्य उदात्तत्वे बहुव्रीहिरिति निर्णयश्च भवति। अत्र आदिपदेन चेष्टादीनां ग्रहणम्॥

## उपसंहारः

एषा च शक्तिः वैयाकरणानां मते प्रसिद्धा अप्रसिद्धा इत्येवं द्विधा भवति। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वं, सहृदयहृदयवेद्यात्वम् अप्रसिद्धात्वम्। गङ्गाशब्दस्य गङ्गाप्रवाहरूपेऽर्थे प्रसिद्धा शक्तिः, गङ्गातीररूपेऽर्थे अप्रसिद्धा शक्तिः। एवञ्च लक्षणा शक्त्यैव गतार्था। अतः लक्षणारूपवृत्त्यन्तरं न कल्पनीयम्[1]। अतः वैयाकरणानां मते शक्तिः, व्यञ्जना च इत्येवं वृत्तिद्वयमेव भवतीति स्थितम्॥

# ग्रन्थसूची


- अन्नम्भट्टः तर्कसङ्ग्रहः, पदकृत्य-हिन्दीटीकोपेतः, अर्कनाथचौधरी(सं), चौखम्बा संस्कृत संस्थान्, वाराणसी।
- नागेशभट्टः परमलघुमञ्जूषा, ज्योत्स्नाव्याख्योपेता(सं), संस्कृतमहा-विद्यालयः, महाराजसयाजिरावविश्वविद्यालयः, बरोडा।
- पतञ्जलिः व्याकरणमहाभाष्यम्, प्रदीपोद्योततत्त्वालोकसहितम्, चौखम्बा संस्कृत संस्थान्, वाराणसी।
- भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकारिका, भूषणसारव्याख्यासहितप्रभा-दर्पणाभ्यां सनाथीकृता, चौखम्बा संस्कृत संस्थान्, वाराणसी।
- भर्तृहरिः वाक्यपदीयम्, रघुनाथशर्मणा कृतम् अम्बाकर्त्रीव्याख्या-सहितम्, वाराणसीसंस्कृतविश्वविद्यालयः, वाराणसी।
- मम्मटभट्टः काव्यप्रकाशः, प्रदीपोद्योतटीकासहितः, चौखम्बा विद्याभवन्, वाराणसी।
- विश्वनाथकविराजः साहित्यदर्पणः, चन्द्रकला संस्कृतहिन्दीव्याख्योपेतः, कृष्णदास् अकादमी, वाराणसी।
- विश्वनाथपञ्चाननः कारिकावली, सिद्धान्तमुक्तावलीसहिता, विषमस्थलटिप्पणी-संवलिता च, निर्णयसागरमुद्रणालयः, मुम्बई॥


[1] नागेशभट्टः, परमलघुमञ्जूषा।

 ISSN - 2277-2359

# ॥आदिकाव्ये काव्यप्रयोजनसङ्गतिः॥

**Dr. UMA C N**
Guest teacher
Dept. of Sahitya

समस्तप्राणिवर्गस्याऽपि प्रवृतौ एकमेव आत्यन्तिकं कारणं,सुखोपलब्धिः। तदर्थं स्वशक्त्यनुस्सृतकर्मसु तत्तद्प्राणिनः नितरां प्रयतन्ते। तत्र मानवः विशिष्यते,तस्य मननशीलत्वात्। यदा यदा दुःखं बाधते तदा तदा नूतनैः उपायैः सः दुःखम् उपशमयति। मानवेषु विशिष्टाः ऋषयः लौकिकं सुखमपि दुःखकारणमिति विज्ञाय नित्यसुखस्वरूपं मोक्षपदं प्राप्तुं तपश्चर्यादीनामाचरणं कुर्वन्ति।एवञ्च क्षणिका वा आत्यन्तिकी 'आनन्दानुभूतिः' जीवनस्य चरमं लक्ष्यं भवति। तथा च आनन्दशीलस्य मानवस्य हृदिस्थितानां अव्यक्तभावानाम् अभिव्यक्त्यर्थं कलानाम् आविर्भावः जातः। यतो हि स्वानुभूतीनाम् अभिव्यक्तिः एव कलानां परमोद्देश्यम्। भारतीयशास्त्रपद्धत्यनुसारं गीत-वाद्य-नृत्य-नाट्यादयः चतुःषष्टिसंख्यकाः कलाः सन्ति। एषु विशिष्टतमा साहित्यकला। तथा चोच्यते,**"साहित्य-संगीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।"**(नीतिशतकम् -अ.प 3/44P) इति। इयं काव्यकला,नाट्यकला इत्यादिभिः नामभिः अपि प्रथिता॥

आलङ्कारिकः राजशेखरः साहित्यविद्यायाः पञ्चमं विद्यास्थानं प्रकल्पयति। तथा च परमाचार्येण भरतमुनिना नाट्ये सकलविद्यानां सकलकलानाञ्च अन्तर्भावः भवति इत्यभिप्रयति। यथा,

**"न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**न तत्कर्म न वा योगो नाट्येऽस्मिन्यन्न दृश्यते॥"**

इति (नाट्यशास्त्रम् 1/114/19P)। अत एव काव्यकर्तुः कवेः महान् भारः इति आचार्य-भामहः आश्चर्यमनुभवति।(काव्यालङ्कारः-5/4/137P) इत्थं सकलविद्याः सकलकलाश्च काव्यस्य आजीवरूपेण तिष्ठन्ति। इदं काव्यं लोकहिताय सदुपदेशात्मकं भवेदिति पूर्वाचार्याणां विचारः। यतो हि साहित्यशब्दस्य हितेन सह

वर्त्तमानम् इत्यपि व्युत्पत्तिः श्रूयते। यद्यपि हितोपदेशात्मकं सकलं लोकवाङ्मयं साहित्ये अन्तर्भवति तथापि प्राकृतशोधपत्रिकायां तु संस्कृतसाहित्यवाङ्मयमेव विवक्षितम्। पुनश्च संस्कृतालङ्कारिकैः निर्दिष्टेषु काव्यप्रयोजनेषु विशेषविचारः तदनुसन्धाननेन आदिकाव्ये वाल्मीकिमुनिप्रणीते श्रीमद्रामायणे तेषां सङ्गतिश्च निरूप्यते॥

## काव्यप्रयोजनानि।

मेधावी मानवः निष्प्रयोजने कर्मणि नैव प्रवर्तते। अत एव ग्रन्थारम्भे अधिकारी-विषय-सम्बन्ध-प्रयोजनैः अनुबन्धैः प्रेक्षावतां शास्त्रोन्मुखीकरणं कर्तव्यमिति परम्परा परिपाल्यते। तत्राऽपि प्रयोजनस्य प्राधान्याधिक्यं भवति। यावत् प्रयोजनं नोक्तं तावत् तत्केनाऽपि न गृह्यते। यद्यपि प्रस्तुतं काव्यमपि सप्रयोजनं भवति तथापि तत् प्रयोजनं किमित्यत्र आलङ्कारिकाणां नैकमत्यं दृश्यते। तेषु कतिपयानां सिद्धान्ताः अत्र प्रस्तूयन्ते॥

प्रथमगणनीयः आचार्य-भरतः नाट्यशास्त्रे नाट्यस्य प्रयोजननिर्देशप्रसङ्गे नैकानि प्रयोजनानि दर्शयति। सहृदयानां मनोरञ्जनं यद्यपि नाट्यस्य प्रमुखं प्रयोजनं भवति तथापि तत् हितोपदेशजननमपि भवेत्। विभिन्नप्रकृतीनां नराणां तत्तद्स्तरानुस्सृतं धर्मोपदेशप्रदानं नाट्ये कार्यम्। अतः सहृदयानां धर्माऽधर्मविवेचनशक्तिः भवतीति नाट्यस्य एकं प्रयोजनं भवति। पुनश्च रसास्वादावसरे क्लेशेभ्यः मुक्तिं प्राप्य काचिदानन्दानुभूतिः हृदये जायतेति विश्रान्तिजननं नाट्यस्य अन्यतमं प्रयोजनं भवति। काव्यं रचयन् कविः यशः प्राप्नोति इति तदपि काव्यप्रयोजनमेव। एतैः सह आयुषः ,बुद्धेश्च वर्धनमपि मुनिना प्रयोजनरूपेण निर्दिष्टम्। (नाट्यशास्त्रम् – 1/113-115 ,9P)॥

सत्काव्यानुशीलनेन धर्मार्थकाममोक्षाणां चतुर्वर्गाणां प्राप्तिः ,कलासु नैपुण्यं ,कीर्तिः ,आनन्दप्राप्तिश्च जायते इति कथयन् भामहाचार्योऽपि मुनिमेवानुवर्तते (काव्यालङ्कारः – 1/2 ,32P)। काव्यालङ्कारसूत्रकारः वामनः ,सरस्वतीकण्ठाभरणकारः भोजराजश्च सत्स्वपि नैकेषु प्रयोजनेषु कीर्त्ति-प्रीत्योः एव

काव्यप्रयोजनत्वम् अङ्कीकुरुतः। तत्र वामनाचार्यः वदति ,“ काव्यं सद् दृष्टार्थ प्रीतिकीर्त्तिहेतुत्वात् ”(काव्यालङ्कारसूत्राणि – 1/5/9P) इति। भोजराजोऽपि

**“ निर्दोषगुणवत्काव्यमलङ्कारैरलङ्कृतम्।**

**रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिं च विन्दति॥”**

इति कारिकां प्रस्तौति(सरस्वतीकण्ठाभरणम् – 1/2/3P)। आचार्य-रुद्रटस्तु यशसः सविशेषं महत्वं प्रकल्पयन् धनप्राप्त्यमङ्गलनाशानन्दप्राप्तिश्चतुर्वर्गप्राप्त्यादीनि बहूनि प्रयोजनानि काव्यस्य वर्तन्ते इति उल्लिखति (काव्यालङ्कारः – 1/4-13,5-8P)। वाग्भटाचार्योऽपि व्यवहारज्ञान–अनर्थपरिहार–त्रिवर्गफललाभ–कान्तातुल्यतयोपदेशप्राप्ति-आनन्दप्राप्त्यादिप्रयोजनानि नैकानि यद्यपि काव्यस्य सन्ति, तथापि काव्यं कुर्वीति कीर्त्तये इति कथयन् कीर्त्तेः प्राधान्यं प्रकल्पयति। विश्वनाथाचार्योऽपि अल्पधियामपि चतुर्वर्गप्राप्तिः काव्यस्य प्रयोजनम् इति कथयन् प्राच्याभिप्रायमेवानुसरति॥

वक्रोक्तिप्रवर्तकः कुन्तकाचार्यः काव्यप्रयोजनम् अधिकृत्य वक्रोक्तिजीविते विशदं चिन्तनं प्रस्तौति। तन्मते काव्यबन्धः धर्मादिसाधनोपायः,हृदयाह्लादकारकः,व्यवहारपरिस्पन्दः,नूतनौचित्य-प्रदायकः,चमत्कारजनकश्च भवति। काव्यं कटुकौषधवत् अविद्याव्याधि-नाशनम्,अमृतवत् आह्लाद्य अविवेकगदास्पहञ्च भवति (वक्रोक्तिजीवितम्- 3-5 ,7-12P)। ध्वन्यात्मवादी आनन्दवर्धनाचार्यः हृदयाह्लादस्य मुख्यं प्रयोजनत्वं वदति। तदुक्तं ध्वन्यालोके, **“तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्”**इति (ध्वन्यालोकः 1-1-2 P)। नव्यः आलङ्कारिकः जगन्नाथपणडितः रसगंगाधरे कीर्त्तिपरमाह्लादगुरुराज-देवताप्रसादाद्यनेकप्रयोजकं भवति काव्यम् इति अभिप्रयति(रसगंगाधर: 1-4P)॥

आलङ्कारिकेषु अतिविशिष्टः वाग्देवतावतारनाम्ना प्रथितःप्रायः सर्वसम्मतश्च काव्यप्रकाशकारः मम्मटाचार्यः। आचार्यस्तु काव्यप्रकाशे दशभिः उल्लासैः,अलङ्कारशास्त्रान्तर्गतान् विषयान् संगृह्य कारिकावृत्त्युदाहरणक्रमेण सुष्ठु निरूपयति। तत्र प्रथमोल्लासे काव्यस्य प्रयोजनमुक्तम्,

 ISSN - 2277-2359

**"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्य परनिर्वृतये कान्तासम्मिततयोपदेशयुजे"॥**

इति (काव्यप्रकाशः -1/1,3P)। एषु षट्प्रयोजनेषु इतरोक्तानां सर्वेषां प्रयोजनानामन्तर्भावः भवतीति इदं मम्मटवचनं काव्यप्रयोजनचर्चाप्रसङ्गे विशेषेण अभिमतं भवति। तदत्र विचार्यते॥

## 1) काव्यं यशसे -

प्रत्येकं व्यक्तिः यशः अभिलषति। यशोवन्तः शरीरनाशेऽपि यशःशरीरिणः भवन्ति। काव्यसम्बन्धिनी कीर्त्तिः स्थायिनी निरपायिनो चेत्युच्यते। सुभाषितकारः भर्तृहरिः कवीन् एवं स्तौति,

**"जयन्ति ये सुकृतिनो रससिद्धाः कवीश्वराः।**
**नास्ति येषां यशः काये जरामरणजं भयम्"॥**

इति (नीतिशतकम् – आज्ञापद्धतौ 20/60P)। वामनाचार्यः कीर्त्तिः काव्यस्य अदृष्टं प्रयोजनं भवति (काव्यालङ्कारसूत्रम् – 1/5 ,9P) इति वदति। कालिदासोऽपि वाल्मीक्यादिप्रतिपादिते सत्यपि रघुवंशवर्णनायां यशःप्राप्त्यर्थमेव प्रवर्तते इति ग्रन्थारम्भे एव सूचयति। अत एव स्वयं कवियशःप्रार्थो इति विशेषयति (रघुवंशः – 1/3-4,3P)। इत्थं कालिदासादीनामिव यशसे काव्यं कारणं भवतीति मम्मटेन विवक्षितम्॥

## 2) काव्यम् अर्थकृते -

काव्यस्य भौतिकप्रयोजनेषु अत्यन्तं प्रधानं प्रयोजनम् अर्थप्राप्तिः। तत्रैका दृष्टान्तकथा श्रूयते,पुरा धावकः नाम कविः श्रीहर्षाय रत्नावली नामिकां नाटिकां विलिख्य दत्तम्। तदर्थं तेन प्रभूतं धनं प्राप्तम्। अन्यथाऽपि पुरा राज्ञां सदस्सु कवयः आदृताः,धनादिना नित्यं परिपोषिताश्च आसन्। एवञ्च आजीविकार्थमपि कविना काव्यं लिख्यते॥

## 3) काव्यं व्यवहारविदे -

काव्यं सर्वथा लोकवृत्यनुकरणं भवति। कालोचितं व्यक्त्यनुकूलञ्च व्यवहारं काव्यानुसन्धानेन सहृदयस्य जायते। यथा शाकुन्तले कालिदासेन

दुष्यन्तद्वारा औचित्यं दर्शयति,विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम (अभिज्ञानशाकुन्तलम्) इति। इत्थं समुचिताचारपरिज्ञानं काव्यस्य प्रयोजनं भवति।।

## 4) काव्यं शिवेतरक्षतये -

शिवेतरम् अमङ्गलम् इत्यर्थः तस्य नाशः काव्यात् जायते। नैकेषु काव्यप्रभेदेषु प्रसिद्धः काव्यभेदः स्तोत्रकाव्यम्। रोगाद्यनिष्टनिवारणपूर्वकमभीष्टफलप्राप्तिः एव स्तोत्रकाव्यानां प्रमुखं लक्ष्यम्। मयूर-नारायणभट्टादीनां कवीनामनुभवः दृष्टान्तं वर्तते। न केवलं व्यक्तेः अमङ्गलनिवारणं परं समाजस्यापि दोषनिवारणं काव्यात् जायते इति। इदं काव्यस्य अन्यतमं प्रयोजनम्।।

## 5) काव्यं सद्यः परनिर्वृतये -

मम्मटाचार्यस्य अभीष्टसमं प्रयोजनम् इदम्। तदुक्तं वृत्तौ सकलप्रयोजनमौलिभूतम् (काव्यप्रकाशः-1/4P) इति। काव्यास्वादनावसरे वेद्यान्तरसम्पर्करहितः ज्ञानविषयात्मकः,मोक्ष-कालिकब्रह्मास्वादसदृशः आनन्दः अनुभूयते,ततः या निर्वृतिः जायते सा अलौकिकरसानुभूतिः काव्यस्य उत्कृष्टतमं प्रयोजनं भवति। इदमपि वैशिष्ट्यं यत् इयमनुभूतिः काव्यपठनसमनन्तरमेव अनुभूयते न तु ब्रह्मानन्दानुभूतिवत् कठिनैः प्रयासैः।।

## 6) काव्यं कान्तासम्मिततयोपदेशयुजे -

काव्यं लोकोपकाराय भवतीति उपदेशजनकत्वं प्रायः सर्वैः आचार्यैः उक्तमेव। उपदेशस्तु त्रिविधः। तत्रैकः शब्दप्रधानः प्रभुसम्मितोपदेशः। यथा प्रभुः भृत्यम् इष्टानिष्टनिर्देशपूर्वकं शासयति तथा वेदशास्त्रादिग्रन्थाः अध्येतॄन् उपदिशन्ति। तानि प्रभुसम्मितानि। अर्थप्रधानः सुहृत्सम्मितोपदेशः। वस्तुतामात्रकथनपूर्वकं सुहृत् यथा मित्रमुपदिशति तथा पुराणानि अध्येतॄन् उपदिशन्ति। अतः तेषाम् मित्रसम्मितत्वम्। तृतीयः कान्तासम्मतोपदेशः विलक्षणः तात्पर्यार्थप्रधान:। यथा कान्ता पराधीनमपि कान्तं निजचातुर्येण सरसतया स्वाभिमुखीकृत्य प्रवर्तयति तथा काव्यमपि ललितवाक्यप्रयोगैः,शृङ्गारादिरसानामुचित-निवेशनपूर्वकैः सदुपदेशैः नीतिपराङ्मुखान् अल्पमतीन् अपि सत्पथं नयति। यथा रामायणं काव्यम् आस्वाद्य

'रामादिवत् वर्त्तितव्यं न रावणादिवत्' इति सहृदयः अधिगच्छति। इत्थम् अभीष्टफलदं सप्रयोजनञ्च काव्यम्॥

**मम्मटोक्तकाव्यप्रयोजनानां श्रीमद्रामायणे समन्वयः।**

वाल्मीकिमुनिना विरचितं श्रीमद्रामायणं नाम ग्रन्थः न केवलम् आदिमं महाकाव्यं,परवर्त्तिनां कवीनां श्रेष्ठः आधारश्च भवति। ऐतिहासिकदृष्ट्या,काव्यदृष्ट्या,भक्तिदृष्ट्या वा रामायणस्य विशिष्टं किञ्चित् स्थानमस्माकं समाजे वर्तत एव। सम्प्रति काव्यदृष्ट्या मम्मटाचार्यमतं पुरस्कृत्य कवि-सहृदयौ रामायणकाव्यानुसन्धानेन कानि प्रयोजनानि प्राप्नुतः इति विचार्यते॥

विधिवशाद् गुरूणामनुग्रहेण च ऋषित्त्वमाप्तः महान् मुनिः वाल्मीकिरिति कथा सर्वविदिता एव। किन्तु स्रष्टुरनुग्रहेण यत् कवित्वं मुनिना प्राप्तं तदेव प्रशस्तौ निदानम्। नारदमुनिना ऋषिहृदये बीजावापिता कथा समुचितावसरे श्लोकरूपेण परिणता। रामायणस्य बालकाण्डे प्रथमे सर्गे ब्रह्मदेवः कविमाशिषति,

**"यावत् रामस्य च कथा त्वत्कृता प्रचरिष्यति।**
**तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि"॥**

इति (रामायणे बालकाणडम् – 2/36 ,6P)। रामायणस्य प्रशस्तिस्तु यावत् प्रपञ्चस्य अस्तित्वं भवति तावत् तिष्ठतीति ब्रह्मणा एव प्रोक्तम्। एवं चिरञ्जीवी कविर्वाल्मीकिः। भर्तृहरेः प्रमाणिकं वाक्यमिदं,

**"जयन्ति ये सुकृतिनो रससिद्धाः कवीश्वराः।**
**नास्ति येषां यशः काये जरामरणजं भयम्"॥**

इति (नीतिशतकम् – आज्ञा.प. 20/60P)। रामायणम् उपजीव्य यैः कविभिः काव्यानि विरचितानि तैर्निरन्तरमनुस्मर्यते परमकविः वाल्मीकिः इति अनन्यसाधारणाकीर्त्तिः रामीयणरचयितुः। अत एव उच्यते मम्मटः काव्यं यशस्करं भवति इति॥

भारतीयसंस्कृत्यनुसारं मानवस्य जीवनं चतुर्वर्गाधिष्ठितं भवति। तत्र अर्थकाममोक्षाणाम् आधारः धर्मः। धर्म्यं कर्म कृत्वैव अर्थं प्राप्नुयात् इति क्रमः सर्वैः परिपालनीयः। कर्त्ता एव रामायणं धर्म्याख्यानं भवतीति प्रतिज्ञातञ्च (रामा.बाल. –

4/11/8P)। विरक्तस्य ऋषेः अर्थे कामना नैव भवितुमर्हति इति रामायणात् आर्थिकं प्रयोजनं कर्तुः वक्तुं दुष्करमेव। अर्थप्राप्तिः न केवलं कवेः कविमुपजीव्य ये वर्तन्ते तेषामपि भवति। तत्र रामायणस्य पारायणं कर्तुं मुनिनाऽऽदिष्टौ कुशीलवौ प्रप्रथमम् आश्रमान्तेवासिनां ऋषीणाञ्च समक्षं रामायणं काव्यं श्रावयतः। तदानीं मधुरं काव्यं श्रुत्वा सन्तुष्टाः ते बालकाभ्यां पुरस्काराणि ददाति। यथोक्तम्,

**"प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ।**
**प्रसन्नो वल्कलं कश्चिद् ददौ ताभ्यां महायशाः"॥**

इति (रामा.बाल. – 4/19/9P)। काव्यात् कामसिद्धिः इति प्रयोजनमपि मम्मटोक्तार्थप्राप्तौ निवेशयितुं शक्यते। यः रामायणं पठति सः स्वेच्छानुस्सृतं फलं प्राप्यत एव। तदुक्तं,

**"पठन् द्विजो वागृषभत्वमीयात्स्यात् क्षत्रियो भूमिपतित्वमीयात्।**
**वणिग्जनः पण्यफलत्वमायाज्जनश्च शूद्रोऽपि महत्वमीयात्"॥**

इति (रामा.बाल. – 1/79/4P)। काव्यपठनेन सहृदयः व्यवहारयोग्यान् आचारान् विजानाति। रामायणे तु राज्ञां क्षत्रियधर्मपरिपालनं,गृहस्थानां गृहधर्मपरिपालनं,सुहृदां सुहृद्धर्मपरिपालनं,सोदराणाम्,अनुचराणां,भक्तानाञ्च तत्तदनुकूलव्यवहाराः,भार्या-भर्त्तोः समुचितव्यवहारः,गुरु-मुनि-देवतादिषु करणीयः व्यवहारः पुनश्च शत्रुभिः सह पालनीयः उचितव्यवहारश्च आन्तं सुष्टु दर्शितं वाल्मीकिमहर्षिणा। तत्र आतिथ्यमर्यादां दर्शयति –

**"अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता"**।(सुन्द. - 1/105/409P)अन्यत्र रावणं प्रतिषिध्य रामान्तिकम् आगतं विभीषणं जाम्बवादयः संशयदृष्ट्या पश्यन्ति। तत्र हनूमान् अभिप्रयति,रावणस्य दौरात्म्यं,रामस्य विक्रमं च दृष्ट्वा विभीषणेन मित्रतार्थमागतः इत्येव चिन्तनीयम् इति। तादृशान् संशयदृष्ट्या आलोचना युक्ता नास्ति इति। कुतः एवं निर्णयः इत्यपि सूचयति,

**"आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम्।**
**बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्"॥**

इति (सुन्द. -11/55/522P)। विभीषणोऽपि सचिववचनमङ्गीकरोति। तत्र अनुमानात् भावाच्च परीक्ष्य सखित्वं करणीयं,मित्रभावेन संप्राप्तं जनं न कदाऽपि त्यक्तव्यम् इति उचितं व्यवहारं सहृदयः अधिगच्छति॥

काव्यवाङ्मये द्विधा स्तोत्रकाव्यानि दृश्यन्ते। स्वतन्त्ररूपेण,काव्यांशरूपेण च। रामायणे तत्र तत्र बहूनि स्तोत्राणि कविना विरचितानि सन्ति। यथा आदित्यहृदयस्तोत्रं,ब्रह्मादीनां शमस्तुतिः इत्यादीनि। एतेषां पारायणेन शिवेतरक्षतिः जायते। पुनश्च नारदेन वाल्मीकिः प्रोक्तश्च इदं रामचरितं सर्वपापहरं भवतीति। तद्यथा,

**"इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम्।**
**यः पठेत् रामचरितं सर्वपापैः प्रमुच्यते॥**
**एतदाख्यानमायुष्यं पठन् रामायणं नरः।**
**सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते"॥**

(बाल. – 1/77-78/4P)। तत्र दृष्टान्तं,साम्प्रतमपि मन्दिरेषु,गृहेषु,पुण्यकर्मसु च रामायणस्य पारायणमत्यन्तं भक्त्या क्रियते इति। पुनश्च भक्तिप्रस्थाने श्रीमद्रामायणस्य अद्वितीयं स्थानं वर्तते॥

साहित्यवाङ्मयस्य शास्त्रादि -इतरवाङ्मयेभ्यः व्यतिरिक्तं,विशिष्टञ्च प्रयोजनम् आह्लादकारित्वम्। रसज्ञः कविः स्वरचनया निरन्तरकाव्यानुसन्धानेन च परिपक्वं भावसम्पन्नं सहृदयं रसयति। अनुभवः एव तत्र प्रमाणम्। वस्तुतः रामायणस्य रचनायाः कारणमेव वाल्मीकिना अनुभूतः आस्वादविशेषः एव। नारदेन प्रोक्तं रामकथां श्रुत्वा द्रवीकृतचित्तः मुनिः क्रौञ्चद्वन्द्वयोः वियोगं दृष्ट्वा शोकमनुभवति। स शोकः एव श्लोकत्वेन परिणतः। विधातुः आदेशानुसारं छन्दोबद्धैः वाक्यैः सम्पूर्णं रामकथां रचयन् मुनिः कुशीलवौ श्रावितौ। आश्रमान्तेवासिनां समक्षं कुशीलवाभ्यां गीतं रामायणं श्रुत्वा तेषां तत्त्वज्ञानां ऋषीणामपि कीदृशी आस्वाद्यता सञ्जाता इति विवृतं यथा,

**"अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः।**
**चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम्"॥**

इति(बाल. – 4/16/9P)॥

तथा च रामायणं काव्यं पठित्वा,अधार्मिकप्रवृत्तेः फलं विनाशः एव इति ज्ञानं सहृदयस्य जायते। व्यवहारनियमः सर्वेषां समानः न भवति। प्रकृत्यनुसारं,कालानुसारं चव्यवहारौचित्यं परिष्क्रियते। तथापि केचन धार्मिकाः उपदेशाः सर्वेभ्यः सर्वथा आचरणयोग्याः भवन्ति। तादृशानेकोपदेशान् रामायणात् सहृदयाः प्राप्नुवन्ति। यथा रावणवधानन्तरं हनूमान् सीतां नेतुम् अशोकवनिकां प्रविशति। तत्रत्याः राक्षसस्त्रियः पूर्वं सीतां शकारं कृतवन्तः इति स्मृत्वा क्रुद्धः मारुतिः ताः वध्याः इति चिन्तयति। तदा सीता तं वदति,अपकर्तुः अपि प्रत्यपकारः न कर्तव्यः इति सद्भिः आचरितः नियमः रक्षितव्यः इति (युद्ध. – 101/35/659P)। पुनः लङ्कां प्रविष्टः हनूमान् यदा रावणेन वधार्थं बन्धनस्थः जातः तदा रावणानुजः विभीषणः प्रकृत्या राक्षसः सन्नपि रावणम् उपदिशति। यथा,यद्यपि अयं वानरः शत्रुः,अप्रियकर्ता च भवति तथापि दूतः भवतीति नैव वध्यः। दूतस्य वधः सर्वप्रकारेणापि निषिद्धः एव इति। रावणोऽपि तदुपदेशं स्वीकरोति। इत्थं विभिन्नैः प्रयोजनैः काव्यं कविसहृदययोः अभ्युदयकरमेव भवतीत्यत्र नास्ति संशयलेशोऽपि॥

**ग्रन्थसूची -**

1. श्रीवाल्मीकिरामायणम्।
(सम्पा.)कालूरी-हनुमन्तरावः
Published with the financial assistance from the Rashtriya Sanskrit Sansthan (DU) New Delhi 2011.

2. अलङ्कारशास्त्रस्येतिहासः।
डा.जगदीशचन्द्रमिश्रः
चौखम्बा सुरभारतीप्रकाशन,वाराणसी -221001,2007.

3. काव्यमीमांसा।
चौखम्बा विद्याभवन,चौक,वाराणसी -221001,2013.

4. काव्यप्रकाशः।
मोतीलाल बनारसी दास,बैडलो रोड,जवाहर नगर,दिल्ली –6, 1980.

5. काव्यालङ्कारसूत्राणि।
चौखम्बा सुरभारती प्रकाशन्,वाराणसी,2016.
6. वक्रोक्तिजीवितम्।(प्रथमोन्मेषः),
चौखम्बा सुरभारती प्रकाशन्,वाराणसी,2013.
7. सरस्वती कण्ठाभरणम्।(काव्यशास्त्रम्),
चौखम्बा ओरियन्टालिया,वाराणसी,1976.
8. नाट्यदर्पणम्।
परिमल पब्लिकेशन्,27/28,शक्तिनगर,दिल्ली -110007,द्वि.सं–1994.
9. एकावली।
इन्दुप्रकाशन,8/6 रूपनगर,दिल्ली,संवत् –2046(विक्रमी)।
10. नाट्यशास्त्रम्।(प्रथमःभागः)
Indira Gandhi National Centre to the arts,Central vista mess,Janpathnagar,Delhi -110001,2015.
11. नीतिशतकम्।
अक्षयवट प्रकाशन,26,बलरामपुर हाऊस,इलाहाबाद -211002,2008.
12. ध्वन्यालोकः।
चौखम्बा सुरभारती प्रकाशन,वाराणसी,पुनर्मुद्रित -2015.
13. रसगङ्गाधरः।
चौखम्बा विद्याभवन,वाराणसी,पुनर्मुद्रित -2006.
14. अभिज्ञानशाकुन्तलम्।
चौखम्बा सुरभारती प्रकाशन,वाराणसी,2014.
15. काव्यशास्त्रसम्प्रदायविमर्शः।
डा.रामेन्द्र कुमार सुधांशु,मनीषा प्रकाशन,प्लॉट नं.26,रोहितनगर कालोनि,बि एच यु,वाराणसी-5,2013.
16. भामहप्रणीत काव्यालङ्कार।

हंसा प्रकाशन,57नाटाणी भवन,मिश्रराजाजी का रास्ता,चांदपोलबाजार,जयपुर-302001,2018.

17. रुद्रटप्रणीत काव्यालङ्कार।

परिमल पब्लिकेशन,27/28 शक्तिनगर,दिल्ली-110007,द्वि.सं-1990.

18. वाग्भटालङ्कार।

संकल्प प्रकाशन,467,बडायो का चौक,चांदपोल बाजार,जयपुर-302001,2015.

19. वाल्मीकिरचनामृत (द्वितीय भाग)।

डा.हरिश्चन्द्रमणित्रिपाठी,प्रकाशनाधिकारी,सम्पूर्णानन्द संस्कृत विश्वविद्यालय,वाराणसी-221002,1990.

# ॥तैत्तिरीय-छान्दोग्यसृष्टिवाक्यानांतुलनात्मकमध्ययनम्॥

**Veena Chandran**
Guest teacher
Dept. of Advaita Vedanta
CSUGC, Puranattukara.

आधिभौतिकादिभ्यः तापत्रयेभ्यः मानवाः भूयो भूयः पीडिताः सन्ति। तेभ्यः शान्त्यर्थं विविधोपायेषु प्रवर्तन्ते। लौकिकैः उपायैः पुरुषार्थमप्राप्य ते पुनः पुनः संसरन्ति। सन्ततं जननमरणप्रवाहरूपे प्रपञ्चे संसरतः जीवस्य पुरुषार्थप्राप्तये दर्शनानि प्रवृत्तानि। दृश्यतेऽनेनेति व्युत्पत्त्या दर्शनपदं दृशिर्- प्रेक्षणे इति धातोः ल्युटि निष्पन्नम्। दृश्यते अवबुद्ध्यते परमं वस्तुतत्त्वम् अनेन इति दर्शनम्। दर्शनालोकनेक्षणम् इत्यमरः। एवञ्च आलोक-ईक्षणशब्दयोः पर्यायत्वेन दर्शनशब्दः कोशे निर्दिष्टः॥

दर्शनपदम् आङ्ग्लभाषायां फिलोसफी इत्युच्यते। परमं वस्तुतत्त्वम् एकं चेदपि दृष्टिकोणस्य वैविध्यात् दर्शनेषु भेदः सञ्जातः। इत्थं दार्शनिकैः ज्ञानानुरागात् बहवो विषयाः अस्मभ्यं दर्शिताः।आत्मविज्ञानं, सत्ताशास्त्रं, सृष्टिविचारः इत्याद्याः तत्र अन्तर्भवन्ति। विश्वस्मिन् विद्यमानेषु सर्वेष्वपि दर्शनेषु जीवस्य उत्पत्तिविषये चर्चा अथवा चिन्तनं वर्तते एव। चिन्तनमेव मानवान् अग्रे नयति इत्यत्र नास्ति संशयः॥

- **उपनिषत्सु सृष्टिवाक्यानि** –

दार्शनिकेषु भारतीयदार्शनिकाः औन्नत्यं यान्ति। तत्रापि अद्वैतिनः। अद्वैतिनां मतानुसारं पदार्थः द्विविधः दृक् दृश्यञ्चेति। तत्र दृक्पदार्थः परमात्मा एक एव। दृश्यपदार्थस्तु दृश्यमानोऽयं प्रपञ्चः। दृक् पदार्थः परमात्मा तु सत्यं वस्तु। दृश्यमानमिदं जगत् अनित्यं मिथ्या। तर्हि मिथ्याभूतस्य जगतः सृष्टिक्रमनिरूपणं व्यर्थं खलु इति चेत् - अद्वैतिभिः सत्तात्रैविध्यम् अङ्गीक्रियते। तत्र पारमार्थकी सत्ता ब्रह्मणः एव। अविद्याकार्यस्य प्रपञ्चस्य व्यावहारिकी सत्ता। प्रपञ्चस्य

 ISSN - 2277-2359

पारमार्थिकसत्ताभावेऽपि व्यावहारिकसत्ता अङ्गीक्रियत इत्यतः प्रपञ्चसृष्टिनिरूपणं न व्यर्थम्।इतश्च –

अद्वितीयब्रह्मणः सत्यत्वं, दृश्यमानस्य नामरूपात्मकस्य अस्य जगतः मिथ्यात्वं जीवब्रह्मणोः अभेदश्च अद्वैतिभिः उद्गीयते। तदुक्तं –

**ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः** इति। अस्य प्रतिपादनाय अध्यारोपापवादन्यायः आश्रियते वेदान्तिभिः। अर्थात् वस्तुनि ब्रह्मणि अवस्तुनः जगतः आरोपं कृत्वा पुनः तन्निराक्रियते। आरोपितस्य जगतः मिथ्यात्वज्ञानेनैव अधिष्ठानभूतस्य वस्तुनः सत्यत्वं ज्ञायते। तस्मात् जगतः मिथ्यात्वनिरूपणाय, ब्रह्मणः जगत्कारणत्वनिरूपणाय च जगतः सृष्टिः प्रतिपादनीया एव। तस्मात् अपि प्रपञ्चसृष्टिनिरूपणं न व्यर्थम्॥

वेदान्तेषु सृष्टिवाक्यानि अथवा उत्पत्तिश्रुतयः भिन्नभिन्नतया द्रष्टुं शक्यते। कुत्रचित् आकाशस्य उत्पत्तिः श्रूयते कुत्रचित् न , कुत्रचित् वायोरुत्पत्तिः श्रूयते क्वचित् न। पुनः सृष्टिक्रमवर्णनावसरेऽपि भेदाः दृश्यन्ते। तत्र प्रसिद्धाः उत्पत्तिश्रुतयः तैत्तिरीयोपनिषदि छान्दोग्योपनिषदि च वर्तन्ते। तयोः साम्यवैषम्यं सामान्यतया अत्र विचार्यते॥

**▪तत्र हि तैत्तिरीयश्रुतिः –**

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशात् वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरुषः।**[1] इति॥

तैत्तिरीयोपनिषदः द्वितीयवल्ल्यां प्रथमे अनुवाके वर्तते श्रुतिरियम्। तत्र तावत् ब्रह्मविदाप्नोति परम् इति मूलवाक्येन प्रकरणम् आरभ्यते। तत्र सूत्ररूपेणोक्तस्य ब्रह्मणः परामर्शः **तस्मात्** इत्यनेन कृतः। तदनन्तरं **एतस्मात्** इति मन्त्रवाक्येनापि पूर्वं **सत्यं ज्ञानम् अनन्तं ब्रह्म**[2] इत्यत्र निर्दिष्टस्य ब्रह्मणः एव उल्लेखः कृतः। तत्र हि भाष्यं –

[1]तैत्तरीयोपनिषत् – 2-1-2.

[2]तैत्तरीयोपनिषत् – 2-1-1.

 ISSN - 2277-2359

**यद्ब्रह्मादौ ब्राह्मणवाक्येन सूत्रितं यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव लक्षितं तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यत्वात्।**[1]इति॥

तस्मात् वा एतस्मात् ब्रह्मणः अथवा आत्मनः आकाशस्य उत्पत्तिः सञ्जाता। आकाशे शब्दगुणत्वं वर्तते, स तु मूर्तद्रव्याणाम् अवकाशकरश्च भवति। तस्मात् आकाशात् स्पर्शगुणेन पूर्वेण च कारणगुणेन शब्देन द्विगुणः वायुः उत्पन्नः। वायोः सकाशात् स्वेन रूपगुणेन पूर्वाभ्यां च त्रिगुणः अग्निः सम्भूतः। अग्नेः सकाशात् स्वेन रसगुणेन पूर्वैः त्रिभिः च चतुर्गुणं जलं सम्भूतम्। तस्मात् जलात् स्वेन गन्धगुणेन पूर्वैः चतुर्भिः च पञ्चगुणा पृथिवी उत्पन्ना। पृथिव्याः सकाशात् ओषधीनाम् उत्पत्तिः। ओषधीभ्यः अन्नम्। अन्नात् वीर्यरूपेण परिणतात्शिरःपाण्याद्याकृतिमान् पुरुषः सम्भूतः। एवं तैत्तिरीयोपनिषदि सृष्टिप्रक्रिया वर्णिता वर्तते॥

- **छान्दोग्योपनिषदि उत्पत्तिश्रुतिः –**

.......**तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत। तत्तेज ऐक्षत बहुस्यां प्रजायेयेति तदपोऽसृजत।................ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त ..... इति।**[2]

छान्दोग्योपनिषदः षष्ठे अध्याये उत्पत्तिश्रुतयः वर्तन्ते। तत् सत् दर्शनं कृतवत्। बहुस्यां प्रजायेय इति। यथा घटाद्याकारेण मृत् तथा। एवम् ईक्षित्वा तत् तेजसः सृष्टिमकरोत्। तत्तेजः पूर्ववत् बहुस्यां प्रजायेय इति ऐक्षत। तदपोऽसृजत॥

पुनः ताः आपः अपि पूर्ववत् ऐक्षन्त। बह्व्यः स्याम प्रजायेमहि इति। एवं ऐक्षद्भ्याम् अद्भ्यां पृथिवी समुद्भूता। अत्र सदेव तेजोऽबाद्याकारेण स्थित्वा ईक्षणं कृतवत्। पुनः तत्रैव पक्ष्यादिप्राणिनाम् अण्डज, जीवज, उद्भिज्जादीनां प्रतिपादनमपि द्रष्टुं शक्यते। इत्थं छान्दोग्योपनिषदि सृष्टिः प्रोक्ता॥

---

[1]तैत्तरीयोपनिषत् शाङ्करभाष्यम् – 2-1-2.

[2]छान्दोग्योपनिषद् 6 – 2 – 3&4

▪**साम्यवैषम्ये** – तैत्तिरीयोपनिषदि तावत् आत्मनः सकाशात् आकाशादिक्रमेण सृष्टिः श्रूयते। छान्दोग्योपनिषदि तु तेजादिक्रमेण सृष्टिवाक्यं दृश्यते। छान्दोग्ये तावत् आकाशस्य तथा वायोः च परामर्शः एव द्रष्टुं न शक्यते। इति अनयोः वैषम्यम्।एवं सृष्टिक्रमे विगानं श्रूयते चेदपि स्रष्टरि एकत्वमेव वर्तते इति अनयोः साम्यम्। स्रष्टा तु सर्वासुउपनिषत्सु अनुस्यूततया परमेश्वरः एव प्रतीयते। नास्मिन् विषये श्रुतिर्विगानमस्ति॥

## ▪ उपसंहारः -

अत्र श्रुत्योः विरोधः भवतीत्यपि न शङ्कनीयम्। आकाशवायु-सर्गानन्तरं तत्तेजोऽसृजत इति कल्पनोपपत्तेः। अयमेव विषयः ब्रह्मसूत्रशाङ्करभाष्ये वियदधिकरणे विस्तृतया प्रतिपादितो विद्यते। तत्र कार्यविषयविगानमपि निराकरोति सूत्रकारः **न वियदश्रुतेः**[1]इत्यादिभ्यः।इत्थं च सृज्यमानकार्यविषये विगानं तु दृश्यते चेदपि सर्वेऽपि वेदान्ताः सृष्टेः पूर्वं जगत्कारणीभूतः ईश्वरः सङ्कल्पं कृत्वा जगत् ससर्ज इत्यस्मिन् विषये, कारणस्वरूपनिरूपणे च ऐक्यकण्ठ्यं दर्शयन्ति। तस्मात् सृष्टिवाक्यानां तुलनया इदमवगन्तव्यम् उपनिषदां तु सृष्टिक्रमे तात्पर्यं नास्ति अपि तु कारणीभूते स्रष्टरि तात्पर्यम् इति॥

## सन्दर्भग्रन्थसूची


- छान्दोग्योपनिषद् शाङ्करभाष्यसहिता,गीताप्रेस्,गोरखपुर्।
- तैत्तिरीयोपनिषद् शाङ्करभाष्यसहिता,गीताप्रेस्,गोरखपुर्।
- ब्रह्मसूत्रभाष्यम्,श्रीमच्छङ्करभगवद्पादाचार्यैः विरचितम्,श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्,दक्षिणाम्नाय श्रीशारदापीठम्,शृङ्गेरी॥


[1]ब्रह्मसूत्रशाङ्करभाष्यम् – 2-3-1-1.

# ॥ कृष्णलीलाशुकस्य स्तोत्रकाव्येषु दुर्गास्तुतिः॥

**अश्विनी गंगाधर देशपांडे**
शोधच्छात्रासाहित्यविभागः ,
केंपरिसरः-गुरुवायूर् .वि.वि.सं.।

## ❖ भूमिका

केरलभूमिः विदुषां कविनाञ्च नररत्नानां जननी। संस्कृतसाहित्येऽपि केरलीयजनानां योगदानम् अतुलनीयमेव विद्यते। वेदभाष्ये, शास्त्रार्थे, भक्तिसाहित्यरचनायां वा यत्कश्चिदपि विषयः स्यात् तत्र केरलीयप्रभावः स्पष्टतया अवगन्तुं शक्यते। अस्याः पुण्यभूमेः पृथिव्याः स्वर्गम् इति ख्यातिः सत्या एव। अत्र जनीं प्राप्तेषु एकः विद्वान् कृष्णलीलाशुकः कृष्णकर्णामृतं विरचय्य भक्तकविरिति लब्धख्यातः बभूव। तस्य प्रसिद्धस्तोत्रकाव्येषु अन्यतमा दुर्गास्तुतिः। यद्यपि स्तोत्रकाव्यमिति स्वतन्त्रः प्रभेदः आलङ्कारिकैः न स्वीकृतः तथापि सौकर्यार्थं देवतास्तुतिरूपभक्त्यात्मककाव्यार्थं स्तोत्रकाव्यमिति प्रयोगः लोकव्यवहारे दृश्यते। लोकव्यवहारस्यापि प्रामाण्यम् अङ्गीक्रियते विद्वद्भिः। "तदुक्तं 'रसगङ्गाधरे काव्यम् उच्चैः पठ्यते', 'काव्यादर्थोऽवगम्यते', 'काव्यं श्रुतम्, अर्थो न ज्ञातः' इत्यादि विश्वजनीनव्यवहारत" [1] इति। देवतास्तुतिरूपपद्यानि प्रथमतया वेदेषु अवलोक्यन्ते। वेदोक्तदेवतास्तुतिपरकमन्त्राणां ऋगिति संज्ञा। ऋक्संहिता एव ऋग्वेदः। "ऋच्यन्ते स्तूयन्ते यया सा ऋक्" [2], इत्यपि श्रूयते।काव्यप्रकाशे मम्मटोक्तकाव्यप्रयोजनेषु चतुर्थं "शिवेतरक्षतये", अत्र मयूरादीव अनर्थनिवारण इत्युक्तम्। कवेर्मयूरस्य सूर्यशतकं स्तोत्रकाव्यं परामृष्टम्। [3] अर्थात् इष्टप्राप्तिरनिष्टपरिहाररूपम् इदं प्रयोजनं स्तोत्रकाव्यैरपि सफलीभवति। अत्र

---

[1]रसगङ्गाधरः, प्रथमाननम्, पृष्ठसंख्या १५।

[2]सामान्योक्तिः।

[3]काव्यप्रकाशः, १ उल्लासः, २ कारिका वृत्तिश्च।

उदाहरणार्थं चण्डिशतकं, सूर्यशतकं, नारायणीयमिति नैकानि काव्यानि प्राप्यन्ते किन्तु इदानीं दुर्गास्तुति इत्यस्मिन् स्तोत्रकाव्ये यद् तथ्यं मया अनुभूतं तस्मिन् विषये किञ्चित् विलिख्यते॥

## ❖ दुर्गास्तुतेः परिचयः

गुरुपवनपुरसमीपे 'अरियन्नूर् कावु' इत्येकं स्थानं वर्तते। तत्र प्रतिष्ठितायाः दुर्गादेव्याः स्तुत्यात्मकम् इदं काव्यम्। अत्रस्थाः जनाः तां देवीं 'हरिकुमारी''हरिकन्या' वा इति नाम्ना सम्बोधयन्ति। अत एव स्थानस्यापि हरिकन्यामन्दिरमिति अपरम् अभिधानम्। के.पी.ए. मेननमहोदयेन स्वस्य '9 Gems of Sanskrit literature'इति पुस्तके प्रकृतकाव्यम् आङ्ग्लभाषानुवादेन सह प्रकाशितम्। तत्र परिचये सः वदति – "Most interestingly manuscripts of some of these were recovered, not from Kerala, but the northern part of India. It proves that not only the Karnamritam but many of the compositions of the great saint-poet had got wide circulation within the country. It is indeed unfortunate that many of these hymns have practically gone out of circulation. The manuscript of Durgastuti that was recovered was not in a perfect condition the sense that few words are missing in two verses".[1]

एतस्य आशयमिदंकृष्णलीलाशुकस्य साहित्यरचनानां बह्व्यः हस्तप्रतयः प्रायेण उत्तरभारते प्राप्ताः संरक्षिताश्च। सिद्धमिदं न केवलं कृष्णकर्णामृतस्यअपि तु अस्य कवेः अन्यासां कृतिनामपि प्रसिद्धिः निखिलेऽपि भारते आसीत्। किन्तु दुर्दैवमेतत् यतो हि या हस्तलिखितप्रतिः दुर्गास्तुतेः प्राप्ता सा दुरवस्थायामासीत् अत एव अत्रस्थं पद्यद्वयम् अपूर्णम्॥

## ❖ दुर्गास्तुतेः वैशिष्ट्यम्

[1] 9 Gems of Sanskrit Literature vol.-3, Introduction, Pg. No. 61.

 ISSN - 2277-2359

इदं षोडशपद्यात्मकं लघुकायं स्तोत्रकाव्यं वर्तते। तानि सर्वाण्यपि षोडशपद्यानि मालिनीछन्दसि रचितानि। एकस्मिन्नेव स्थाने त्रयोदशे पद्ये प्रथमे पादे छन्दोभङ्गः दृश्यते, तदपि प्रायेण हस्तप्रतेः दुरवस्थायाः प्रभावः स्यात् इति मन्ये। पद्येषु कविना दुर्गादेव्याः स्वरूपवर्णनं , तस्याः शौर्यस्तुतिः एवञ्च "मम दुर्गतिं दूरीकृत्य भवतापात् मां पातु" इति प्रार्थना च इत्येते विषयाः प्रतिपादितास्सन्ति। एवं भगवद्विषयिणी रतिरेवात्र प्रधानतया विलोक्यते।तदुक्तं मम्मटाचार्येण काव्यप्रकाशे "रतिर्देवादिविषया व्यभिचारी तथाऽञ्जित भावः प्रोक्तः"[1] इति। यथा आदिमे पद्ये कविना एवं लिखितं वर्तते –

**"मणिकनकविभूषामिश्रितैरुत्पलौधै -**
**रुपचितपरभागामुज्ज्वलां मूर्तिलक्ष्मीम्।**
**वहसि जलधरश्रीसोदरे देवि दुर्गे**
**जय जय हरिकन्याग्रामचुडाग्रभूषे"॥**[2]

एवं हरिकन्याग्रामस्य देवता दुर्गादेवी **'जलधरश्रीसोदरा'** इति पदेन अर्थात् साक्षात् भगवतः विष्णोः सहोदरीति गौरविता भवति। सा देवी रत्नसुवर्णपुष्पैः सुशोभिता, आभावृद्धिं करोति। अग्रिमे एव पद्ये देव्याः गुणानां परस्परविरोधेन वर्णनं दृश्यते यथा –

**"अरुणचरणपद्मे हारिदीव्यद्दुकूले**
**स्तनकलशविनम्रे धन्यनानायुधाढ्ये।**
**विकसितमुखचन्द्रे वीरलीलारसज्ञे**
**जय जय जय दुर्गे जैत्रचित्रापदाने"॥**[3]

अत्र द्वितीये पादे एकेन पदेन स्त्रीसुलभसौन्दर्यम् अपरेण आयुधादिग्रहणं वर्णितं तथैव तृतीये पादेऽपि द्रष्टुं शक्यते। एवं परस्परव्यतिरेकयुक्तानां गुणानां वर्णनेन अत्र विरोधः एवञ्च मुखचन्द्रे इत्यत्र मुखे चन्द्रत्वस्यारोपात् रूपकमपि प्रतीयते।

---

[1]काव्यप्रकाशः, ४ उल्लासः, ३५ कारिका,।

[2]दुर्गास्तुतिः, १ पद्यम्।

[3]दुर्गास्तुतिः, २ पद्यम्।

मेननमहोदयः अस्मिन् प्रसङ्गे वदति –“The blooming face of the goddess resembles the full moon but there is a stamp of heroic deeds also on it”.[1]इत्यस्याशयः - दुर्गायाः प्रफुल्लितं मुखं पूर्णचन्द्रेन सह सादृश्यं भजदपि तस्मिन् मुखचन्द्रे तस्याः वीरलीलानां कलङ्कोऽपि विराजते, तत्सत्यमेवानुभूयते। हस्तप्रतेः दुरवस्थाकारणेन इतः परं पद्यस्य केचिदंशाः विलुप्ताः तथापि केषुचित् स्थानेषु शब्दार्थालङ्कारौ अपि दृश्येते। यथा पञ्चमे पद्ये यमकस्योपस्थितिः एवम् –

**“त्वमसि सदसि सङ्घैः स्वर्गिणां कीर्त्यमाना**
**त्वमसि तपसि सिद्धैः सिद्धवर्गैर्विमृग्या।**
**त्वमसि तमसि हस्तालम्बनं मादृशानां**
**त्वमसि तदसि तत्त्वं तत्त्वमेवाम्ब वेत्य”॥**[2]

अत्र तत्त्वं तत्त्वमिति शब्दयोः यमकमस्ति। तथा हि प्रथमतत्त्वशब्दः ब्रह्मपरः द्वितीयतत्त्वशब्दः सत्यपरः। चतुर्दशेऽपि पद्ये एवमेवावलोक्यते -

**“कविमधुकरसार्थैर्गाढनिर्लीढमूर्त्या**
**प्रतिमुहुरनया वाङ्मालया मालिनी माम्।**
**बहलबहलहर्षोत्कर्षफुल्लत्कटाक्षा**
**भव भव भवसिन्धोर्मातरुद्धृत्य धन्या”॥**[3]

अस्मिन् पद्ये भवसिन्धु इत्यत्र भवे सिन्धुत्वारोपाद् रूपकालङ्कारः।यतो हि भवः संसार एव सिन्धुः इति। अपि च भव भवसिन्धोरित्यत्र भवपदस्यावृत्तिरस्ति, प्रथमस्यार्थः भू-धातोः लोट्लकारे मध्यमपुरुषैकवचनरूपमिति एवञ्च अपरस्यार्थः संसार इत्येव। इत्यस्मात् शब्दैक्येऽपि अर्थभिन्नत्वे सति यमकालङ्कारः वर्तते। इतोऽपि दशमे पद्ये अनुप्रासोऽस्ति यथा –

**“महति महसि मग्ने भग्नचन्द्रार्कदर्पेमधुरिमरसधारावर्षिकेलीकटाक्षे।**
**परिणतकरुणार्द्रैर्भावनीये मुनीन्द्रै -**

---

[1] 9 Gems of Sanskrit Literature vol.-3, Pg. No. 138.

[2]दुर्गास्तुतिः, ५ पद्यम्।

[3]दुर्गास्तुतिः, १४ पद्यम्।

**भगवति मम दुर्गे दुर्गतिं दूरयेथाः"॥**[1]

अत्र 'म, ह,भ, र', इत्यादीनां बहूनाम् अक्षराणां आवृत्तिः वारं वारं दृश्यते अतोऽत्र वृत्त्यनुप्रासस्य छटा द्रष्टुं शक्यते। काव्ये स्वरूपवर्णनात्परं कविः देव्याः स्तुतिं करोति यथा –

**"त्वमसि कमलयोनेराननाम्भोरुहश्री -**
**स्त्वमसि दनुजशत्रोस्तुङ्गवक्षः स्थलश्रीः।**
**त्वमसि मदनशत्रोः श्यामवामार्धलक्ष्मी -**
**स्त्वमसि निगममूर्तेर्मण्डलाभोगलक्ष्मीः"॥**[2]

अत्र एकस्यां भगवत्यां नानोपमानत्वात् आरोपाच्च मालारूपकम् अलङ्कारः। दुर्गादेवी त्रिदेवानां साररूपेण वेदानाञ्चापि ज्ञानस्रोतरूपेण प्रतिष्ठिता कविना। असौ कविः जन्मना शैवः तथापि वेणुगोपालं सर्वात्मना भजति स्म।[3] तदानीमपि दुर्गादेव्याः सर्वस्य साररूपेण वर्णनमिदं कृत्वा प्रतिपादयति भक्तिरेव सर्वश्रेष्ठा मुख्या च। इतोऽपि एकादशे पद्येऽपि लिखति –

**"महिषशिरसि पादं मानसे वा मदीये**
**निदधत निरवद्यज्ञानविश्वानवेद्ये।**
**हर हर हरिकन्याग्रामसत्याधिवासे**
**भगवति भवतापात् पाहि मां पाहि मातः"॥**[4]

अर्थदृष्ट्या इदं प्रौढं पद्यं यद् अनेन कविः मुक्त्यर्थं स्वस्य मनीषां प्रकटीकरोति। देवीदुर्गया महिषासुरः आक्रम्यते तदानीम् अमुना कविना देवी प्रार्थ्यते, हे भगवति, त्वं सत्यमेव हरिकन्याग्रामे वससि। महिषासुरशिरसि वा मदीये मानसे पादं प्रस्थाप्य मम सांसारिकबन्धान् विनश्य माम् भवतापात् पाहि इति। अत्र वाकारस्य समुच्चयार्थकत्वं प्रकल्पितम् उक्तञ्च व्यक्तिविवेके आचार्यमहिमभट्टेन

---

[1]दुर्गास्तुतिः, १० पद्यम्।

[2]दुर्गास्तुतिः, ६ पद्यम्।

[3]कृष्णकर्णामृतम् २ आश्वासः, २४ पद्यम्।

[4]दुर्गास्तुतिः, ११ पद्यम्।

स्वीये व्यक्तिविवेके ध्वनिलक्षणस्थवाकारविचारावसरे यथा -"किञ्चात्र वाशब्दो विकल्पार्थो वा स्यात् समुच्चयार्थो वा न तावद्विकल्पार्थः पक्षान्तरासम्भवस्य व्युत्पादितत्वात्। सम्भवे वास्य द्विवचनानुपपत्तिः, तयोस्समुच्चयाभावात्"।[1] अत एव वाकारोऽत्र समुच्चयार्थकः॥

हरिकन्यामन्दिरस्य कैरल्यां 'मूक्कोला' इति स्थाननाम भवति। एतस्यार्थः संस्कृते मुक्तिस्थलमिति अर्थात् केरलीयजनै अपि मन्यते यन्मुक्तिदायिनी देवीदुर्गा सत्यतया अत्र निवसती भक्तेभ्यः मुक्तिं यच्छति। एतां देवीमवलम्ब्य नारायणीयकर्ता नारायणभट्टपादः सप्ततिः पद्यानि रचयामास। सर्वाणि पद्यानि शार्दुलविक्रीडिते छन्दसि निबद्धानि। 'श्रीपादसप्ततिः' इति काव्यस्य नाम॥

**"इति भगवति कृष्णे भक्तिसाम्राज्यभाजा**
**त्वयि च भुवनमातुर्भुर्भुवस्त्वस्त्रयीशे।**
**किमपि रचितमेतत् कृष्णलीलाशुकेन**
**श्रवणनवविनोदं नन्दकन्ये नयेत"॥[2]**

एतस्मिन् उपान्तिमे पद्ये कविना स्वनाम्नः इष्टदेवतायाश्च उल्लेखः कृतः। इतः अग्रे सः वदति यत्किमपि मया रचितं तन्न अवधेयार्हतां भजते तथापि तस्याः नन्दकन्यायाः श्रवणविनोदार्थम् उपयुक्तं भवेत् इति प्रार्थनां च करोति। अत्र कवेः भक्तिविशुद्धत्वेन सहैव नन्दकन्या इति उल्लेखोऽपि महत्त्वपूर्णः, श्रीकृष्णजन्मसमये भगवतः विष्णोर्माया यशोदायाः पुत्रीरूपेण जनीमलभत सा एव अग्रिमे अवतारे महिषासुरमर्दिनी इति मेननमहोदयस्य मतम्।[3] अतः तस्याः नन्दकन्या इति उल्लेखेन कविः स्वेष्टदेवमपि स्मरति। इति तस्य मतस्याशयः इति मे मतिः॥

## ❖ उपसंहारः

प्रकृतकाव्यं लघुकायमपि कवेः वैशिष्ट्यज्ञानार्थम् एवञ्च भक्तेः महत्त्वप्रतिपादनार्थं सुशक्तं सक्षमञ्च विद्यते। अस्मिन् काव्ये पौराणिका उल्लेखाः

[1]व्यक्तिविवेकः, ध्वनिलक्षणस्थवाकारविचारे, पृ.सं. ९४।

[2]दुर्गास्तुतिः, १५ पद्यम्।

[3] 9 Gems of Sanskrit Literature vol.-3, Pg. No. 149.

सर्वत्र निर्दिष्टाः सन्ति। यथा प्रथमे पद्ये देव्याः कृते 'जलधरश्रीसोदरे' इति सम्बोधनेन तस्याः भगवता विष्णुना सह सहोदरत्वसम्बन्धः उक्तः। द्वितीये पद्ये 'नानायुधाढ्ये' पदेन महिषासुरमर्दनार्थं देवतानां स्वायुधसमर्पणं निर्दिष्टम्। 'मृगपतिमधिरूढे' इत्यत्र देव्याः वाहनरूपसिंहस्यापि उल्लेखः प्राप्यते। षष्ठः श्लोकस्तु एतादृशानां पौराणिकोल्लेखानां निधिः वर्तते। अत्र ब्रह्मदेवार्थं 'कमलयोनिः' विष्णोरुल्लेखार्थं 'दनुजशत्रुः' महादेवार्थं च 'मदनशत्रु' इत्येतानि पदानि योजितानि। एभिः पदैः तत्र तत्र प्रसिद्धाः पौराणिककथाः स्मर्तुं शक्यन्ते। पुनः एकादशे पद्ये महिषासुरवधस्योल्लेख एवञ्च पञ्चदशे पद्ये 'नन्दकन्या' इति पदेन भगवतः श्रीकृष्णस्य जन्मवृत्तान्तस्यापि स्मरणं कविना कृतम्। एवं प्रकारेण कवेः पौराणिककथासु ज्ञानं रुचिश्च अवगम्यते॥

निखिलेऽपि काव्ये धातुनां मध्यमपुरुषैकवचनरूपाणि दृश्यन्ते येनेदं काव्यं प्रार्थनात्मकम् अवभासते अपि च भक्तेः पराकाष्ठामपि दर्शयति , एतत्सर्वं भक्तिरतानां स्वाभाविकमेव॥ यथा पूर्वमुक्तम् -

**"महिषशिरसि पादं मानसे वा मदीये**
**निदधत निरवद्यज्ञानविश्वानवेद्ये।**
**हर हर हरिकन्याग्रामसत्याधिवासे**
**भगवति भवतापात् पाहि मां पाहि मातः"॥**[1]

## ❖ सन्दर्भग्रन्थाः


1. Dr. Menon, K.P.A., 1996,9 Gems of Sanskrit literature, Volume – 3, Delhi, Nag Publishers.
2. Dr. Menon, K.P.A., 1994,Sri Lilasuka's Krishnakarnamritam, Delhi, Nag Publishers.
3. आचार्यविश्वेश्वरः, 1960, काव्यप्रकाश, वाराणसी, प्रकाशक ज्ञानमण्डल लिमिटेड।
4. आचार्य पं. खण्डूड़ी, सत्यनारायणशास्त्री, 2016, श्रीमम्मटभट्टविरचितः काव्यप्रकाशः, वाराणसी, चौखम्बा कृष्णदास अकादमी।


[1]दुर्गास्तुतिः, ११ पद्यम्।

 ISSN - 2277-2359

5. आचार्यदाहालः लोकमणिः, 2021, श्रीविश्वनाथकविराजप्रणीतः साहित्यदर्पणः, वाराणसी, चौखम्बा सुरभारती प्रकाशन।
6. पं. झा, मदनमोहन, 2018, पण्डितराजश्रीजगन्नाथविरचितः रसगङ्गाधरः, वाराणसी चौखम्बा विद्याभवन प्रकाशन।
7. प्रो. द्विवेदी, रेवाप्रसाद, 1998, राजानकमहिमभट्टप्रणीतः व्यक्तिविवेकः (चतुर्थ संस्करणम्), वाराणसी, चौखम्बा संस्कृत भवन प्रकाशन॥

# ॥भवनाटके काव्ये गुरोः शिशवे उपदेशः॥

**प्रियंका**
शोधच्छात्रा, साहित्यविभागः,
कें.सं.वि.वि. गुरुवायूर्-परिसरः।

## ❖ भूमिका –

श्रीपूर्णचैतन्यनयतिना केरलीयकविना रचितं भवनाटकं काव्यं खण्डकाव्यमस्ति। एतस्मिन् खण्डकाव्ये वेदवेदान्तदर्शनस्मृत्यादि शास्त्राणां तत्त्वानि काव्यरुपेण कविः अलिखत्। धर्मार्थकाममोक्षरुपं पुरुषार्थचतुष्टयं वर्णाश्रमव्यवस्थया अपि लोकैः प्राप्यते। एते चत्वार आश्रमाः कैवल्यप्राप्त्यर्थं सोपानकल्पाः वर्तन्ते, तेषां विषयाः भवनाटकेकाव्ये यतिना निर्दिष्टाः। तत्र आद्य आश्रमः वर्तते ब्रह्मचर्याश्रमः। धर्मतत्त्वावबोधाय विद्याध्ययनमूलकं ब्रह्मचर्यम्। काव्यस्य प्रथमाङ्के संन्यासिना बालकस्य गुरुकुलप्रवेशः तथा च तत्र तस्मै गुरोः उपदेशः अपि वर्णितः। विद्याया अध्ययनं शैशवे प्रवर्तते। तदुक्तं महाकविना कालिदासेन- "**शैशवेऽभ्यस्तविद्यानामिति**"।[1] बाल्यकाले विद्यार्जनस्य महत्त्वमपि सुन्दरतया पद्येषु प्रतिपादितम्॥

अस्माकं शास्त्रेषु लिखितमस्ति- "**मातृ देवो भव। पितृ देवो भव। आचार्य देवो भव**"।[2] एवं च – "**मातृमान् पितृमानाचार्यवान् पुरुषो वेद**"।[3] इति। अर्थात् यदा प्रथमा माता, द्वितीयः पिता तथा च तृतीयः आचार्यः एते त्रयः उत्तमाः शिक्षकाः पुरुषस्य जीवने भवन्ति चेत् सः पुरुषः ज्ञानयुक्तः भवति। तस्य विपरीतं यस्य जीवने एते त्रयः न भवन्ति तस्य स्थितिः किदृशी भवति तदपि उक्तम्- "**न शोभते सभामध्ये हंसमध्ये वको यथा**"॥[4]इति। अतः आ बाल्यकालादेव

---

[1]र.वं.,१.८।

[2]तै.उ.,शि.व.,अ.११.२।

[3] स.प्र.,द्वि.स.,पृ.सं.-२३।

[4]स.प्र.,द्वि.स.,पृ.सं.-३१।

शिशोः वेदादिशास्त्रेषु अध्ययने स्वाध्याये च प्रवृत्तिः भवेत् इति यत्नः करणीयः। अस्मिन्नेव सन्दर्भे भवनाटके काव्ये यतिना उक्तम्-

**"अथ शिशुः प्रहितः पितृबान्धवैर्गुरुकुलं कटुकौषधसन्निभम्।**
**परिनिषेवितुमारते हितं विहितपथ्यनिबन्धनसंयुतम्"॥[1]**

शिशुः पूर्वं स्वगृहे अध्ययनं करोति अनन्तरं तस्य प्रवेशः गुरुकुले भवति। तदा शिशोः मनःस्थितिः कथं भवति तद् विषये कविना लिखितम्। सविधमिष्टसुहृज्जनसंगमप्रभृतिसर्वसुखात् सहसा हठेन सः शिशुः गुरुकुलं नीयते तस्य बान्धवैः। सः बालः अपरिपक्वमितः यन्त्रितः दयारहितः धेनोः शिशुसदृशः दृश्यते। तस्य गतिः दुर्बलजीविसदृशः वर्तते। गमनवीथी अतिरेण्वश्मकण्टकयुक्तः अपरिचितः अस्ति। विधिबलात् तप्तः शिशुः अतिदूरगमनात् शुष्ककण्ठः मलिनाननः जातः। तस्य बालस्यावस्थां सुन्दरोपमया कविः वर्णयति यथा-

**"मुहुरितः कियदस्ति हि दूरकं कथय तिष्ठ च किञ्चिदिति ब्रुवन्।**
**अनुपदं परिधावति हारिणः शमनधामपथीव परेतना"॥ [2]**

गुरोः पुरः स्वतनयं परिसमर्प्य गते पितरिस्वबन्धूभिः तादृशः सः खिन्नमनाः शिशुः वारं वारं तत्मार्गं पश्यति। पञ्जरबद्धः शुक इव परवशः परदेशविवासितः परिवियोजितबन्धुजनैकैक अस्मि इति सः परिशोचयति। ततः परं यथा बालदिवाकरः कमलिनीं विकासयति तथैव निजज्ञानरश्मिणा विषादतमःपरिसंवृतां शिशुमतिं विकासयितुम् गुरु उपदेशं ददाति- हे वत्स ! आगच्छ मम निकटं, मा बिभीहि, स्वबन्धुवियोगजन्यं शोकं त्यज। पूर्वपुण्यैः त्वयायम् अवसरः प्राप्तः, चिरं सदुपासनेन ते शं भविष्यति। यथा-

**"नूनं नृणामिह मुखे परिदृश्यमानादृष्टिद्वयादपरमस्ति हि चक्षुरन्तः।**
**दृश्यते हस्त इव येन समस्तलोकस्तच्छिक्षयोन्मिषय तूलिकयेव चित्रम्"॥ [3]**

---

[1]भ.का.,१.२.१।

[2]भ.का.,१.२.५।

[3]भ.का.,१.२.१०।

 ISSN - 2277-2359

तथा च अस्मिन् प्रथमे वयसि प्रयत्नात् पुरुषः लोकद्वयेऽपि सुखदामृतभाञ्जि कामं दुर्लभतराणि ज्ञानानि फलानि लभते। लोकद्वये अर्थात् इहपरनाम्नि। दुःखमोहमायारुपसंसारात् तप्तः पुरुषः तस्मात् दूरं गन्तुम् इच्छति, तस्य दूरं यियासु पथिकाय ज्ञानं छायामृतं वर्तते यः शान्तिं प्रददाति तथा च अधन्कारे मणिदीपकवत् कैवल्यप्राप्तर्थं पथानं प्रकाशयति। गुरु अग्रे वदति- हे वत्स ! महता परिश्रमेण हि इह नृयोनौ जन्म प्राप्यते,(तदुक्तं भगवतपादशंकराचार्येण विवेकचूणामणौ – "**जन्तूनां नरजन्म दुर्लभमतःपुंस्त्वं ततः...**" इत्यादि [1] तत्रापि यः पुरुष अयं प्रज्ञाचक्षुष उन्मेलनं न करोति चेत् तस्य जन्म अस्मिन् संसारे केवलं भारायेव इति अवेहि। यथा- अजागलस्तनं नितरां निरर्थकम्॥

अग्रे कविः बाल्ये अध्ययनस्य महत्त्वं प्रतिपादयति। बाल्यकालस्य तथा च तस्याम् अवस्थायामध्ययनस्य महत्त्वं वर्णयति। यथा-

**"बाल्यं न कुत्रचिदहो पतितं पथीव**
**शक्यते नैव विपिनऽपि हि च सङ्गृहीतुम्।**
**क्रेतुं न पण्यनिलयेऽपि हि रत्नमेत-**
**द्विद्धीशदत्तमिति रक्षय शिक्षयैतत्"॥**

एवं च -

**"बाल्ये गृहीतपरिशिक्षणमेव वत्स नूनं नृणामिह भवेदतिसुप्रकाशम्**
**स्वात्यृक्षमेघपतिताम्बुकणो हि शुक्तौ मुक्तामणिर्भवति नेतरथा कदापि"॥**[2]

अर्थात् स्वाती नक्षत्रे शुक्तिकायां पतितो जलकणः मुक्तामणिर्भवति। तथा शैशवे बुद्धौ प्रविष्टा विद्यापि। तथा च हे वत्स ! अस्माकं गात्रेण सह विद्यायाः अपि वृद्धिः भवति। यथा- "**उप्त्वाम्बुनानुपरिषिंचितशालयो हि सद्रत्नधान्यचयदाः प्रभवन्ति कामम्**"॥ [3] इति॥ अनन्तरं गुरुः यौवनप्रभावान् दोषान् वदति। यौवने दुर्दम्यकामतीक्ष्णक्रोधादि अङ्कुरिताः भवन्ति, तदा प्रयत्नेनाऽपि विद्या फलवती न

---

[1]वि.चू.म.,२।

[2]भ.का.,१.२.१४-१५।

[3]भ.का.,१.२.१६।

भवति। अस्मिन् तारुण्यरुपभूमौ यदा मनोरुपलतारुढा भवति तदा क्षुद्रइन्द्रियरुपद्रुमाः सुखार्थम् ऋजुमार्गान् प्रति अग्रसराः भवन्ति। तस्मिन् समये बलेन तन्तुना संसाधिताऽपि एषा लता न अवरुधति तस्याः प्रवृत्तिः वक्रमार्गैव भवति। नराणां शास्त्रादृते न धर्मविधर्मबोधः भवति। धर्मादिबोधरहिते नहि सत्प्रवृत्तिः भवति, सत्कर्मणा विरहिते नहि पापहानिः भवति, पापक्षयेण विना नहि चित्तशुद्धिः भवति, शुद्धिं विना नहि परमतत्त्वस्य भानं भवति। परमतत्त्वपदेन अत्र ब्रह्मसाक्षात्कार उक्तः स एव वेदान्तिनां मते मोक्षः। तत्त्वप्रकाशं विना नहि संसारबन्धनात् मुक्तिः भवति। शास्त्रेषु अपि उक्तमस्ति- ऋते ज्ञानान् न मुक्तिः। इति। काव्ये अग्रे गुरु उपदिशति- तस्मात् हे वत्स ! प्रसन्नमनसा त्वं विद्याधीष्व। एषा विद्या सुधीभिः संसेविता वर्तते। इत्यादिरुपेण धीरगुरुणा उपदेशः दीयते। यथा धूम्रयुक्तः यज्ञाग्नौ हव्यदानेन सः अनलः सुप्रभवयुक्तः सुप्रदिप्तः निर्मलः भवति तथैव शिशु अपि गुरो उपदेशं श्रुत्वा निजबन्धुवियोगजन्यशोकात् उन्मुक्तः भूत्वा ज्ञानार्जने उत्सुकः भवति॥

## ❖ उपसंहारः -

गुरोरुपदेशः सर्वेषां जीवने महान् प्रेरणादायको भवति। तद् विषयः यतीना चारुतया प्रतिपादिता। कादम्बर्यां बाणभट्टेनापि शुकनासोपदेशे गुरोरुपदेशविषये लिखितम्– **“गुरुपदेशश्च नाम पुरुषाणामखिल-मलप्रक्षालनक्षममजलस्नानम्, अनुपजात पलितादिवैरुप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः....”**[1] इत्यादिरुपेण। तथा च विद्यायाः महत्त्वमपि कविना काव्ये सुष्ठुतया प्रतिपादितम्। उपनिषत्सु अपि अस्मिन् सन्दर्भे वर्णितमस्ति- **“यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि”।** [2] इति॥ श्रीमन्नारायणीये भट्टपादेन अपि गुरुशिष्ययोः सम्बन्धः किदृश इति प्रतिपादितम्। तत् पद्यं यथा –

**“आचार्यख्याधरस्थारणिसमनुमिलच्छिष्यरूपोत्तरार-**

---

[1]का.शुक.,पृ.सं.-३१७-३१८।

[2]तै.उ.,शि.व.,अ.११.।

 ISSN - 2277-2359

**ण्यावेधोद्भासितेन स्फुटतरपरिबोधाग्निना दह्यमाने।**
**कर्मालीवासनातत्कृततनुभुवनभ्रान्तिकान्तारपूरे**
**दाह्याभावेन विद्याशिखिनि च विरते त्वन्मयी खल्ववस्था"॥** [1]

अपि च श्रूयते गुरोरनुग्रहादेव पुमान् पूर्ण प्रशान्तये इति। वस्तुतस्तु अस्मदपरम्पराया ह्रासः अनुभूयते। स च ह्रासः भविष्यत् प्रलये लिङ्गमिति प्राचीननैन्यायिक उदयनाचार्य एषः स्वीये न्यायकुसुमांजलौ लिखति- **"ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम्"॥** [2]इति॥

## ❖ सन्दर्भग्रन्थसूचीः –


1. एकादशोपनिषद् ,भाष्यकार - आचार्य सत्यप्रिय ,संस्कार प्रकाशन दिल्ली ,१९९७.
2. सत्यार्थप्रकाश ,सम्पादक - पं. भगवद्दत्त ,विजयकुमार गोविन्दराम हासानन्द दिल्ली ,२००० .
3. भवनाटकं काव्यम् ,प्रकाशकः - भगवानलाल तेजाजी खारावाला तेषां सूनवश्च लालजीभाई भगवानलाल खारावाला अहमदाबाद ,१९७६ .
4. कादम्बरी ,व्याख्याकारः - पण्डित श्रीकृष्णमोहन शास्त्री ,चौखम्भा संस्कृत संस्थान वाराणसी ,१९८२.
5. रघुवंशमहाकाव्यम् ,व्याख्याकारः - श्रीहरगोविन्दमिश्रः, चौखम्भा संस्कृत संस्थान वाराणसी ,१९९४ .
6. विवेकचूडामणिः ,व्याख्याकारः - अरविन्दानन्दः, चौखम्बा विद्याभवन वाराणसी ,१९९८ .
7. न्यायकुसुमाञ्जलिः ,सम्पादकौ - श्रीपद्मप्रसादोपाध्यायः एवं श्रीढुण्ढिराजशास्त्री , चौखम्भा संस्कृत संस्थान वाराणसी ,२००२.
8. नारायणीयम् ,सम्पादकः - त. गणपतिशास्त्री ,भारतीय विद्या-अध्ययन केन्द्र वाराणसी ,१९९२ .


[1]ना.स्क.११,द.९४.२ ।

[2]न्या.कु.स्तवक २.३।